॥ अथ ॥

# ॥ उपदेशरहस्यप्रकरणम् ॥

॥ श्रीः ॥

॥ अथ ॥

# ॥ उपदेशरहस्यप्रकरणम्

कलिकालकल्मषकर्दमकलंकक्षालनपारावारप्रवाहगीःप्रवाहन्यायविशारदन्या-
याचार्यानेकशतग्रन्थग्रन्थनभव्यभूस्पृगुपकृतिकर्मठगणिपदालंकृतश्री-
मद्यशोविजयोपाध्यायनिर्मितम्
स्वोपज्ञविवरणपरिकलितम् ॥

वीर संवत. २४३७ प्रत. ५०० विक्रम संवत. १९६७

आवृत्ति १ ली.

पोरवाडवणिग्वंशावतंसश्रेष्ठिप्रवर-
श्रीभगुभाइसुतश्रीमनसुखभाइश्रेष्ठिवरेण
राजनगरे
श्री रत्नसागरप्रीन्टींगमुद्रणालये मुद्रापितम्.
शा. जेशंगभाइपुत्रामृतलालेन मुद्रितम्.

॥ श्रीरस्तु ॥

## ॥ प्रस्तावना ॥

इहाध्यात्मिकाधिदैविकाधिभौतिकाद्यपरिमिताऽसातपरंपरापरिकलितेऽसारे भवजलनिधौ पूर्वविहितकर्मपरिणामवशतो बम्भ्रम्यमाणानां मातापितृभगिनीकलत्रपुत्रादिस्नेहतन्तुसन्तुत्रोटयिषूणां श्रीजिनवरदर्शितप्रशस्यतत्त्वार्णवावतरीतुकामानां निखिलभव्यानामुपदेष्टुकामा निखिलकर्ममथनोद्भवकेवलज्ञानानां प्रशस्तप्रवचनप्रधानप्रवचनानां जगज्जनसमुद्धरणैकपरायणानां श्रीजिनेश्वराणामागममनुसृत्यैव पवित्राशयैः शासनधुरंधरैरनल्पचिरन्तनाचार्यैर्यद्यपि निर्वाणवर्त्मोपायभूतानि स्वल्पशब्दात्यन्तगहनविषयाण्यनेकानि तन्त्राणि निर्मितानि सन्ति तथापि तानि मन्दमतीनामुपकारानर्हाण्यवगम्य तेषामप्युपचिकीर्षवो विशुद्धतरसरस्वतीवैभव बलेन वाराणसीविद्वत्परिषदं विजित्याधिगतन्यायविशारदबिरुदा निखिलागमतत्त्वज्ञाननिपुणास्त्रिभुवनकोविदललाटतिलकायमानाः शासनस्तम्भभूताः निखिलनयविलसितवाग्विलासाः कुतीर्थिसमयगर्वविनाशनैककौशलाः सकलविद्वद्वर्यमनःप्रमोदावहान्यनेकानि शास्त्राणीमे वाचकपुङ्गवाः श्रीयशोविजयाभिधाना मुनयो निर्ममिरे। पूज्यपादाश्चेमे वैक्रमीयगगनगगनर्षीन्दुसंवत्सरे १७०० । वसुधामण्डलं स्वकीयपवित्रतरचरणकमलन्यासैर्मण्डयामासुरिति सम्यगवगम्यते । एभिर्महात्मभिर्वाचकैः स्याद्वादरहस्यभाषारहस्यप्रमाणरहस्यनयरहस्योपदेशरहस्यादीनि बहूनि रहस्यानि जगज्जन्तुमहोपकाराय चरीकृतानीति परम्परातः श्रूयते, परं च तानि दुर्भागधेयानामस्मादृशां भूस्पृशां पुण्यहानितो निखिलानि नोप-

लभ्यानि येन तद्दर्शनमपि विधाय जनुस्सफली चरीक्रियाम तेषु रहस्येष्वपीदं महोदयं कुतीर्थिकौशिककलापदिनकरायमाणं परमं परमपदोपायभूतं ज्ञानध्यानाद्यनुपमगुणगणविलसितं हितप्रवृत्त्यनुकूलवाक्यात्मकशास्त्राणां सारभूतं पुरुषार्थसम्पादकसुन्दरश्रेयसां शिरोऽवतंसायमानं श्रवणसमनन्तरस्वेष्टसाधनताप्रतीतिनियामकम्, अत एवेतरसाधनसदृक्षसन्देहविषयतानितान्तरिक्तं लोकोत्तरगुणगरिष्ठविद्वद्वरिष्ठजनतोपादेयं सारार्थप्रतिपादनविध्वंसितकुवादिवितण्डाजल्पं लौकिकार्थप्रतिपादनपूर्वकपरमार्थाऽवबोधसमर्थं स्वदभीष्टप्रवृत्तिप्रयोजकशब्दसन्दोहस्वरूपशास्त्रोपनिषद्भूतमुपदेशरहस्याह्वयं प्रकरणं विनिर्मितमस्ति तच्च जनतोपकाराय श्रीभगुभाइतनुजेन श्रीमनसुखभाइश्रेष्ठिवर्येण मुद्रापयित्वा प्राकाश्यं नीतमिति ॥

## शिवमस्तु.

# ॥ विषयसूचीपत्रम् ॥


| गाथाङ्कः | | पत्रम्. | पृष्ठम्. | पंक्तिः |
|---|---|---|---|---|
| १ | अपश्चिमतीर्थाधिपनमस्कारात्मकमंगलोपनिबन्धपूर्वकप्रवृत्तिप्रयोजकज्ञानविषयीभूतानुबन्धचतुष्टयोपदर्शनं ग्रन्थग्रन्थनार्थनिरूपणपूर्वककपोलकल्पितत्वपरिहृतिश्च. | १ | १ | ५ |
| २ | सूत्रनीत्या धर्मप्रवर्तनोपदेशप्ररूपणम् ॥ | १ | २ | २ |
| ३ | आगमापलापिनां सूत्रनीत्यननुगामिनामारेकोपदर्शनम् ॥ | १ | २ | ८ |
| ४ | निसक्ताशङ्कां निराकृत्याज्ञाबाह्यापायबहुलत्वोपदर्शनपूर्वकहेतुस्वरूपानुबन्धहिंसास्वरूपप्रदर्शनम् ॥ | २ | १ | १ |
| ५ | कृतं दीर्घकालिकायाससाध्येन सूत्राध्ययनेन आहारशुद्ध्यादिना हिंसोपायेनैव चित्तपरिणतिशुद्धितो भवपारलाभात्तावन्मात्रश्रुतस्य च स्वातन्त्र्येणैवोपपत्तेः पर्याप्तं गुरुपारतन्त्र्येणेत्यारेकावतां कदाग्रहग्रहाभिभूतानां शुभोऽपि मनःपरिणामः आज्ञाबाह्यत्वात्तीर्थकृदाशातनाद्वाराशुभत्वं बिभर्तीति समपञ्चमावेदितमस्यामार्यायाम् ॥ | २ | २ | ५ |
| ६ | माषतुषादीनां विशिष्टश्रुताभावेपि निस्तारश्रवणात् शुद्धः परिणाम एव न्याय्यः अलं श्रुताभ्यासेनेत्यारेकापाकरणाय शुद्धपरीणामहेतुनिरूपणम् ॥ | ३ | १ | ३ |

| | | | | |
|---|---|---|---|---|
| ७ | स्वाभिमतसामाचारीनिष्ठानामेव मार्गानुसारित्वं नत्वन्येषामित्यभिमान एवेति निरूपणपूर्वकं क्रियाज्ञानफलप्रदर्शनम् ॥ | ३ | १ | १४ |
| ८ | आज्ञयैव श्रुतसंपत्तौ कथं तदननुयायिनां विशिष्टतपश्चरणादिका क्रिया कथं वा स्वपक्षबद्धोरुरादराणामपि परलोकहिताय प्रवृत्तिमतां प्रशम इत्यारेकापाकरणपूर्वकतत्क्रियावैफल्यनिरूपणं क्रियाप्रशमयोर्मोहहेतुकत्वान्न ज्ञानकार्यत्वमिति व्यवस्थापितश्च ॥ | ३ | २ | १० |
| ९ | आज्ञाबहिर्वर्तिनां वक्रगामित्वप्रदर्शनमस्यामार्यायाम् ॥ | ४ | १ | ९ |
| १० | अवक्रगामिस्वरूपव्यवस्थापनम् ॥ | ४ | २ | ४ |
| ११ | एकाकिविहारारेकावतां स्वच्छन्दचारिणां गुरुकुलवासकारागारवासनानां आज्ञाबाह्यत्वव्यवस्थापनं नयालभिज्जेत्यादिसूत्रस्य गीतार्थाधिकारिविषयत्वप्ररूपणं च ॥ | ५ | १ | ५ |
| १२ | उक्तसूत्रस्यैव गीतार्थविषयत्वनिष्टंकनम् ॥ | ५ | २ | १ |
| १३ | गीतार्थविषयत्वानङ्गीकारे सूत्रविरोधोपदर्शनपूर्वकैकाकिविहारिणामैहिकामुष्मिकापायप्रदर्शनमनेकसूत्रसाक्षिसंवलितं जाताजातकल्पव्यवस्थाप्रतिपादनपूर्वकगीतार्थस्यापि निष्कारणगणत्यागान्याय्यत्वनिरूपणं च ॥ | ५ | २ | ७ |
| १४ | निर्युक्तिभाष्याद्यनभ्युपगमवतां व्याख्याप्रज्ञप्तिसूत्रोपदर्शनपूर्वकं शासनप्रत्यनीकत्वव्यवस्थापनं व्यासतो बृहत्कल्पभाष्यसाक्षिसहकृतष्टीकाद्यभ्युपगमो न्याय्य इत्युपदर्शितश्च | ७ | १ | ४ |

| | | | | |
|---|---|---|---|---|
| १५ | एकाकिविहारिणां विरत्यपलापे भगवतीविरोध इत्याशङ्कानिरूपणम् | ७ | २ | ८ |
| १६ | पूर्वोक्ताशङ्कासमाधानं द्रव्याराधनास्वरूपनिर्णयश्च | ८ | १ | ६ |
| १७ | द्रव्याराधनाघटकद्रव्यपदार्थद्वैविध्यप्रदर्शनम् | ८ | २ | ११ |
| १८ | ग्रन्थिगतानां स्वरूपोपदर्शनपुरस्सरं द्रव्याराधनसम्भवप्रकारप्रदर्शनम् | ९ | २ | ४ |
| १९ | द्रव्याज्ञालिङ्गाविष्करणम् | ९ | २ | ११ |
| २० | द्रव्याज्ञालिङ्गेषु युक्तिभिर्द्रव्यपदप्रवृत्त्युपदर्शनम् | १० | १ | ६ |
| २१ | अभिनवश्राद्धादीनां द्रव्यस्तवादिषु प्रवृत्त्युपपादनम् | १० | २ | ५ |
| २२, २३, २४, २५, २६, | गाथापञ्चकेनापुनर्बन्धकादीनां स्वरूपोपदर्शनपूर्वकं द्रव्याज्ञासम्भवप्रदर्शनं सम्यक्त्वावाप्तिकार्यसम्यग्दृष्टिजीवस्वरूपतत्कृत्यधर्मश्रवणधर्मानुरागगुरुभक्तिनिदर्शनोपदर्शनदेशविरतिस्वरूपतत्तद्व्रतभङ्गव्याससर्वविरतिस्वरूपसम्यक्त्वदेशविरतिसर्वविरतिप्रापणक्रमनिरूपणं च | ११ | १ | ९ |
| २७ | बीजाधानेन द्रव्याज्ञाया भावाज्ञाजननयोग्यत्वरूपविशेषोपदर्शनम् | १३ | २ | ६ |
| २८ | बीजाधानस्वरूपनिरूपणम् | १४ | १ | ३ |
| २९ | द्रव्यस्तवस्य सदनुमततत्त्वोपपादनम् | १४ | २ | ८ |
| ३०, ३१ | द्रव्यस्तवानुमोदनेऽपि नारम्भानुमतिरित्यस्य युक्त्या स्थापनम् | १५ | २ | ३ |
| ३२ | द्रव्यस्तवस्य स्वरूपेण सावद्यत्वेऽप्यनुबन्धतो निरवद्यत्वान्न धर्म्मार्थहिंसात्वमित्युपपादितम् | १६ | १ | ११ |

| | | | | |
|---|---|---|---|---|
| ३३ | द्रव्यस्तवस्यागमविहितत्वसमर्थनम् | १७ | १ | ८ |
| ३४ | साधूनां द्रव्यस्तवानुमतौ प्रमाणोपदर्शनम् | १८ | १ | ७ |
| ३५ | अनुमोदनीयस्यापि द्रव्यस्तवस्य साधुभिस्स्वयमननुष्ठाने युक्त्युपदर्शनम् | १९ | १ | १ |
| ३६ | साधूनां द्रव्यस्तवफलभाषायाः प्रज्ञापनीत्वं नत्वाज्ञापनीत्वमिति व्यवस्थापि द्रव्यानुमोदनमात्रत इत्युपदर्शितम् | १९ | २ | ११ |
| ३७ | हीनत्वेऽपि द्रव्यस्तवस्य साध्वनुमोद्यत्वं विपर्यये दण्डप्रदर्शनेनोपपादितम् | २० | १ | ११ |
| ३८ | द्रव्याज्ञाया निष्कृष्टस्वरूपोपसंहरणम् | २० | २ | ३ |
| ३९ | द्रव्याज्ञाया भावाज्ञात्वं निरस्य द्रव्यभावसमायोग एव विशिष्टफलदायकत्वमावश्यकनिर्युक्तिग्रन्थद्वारेण निरूपितम् | २० | २ | १२ |
| ४० | हेतुस्वरूपादिभ्यो भावाज्ञानिरूपणम् | २१ | २ | १ |
| ४१ | मार्गप्रवृत्तिरात्मनस्स्वाभाविकैवेत्युपपादितम् | २१ | २ | ७ |
| ४२ | मार्गप्रवृत्तेरात्मनस्स्वाभाविकत्वेऽपि न मिथ्यादृष्टिदशायां भाव इति प्रश्नोत्तराभ्यामुपपादितम् | २१ | २ | १५ |
| ४३ | सम्यग्दृशो भावाज्ञया मार्गप्रवृत्तावपि न सर्वेषां कालावैषम्येन मुक्तिप्राप्तिरित्युपपादितम् | २२ | १ | ११ |
| ४४ | अतिशयितभावाज्ञायाः कर्म्मप्रतिबन्धविधूननेन मुक्तिक्षमत्वमित्युपदेशद्वारा प्रदर्शितम् | २२ | २ | ३ |
| ४५ | परिशुद्धभावाज्ञायाः प्रतिवस्तूपमया कर्मप्रतिबन्धप्रतिपक्षत्वमुपपादितम् | २२ | २ | १० |

| | | | | |
|---|---|---|---|---|
| ४६ | परिशुद्धाज्ञायोगस्य क्रमोपक्रमलक्षणफलम्प्रति पुरुषकारत्वमुपवर्णितम् | २३ | १ | ६ |
| ४७, ४८ | दैवपुरुषकारयोरुभयोरपि तुल्यबलत्वं न तु दैवमात्रस्य कार्यार्ज्जकत्वमिति गाथाद्वयेनोपवर्णितम् | २३ | २ | ४ |
| ४९, ५० | विशिष्टदैवमात्रस्य फलजनकत्वं विशिष्टपुरुषकारमात्रस्य फलजनकत्वप्रतिबन्द्या निराकृतम् गाथाद्वयेन | २४ | १ | १ |
| ५१ | दैवपुरुषकारयोस्समप्राधान्येन फलजनकत्वोपसंहारः | २४ | २ | ७ |
| ५२ | कार्यमात्रस्य दैवपुरुषकारोभयजन्यत्वेऽपि विविक्तव्यवहारोपपादनम् | २५ | १ | ३ |
| ५३ | इदं दैवकृतं न पुरुषकारकृतमित्यादिविविक्तव्यवहारस्य प्रकारान्तरेणोपपादनम् | २५ | २ | १० |
| ५४ | आज्ञायोगस्योपमया मुमुक्ष्वनुसर्त्तव्यत्वमुपसंहृतम् | [illegible] | १ | ५ |
| ५५ | स्वपरसमयसम्पत्त्योक्तार्थदृढीकरणम् | [illegible]६ | [illegible] | ११ |
| ५६ | अध्यात्मनः सप्रयोजनस्वरूपमुपदर्श्य शुद्धाज्ञायोगलभ्यत्वमुपवर्णितम् | [illegible]६ | २ | ३ |
| ५७ | सम्यग्दृशामेव शुद्धाज्ञायोग इति नियामकप्रदर्शनमुखेनोक्त्वागमसम्मतिर्दर्शिता | २६ | २ | ८ |
| ५८, ५९ | वेधपरिणामरहितरत्न इवाभिन्नग्रन्थे जीवे न सूत्राधानसम्भव इति सोदाहरणमुपदर्शितं गाथाद्वयेन | [illegible] | [illegible] | १३ |
| ६० | भिन्ने ग्रन्थौ सत्त्वेऽपि प्रतिबन्धस्य ज्ञानस्य परिपूर्णत्वमिति सदृष्टान्तम्प्रदर्शितम् | [illegible]७ | [illegible]२ | ६ |

| | | | | |
|---|---|---|---|---|
| ६१ | प्रतिबन्धकालीनस्यापि ज्ञानस्य ग्रन्थिभेदे पूर्णत्वमेवेति हेतुतो भावितम् | २८ | १ | ६ |
| ६२ | क्लेशमूलत्वेनानुबन्धस्य वर्जनीयत्वोपदेशः | २८ | १ | १४ |
| ६३ | अशुभानुबन्धस्य नैरन्तर्यादरसेवितादेवाज्ञायोगविशेषान्नाश इति सदृष्टान्तमुपवर्णितम् | २८ | २ | ११ |
| ६४ | औषधस्येवाज्ञायोगस्य व्यवहारतः कालाकालावुपदर्शितौ | २९ | १ | ११ |
| ६५ | आज्ञायोगस्य निश्चयतः कालोपवर्णनम् | ३० | १ | १२ |
| ६६ | अकालप्रयोगस्य गुणाहेतुत्वेऽप्यानुषंगिकसुखहेतुत्वं प्रश्नोत्तराभ्यां वर्णितम् | ३० | १ | १० |
| ६७ | दूरभव्यादीनामाज्ञायोगजनितमपि ग्रैवेयकादिसुखं न वस्तुतो सुखमिति सदृष्टान्तमुपदर्शितम् | ३० | २ | २ |
| ६८ | मिथ्यादृष्टेस्तत्सुखं वस्तुतो दुःखमेवेत्येतद् दृष्टान्तान्तरेण प्रसाधितम् | ३१ | १ | ३ |
| ६९ | उक्तार्थदृढीकरणार्थं सम्यग्दृष्टिसुखस्वरूपनिरूपणम् | ३१ | २ | ४ |
| ७० | स्वाभाविकसुखस्य न बाह्यकारणापेक्षेति सदृष्टान्तमुपपादितम् | ३१ | २ | ११ |
| ७१ | आभ्यन्तरसुखे प्रवर्त्तमानेऽपि कायिकादिकं बाह्यं सुखं न विरुद्धमिति सदृष्टान्तमुपवर्णितम् | ३२ | १ | ४ |
| ७२ | मिथ्यादृशामाभ्यन्तरसुखाभावे बाह्यं सुखमपि न सम्यग्दृष्टिसुखतुल्यमिति निरूपितम् | ३२ | १ | १० |
| ७३ | तीव्राभिग्रहधारिणामभिग्रहरक्षणपुरस्सरमाज्ञायोगे प्रवर्त्तनमित्युपसंहृतम् | ३२ | २ | १ |
| ७४ | जीर्णाभिनवश्रेष्ठियुगलदृष्टान्तेनेष्टार्थाप्राप्तावपि निजशक्तिस्फोरणतः फलसिद्धिरित्युपपादितम् | ३२ | २ | ८ |
| ७५, ७६ | सम्यक्पालिताभिग्रहाणां प्रभूतपापप्रतिघातकत्वं दृष्टान्तद्वारा समर्थितम्, भावितश्च गाथाद्वयेन | ३३ | १ | ९ |

| | | | | |
|---|---|---|---|---|
| ७७ | आज्ञासहकृतशुभयोगस्य गुरुकत्वं सम्यग्दृष्टिरेव पश्यति न तु मिथ्यादृष्टिरिति सज्जाक्षजातान्धोपमया प्रदर्शितम् | ३३ | २ | १० |
| ७८ | अभिग्रहधारणादिप्रकारेण सम्यगाज्ञायोगप्रवृत्तिविषयोपदेशस्य पुरुषविशेषावधिकृत्य फलवत्त्वनिष्फलत्वे दृष्टान्तद्वारोपवर्णिते | ३४ | १ | २ |
| ७९ | विशिष्यकार्यकारणभावप्रतिपादनमुखेनोपदेशस्य सम्यग्दर्शनादिकार्यम्प्रति व्यभिचारपरिहरणं सदृष्टान्तमुद्घाटितम् | ३४ | १ | १३ |
| ८० | सर्वात्मना समधिष्ठितगुणस्थानेषूपदेशस्य निष्फलत्वेऽपि न सिद्धान्तविरोध इत्युपपादितम् | ३४ | २ | ९ |
| ८१ | गुणस्थानारंभप्रतिपातप्रतिबन्धान्यतरात्मकव्यापाराभावे कथञ्चिद्विरतोऽपि न तत्त्वतो विरत इति न तम्प्रत्युपदेशस्य सफलत्वमित्युपपादितम् | ३५ | १ | ६ |
| ८२ | परिणामे गुणदोषगतगुरुलाघवविचारभाजां ज्ञानदर्शनपूर्णानामुपयुक्तानाञ्च व्रतपरिणामे प्रवृत्तिस्सफला न त्वन्येषामित्युपदर्शितम् | ३५ | १ | १२ |
| ८३ | आयतिकालानुष्ठेयेऽर्थे गुणदोषगतगुरुलाघवविचारप्रदर्शनम् | ३५ | २ | ७ |
| ८४ | ज्ञानवैयावृत्त्यादिसमर्थालम्बनेनापवादपथप्रवृत्तिमानपि मोक्षम्प्राप्नोति न त्वन्यथेत्युपपादितम् | ३६ | १ | ४ |
| ८५ | उक्तार्थस्य प्रकारान्तरेण दृढीकरणार्थं भावना | ३६ | २ | ३ |
| ८६ | अनाभोगप्राप्तस्यापि मुनेः मार्गानुसारित्वं सदृष्टान्तमुपवर्णितम् | ३६ | २ | ९ |

| | | | | |
|---|---|---|---|---|
| ८७, ८८, ८९, | मुनिभावोचितप्रवृत्त्यन्तरोपदर्शनं तस्य च निदर्शनेन भावना दृष्टान्तान्तरदृढीकरणं च गाथात्रिकेण | ३७ | १ | ३ |
| ९० | बाह्यप्रवृत्त्यभावेऽपि शुभयोगेच्छया "शुभभावपरिणामापरपर्यायया" फलनिष्पत्त्युपपादनम् | ३७ | २ | ९ |
| ९१ | दुःषमायामपि समितिगुप्तिसंयमोद्योगभाजोऽसद्ग्रहरहिता महासत्त्वास्साधवो ज्ञेया इत्युपदर्शितम् | ३८ | १ | ७ |
| ९२ | उक्तगुणानामुत्पत्तिबीजाविष्करणम् | ३८ | १ | ७ |
| ९३ | सर्वक्रियानिरोधजस्यापि मोक्षस्य परम्परया स्वाध्यायादिनियोगजन्यत्वान्न तस्य कर्त्तव्यतयोपदेशोऽयुक्त इत्युपदर्शितम् | ३८ | १ | १३ |
| ९४ | ये तु स्वाध्यायादिप्रधानयोगविमुखा बाह्ययोगमात्रनिरतास्तेषां स्वरूपोपदर्शनेनावगणनम् | ३८ | १ | ६ |
| ९५ | असद्ग्रहगृहीतानां मत्तवत्प्रतिपदं स्खलनमित्युपदिष्टम् | ३८ | २ | १२ |
| ९६ | असद्ग्रहगृहीतानामुत्सूत्रप्ररूपकाणामज्ञानितोपदर्शनम् | ३९ | १ | २ |
| ९७ | असद्ग्रहगृहीतास्त एव लोकसंग्रहार्थं गुणवद्गर्हामपि कुर्वन्तीत्यनेन द्वितीया बालता तेषामुपपादिता | ३९ | १ | ८ |
| ९८ | संकिज्जया इत्यादिसूत्रविधिमजानतां सूत्राशातनाभीरूणां लोकसङ्ग्रहार्थमुपदिशतां महापापत्वं उक्तसूत्रविवरणञ्च | ३९ | २ | १ |
| ९९ | उक्तसूत्र एव प्रश्नप्रतिवचने प्रदर्शिते | ४० | १ | ४ |
| १०० | श्रोतृभेदेन स्याद्वादप्रतिपादने भजनाऽपि युज्यते स्याद्वादपरिज्ञानं विना सम्यक्त्वमपि न | | | |


॥ ६ ॥

| | | | | |
|---|---|---|---|---|
| | व्यवस्थितिमश्नुतीत्युपदर्शितम् | ४० | १ | ११ |
| १०१ | विभज्यवादस्य सम्यक्त्वबीजत्वं सूत्रसम्मत्या दृढीकृतम् | ४१ | १ | ५ |
| १०२ | विभज्यवादस्तवनम् | ४२ | २ | १४ |
| १०३ | स्वपरसमयज्ञानशून्याश्चरणकरणप्रधाना अपि निश्चयतो न तयोस्सारं जानन्तीति सम्मतिगाथयोपदर्शितम् | ४३ | १ | ६ |
| १०४ | उक्तार्थे सूत्रसम्वादप्रदर्शनम् | ४३ | १ | १३ |
| १०५ | विभज्यवादमजानतामुपदेशो विडंबनैव जनास्तु नाट्यमिव तच्चरितं प्रेक्षंत इत्युपदर्शितम् | ४३ | २ | ६ |
| १०६ | अपतन्त्राणां शुद्धोंछादिग्रहणयत्नोऽपि न हितकारीत्युपदर्शितम् | ४३ | २ | ११ |
| १०७ | नैमित्तिकत्वेनोपवासस्य विनयवैयावृत्त्याद्यपरकार्यविमुखान्प्रति निष्फलत्वमेकभक्तस्य च नित्यत्वम्प्रतिपादितम् | ४४ | १ | ९ |
| १०८ | एकभक्तस्योपवासवन्नैमित्तिकत्वाशङ्कान्निरस्य नित्यत्वन्तल्लक्षणप्रदर्शनपुरस्सरं व्यवस्थापितम् | ४४ | २ | १० |
| १०९, ११०, १११, | गुणदोषगतगुरुलघुभावमवगत्य स्वाध्यायादिषु सम्यक्प्रवृत्तितोऽतितीव्रा श्रद्धा जायते ततश्च क्रियातिशयतो विशिष्टक्षयोपशमद्वारा मुक्तिसम्पत्तिरिति प्रदर्शितं गाथात्रिकेण | ४५ | १ | १० |
| ११२ | स्वाध्यायाभ्यासादिना मोक्षबीजसम्पत्तौ पारतीर्थिकसंवादाविष्करणम् | ४५ | २ | १३ |
| ११३ | अब्रह्मसेवादिनिवृत्तिरूपाकरणनियमः कुत्र भवति कुत्र च विशिष्टतर इत्युपदर्शितम् | ४६ | २ | १ |

| | | | | |
|---|---|---|---|---|
| ११४ | वीतरागे सर्वथा गर्हणीयप्रवृत्त्यभावस्सहेतुक उपपादितः | ४७ | १ | ३ |
| ११५ | वीतरागस्य योगमात्रजनिते चेष्टारम्भे कदाचित्प्राण्युपमर्दोपहितत्वेऽपि न हिंसागर्हणीयत्वमित्युपदर्शितम् | ४७ | २ | ५ |
| ११६ | योगमात्रेण अप्रमत्तादीनां सयोगिकेवलिपर्यन्तानां चेष्टारम्भे न गर्हणीयत्वं न वा हिंसात्वमित्यस्य स्वकपोलकल्पितत्वनिरासाय कल्पभाष्यस्थानां गाथानां संवादकतयोपदर्शनन्तद्विवरणञ्च | ४७ | २ | १० |
| ११७ | क्षपकश्रेण्यामकरणनियमस्य परिनिष्ठितवचनं नोपशमश्रेण्यामित्युपदर्शनेन अप्रमत्तादीनां सयोगिकेवलिपर्यन्तानां योगमात्रेण हिंसाभावस्याविशेषेऽपि गर्हणीयप्रवृत्तिप्रतिपक्षस्याकरणनियमस्य विशेषोपदर्शनम् | ५० | १ | ९ |
| ११८ | द्रव्यभावाभ्यां हिंसादेर्द्विधा परिणतिर्मोहनीयसत्त्वोदयजा मोहक्षयनिवर्त्त्यैत्यतः क्षीणमोहस्य गर्हितमात्राप्रवृत्तिर्युक्ता न त्वन्यस्येत्याशङ्कायाः प्रतिविधानम् तत्र संवादकतया कल्पभाष्यगाथाः प्रदर्शिताः | ५० | २ | ५ |
| ११९ | क्षीणमोहस्य न किञ्चिदपि गर्हणीयमिति स हेतुकमुपदिष्टम् | ५२ | १ | १० |
| १२० | क्षीणमोहस्य द्रव्यहिंसाया वस्तुतो गर्हणीयत्वं मास्तु लोकगर्हणीयत्वं तु स्यादित्याशङ्कायां शिष्टाशिष्टभेदेन लोकं विकल्प्य शिष्टगर्हणीयत्वन्नास्तीति समाधानम् | ५२ | २ | २ |
| १२१ | शिष्टगर्हणीयत्वं यथा न भवति तथोपपाद्य अशिष्टलोकगर्हणस्याप्रयोजकत्वमाविष्कृतम् | ५२ | २ | ७ |

| | | | | |
|---|---|---|---|---|
| १२२ | के अशिष्टाः किञ्च गर्हन्ति तदुपदर्शितम् | ५३ | १ | १ |
| १२३ | अशिष्टानां गर्हणेन भगवान् दोषलेशेनापि न कलङ्कितो भवतीति सनिदर्शनमुपदिष्टम् | ५३ | १ | ७ |
| १२४ | अशिष्टगर्हणेन जिनमतमन्यथाकर्तुं न शक्यमित्यनाग्रहेणैव वयं वदाम इत्युपदर्शितम् | ५३ | १ | १२ |
| १२५ | क्षीणमोहेऽकरणनियमस्य पूर्णत्वं भावसाधूनाञ्च तदभ्यसनमुपसंहृतम् | ५३ | २ | २ |
| १२६ | दुःषमाकालेऽपि अकरणनियमाभ्यास उपपद्यत इत्युपदर्शितम् | ५३ | २ | ५ |
| १२७ | यतनाया लक्षणमाज्ञाशुद्धायास्तस्या ज्ञानगुणबीजत्वमित्युपदर्शितम् | ५३ | २ | ९ |
| १२८ | यतनाविषयद्रव्यादि छद्मस्थेनापि गीतार्थेन ज्ञातुं सुशकमित्युपपादितम् | ५४ | १ | ५ |
| १२९ | यथैषणीयज्ञानं न दुर्लभं तथा यतनाविषयविज्ञानमपीति दर्शितम् | ५४ | १ | १० |
| १३० | एकान्तेन नास्ति विधिर्नापि निषेध इत्युपदर्शनेन विरुद्धद्रव्यादेरेव यतनया सेव्यमानत्वेन सानुबन्धत्वे निषेधविधिविरोध इति शङ्का निराकृता | ५४ | २ | ३ |
| १३१ | दर्पिककल्पिकप्रतिसेवयोर्लक्षणमुपदिष्टम् | ५४ | २ | ८ |
| १३२ | उत्सर्गापवादयोस्सर्वव्यापकत्वं मैथुनभावन्त्यक्त्वेत्युपपादितम् | ५५ | १ | १३ |
| १३३ | निर्दोषे सूत्रानुज्ञा निषेधसंविद्धेत्युपदर्शनेन मैथुनभावे कथं न सूत्रानुज्ञेत्याशङ्कानिरसनं तत्त्व एव च जिनवचनस्य प्रामाण्यमुत्सर्गापवादयोः परस्परमिश्रणं भाष्यकृद्गाथाभिः संवादितञ्च | ५५ | २ | ४ |
| १३४ | सूत्रानुज्ञानियामकनिर्दोषत्वाभावस्थानोपदर्शनम् | ५६ | २ | ५ |

| | | | | |
|---|---|---|---|---|
| १३५, १३६, १३७, | उत्सर्गापवादयोस्तुल्यसंख्यत्वं संघदासगणिक्षमाश्रमणप्रभृत्याचार्यसम्मतिप्रदर्शनेनोपपादितं गाथात्रयेण | ५६ | २ | १० |
| १३८ | द्रव्यादियुक्तसाधोरशुद्धान्नपानगवेषणादिरूपमनुष्ठानमुत्सर्गस्तदेव द्रव्यादिरहितसाधोरपवाद इत्युपदर्शितम् | ५७ | १ | ७ |
| १३९ | अर्हद्भिर्न किञ्चिदकल्पनीयमनुज्ञातं नापि किञ्चित्प्रतिषिद्धं किन्तु ज्ञानाद्यालम्बने साधुना भवितव्यमित्येवाज्ञप्तमिति दर्शितम् | ५७ | २ | १ |
| १४० | येन रागादिदोषाणां निरोधस्सञ्चितकर्म्मणां विनाशश्च सोऽनुष्ठानविशेषो मोक्षोपाय इति सनिदर्शनमुपदर्शितम् | ५७ | २ | ८ |
| १४१ | एकान्तार्थत्वेनास्थानपतितत्वेन चोत्सर्गापवादभावेन व्यवस्थितेनापि परवचनेन न तुल्यत्वं जिनवचनस्येत्युपपादितम् | ५८ | १ | ५ |
| १४२ | उत्सर्गापवादयोः किं स्थानं किञ्चास्थानमित्याशङ्कापुरस्सरं भाष्यगाथया स्वस्थानपरस्थानविवेचनम् | ५८ | १ | १० |
| १४३ | भात्रैकजीविते बाह्यक्रियाविशेषे विधिनिषेधौ न संभवत इति यतनाभावान्न परवचनमुत्सर्गापवादकमनीयं किन्तु जिनवचनमेवेत्युपदिष्टम् | ५८ | २ | ३ |
| १४४ | उत्सर्गापवादस्वरूपं ज्ञात्वा यथा संयमप्रयोजनं निष्पद्यते तथा यतितव्यमित्युपसंहृतम् | ५८ | २ | १४ |

| | | | | |
|---|---|---|---|---|
| १४५ | प्रमाणमूलैव यतना श्रेयसी न तु विकल्पमात्रकृतेत्युपपादिता | ५९ | १ | ४ |
| १४६ | श्रमणगुणमुक्तास्स्वपक्षेऽपि बहवस्साधवो दृश्यन्ते ते विषवत्परिहर्त्तव्या आज्ञाशुद्धेषु तु साधुषु श्रावकेषु वा प्रतिबन्धो विधेय इत्युपदिष्टम् | ५९ | २ | १ |
| १४७ | श्रमणगुणमुक्तानां मुण्डानां परिहारेऽपि न द्वेषसंभवो नापि माध्यस्थ्यहानिरित्युपदर्श्य कारणेऽपि भावानुपघातेन तत्समीपेऽवस्थातव्यमित्युपदिष्टम् | ५९ | २ | ७ |
| १४८ | अग्रहिलग्रहिलनृपदृष्टान्तेन द्रव्येण वन्दनादिभिः कारणे समुत्पन्नेऽनुवर्त्तनापि श्रमणगुणमुक्तानां मुण्डानां कार्येति प्रतिपादिता | ६० | १ | ६ |
| १४९ | आत्मसंरक्षणार्थमसंविग्नानुवर्त्तनायामपि न संयतस्यासंयतसाम्यमित्युपदर्शितम् | ६० | २ | ११ |
| १५० | पूर्वाचार्यगाथया सद्गुरुलक्षणप्रदर्शनम् | ६१ | १ | २ |
| १५१ | सद्गुरुलक्षणान्तर्गतस्य स्वसमयप्रज्ञापकत्वस्य विशेषतो लक्षणम् | ६१ | १ | ८ |
| १५२, १५३ | सद्गुरुलक्षणरहितस्य गुरुत्वाभिमानिनोऽवगणनं गाथाद्वयेन | ६१ | १ | १५ |
| १५४ | सुगुरुसेवया कथमाज्ञायोगलाभ इत्याशङ्कायाः सुगुरुसेवया शिष्याणां सूत्रार्थविशुद्धिस्सूत्रादप्यर्थस्य प्राबल्यमित्युपदर्शनेन निराकरणम् | ६१ | २ | १ |
| १५५ | व्याख्यानरहितस्य सूत्रस्य मूकत्वं पदार्थादिभेदेनार्थस्य चातुर्विध्यमुपवर्णितम् | ६२ | १ | १ |
| १५६ | अर्थस्य चातुर्विध्यं परेषामपि सम्मतमिति सदृष्टान्तमुपदर्शितम् | ६२ | १ | ८ |

| | | | | |
|---|---|---|---|---|
| १५७ | पदार्थादीनामेव संभूयकार्यकारित्वमिति प्रदर्शितम् | ६२ | २ | ५ |
| १५८ | लोके पदार्थादीनां मिथोऽपेक्षाया व्युत्पादनम् | ६२ | २ | ११ |
| १५९, १६०, १६१, | आगमेऽपि पदार्थादीनां मिथोऽपेक्षेति व्यवस्थापितं सर्वाणि भूतानि न हंतव्यानीति वाक्यमधिकृत्य तिसृभिर्गाथाभिः | ६३ | १ | ३ |
| १६२, १६३, १६४, | ग्रन्थंत्यजेदिति वाक्यमधिकृत्य पदार्थादीनां मिथोऽपेक्षाया व्युत्पादनं तिसृभिर्गाथाभिः | ६३ | २ | ३ |
| १६५, १६६, १६७, | तपोध्यानादि कुर्यादिति वाक्यमधिकृत्य पदार्थादीनां परस्परापेक्षाव्युत्पादनं तिसृभिर्गाथाभिः | ६४ | १ | २ |
| १६८, १६९, १७०, १७१, १७२, | ये तु दानं प्रशंसन्तीत्यादिवाक्यमधिकृत्य विस्तरेण पदार्थादीनां परस्परापेक्षा निष्टंकिता पञ्चभिर्गाथाभिः | ६४ | २ | १ |
| १७३ | वाक्यार्थादिज्ञानस्येहादित्वेन मतिज्ञानत्वमेव न श्रुतज्ञानत्वमित्याशङ्कायास्तस्य बृहत्कल्पभाष्यगाथया श्रुतज्ञानाभ्यन्तरत्वव्यवस्थापनेन निरसनम् | ६५ | २ | ५ |
| १७४ | शब्दोत्तरकालविचारेऽलौकिकमानसप्रत्यक्षत्वनिराकरणपुरस्सरं शाब्दत्वजातिव्यवस्थापनम् | ६५ | २ | १२ |
| १७५ | श्रुतानुसृतश्रोतृमतिप्रपञ्चे चिन्ताभावनात्मकत्वव्यवस्थापनम् | ६६ | १ | ६ |
| १७६ | श्रुतोपयोगस्य दीर्घकालत्वक्षयोपशमविशेषप्रयोज्यैकत्वादिव्यवस्थापनेन ज्ञानस्य क्षणिक- | | | |

| | | | | |
|---|---|---|---|---|
| | त्वात्कथं पदार्थाद्युपयोगस्य दीर्घकालतेति नैयायिकाशङ्कायाः प्रतिक्षेपः | ६६ | १ | १० |
| १७७ | शाब्दे पदार्थादिचतुष्टयक्रमः काल्पनिक एवेत्याशङ्काया निरासः | ६६ | २ | ३ |
| १७८ | पदार्थादिचतुष्प्रकारकव्याख्याजनिततत्त्वज्ञानस्यैव गुर्वायत्तत्वेन शुद्धाज्ञायोगत्वमिष्टप्राप्तिहेतुत्वञ्चेत्युपपादितम् | ६६ | २ | १३ |
| १७९ | अल्पीयस्त्वेऽपि ज्ञानिनामेव प्रमाणीकर्त्तव्यत्वं सदृष्टान्तमुपवर्णितम् | ६७ | १ | ३ |
| १८० | अल्पज्ञानिपरिगृहीतोऽपि धर्म्म एव बहुकार्यकारित्वाद्बहुपरिगृहीत इति दर्शितः | ६७ | २ | १ |
| १८१ | दुष्करे ज्ञानिपरिगृहीतधर्म्मे कथं श्रोतुः प्रवृत्तिरित्याशङ्कानिरसनम् | ६७ | २ | ५ |
| १८२ | ज्ञानिपरिगृहीतो धर्मोऽनधिकारिणां दुष्कर एवेत्युपपादितम् | ६७ | २ | ११ |
| १८३ | बद्धनिकाचितकर्म्मणां प्रत्युपदेशस्य धर्मानुष्ठानाजनकत्वेन नैष्फल्ये जिनोपदेशस्य कथं सर्वसाधारण्यमित्याशङ्काप्रतिविधानम् | ६८ | १ | ३ |
| १८४ | नित्यमप्रमादपरिवृद्धिः शिवलाभहेतुरित्यस्य सदृष्टान्तम्प्रदर्शनम् | ६८ | १ | ९ |
| १८५ | जैनागमेऽप्रमादपुरस्करणस्योपनिषद्भूतत्वं प्रतिबन्धेऽप्यपरित्याज्यत्वमुपदिष्टम् | ६८ | २ | २ |
| १८६ | धर्म्माभ्यासस्य सतताभ्यासविषयाभ्यासभावाभ्यासभेदात्त्रैविध्यमुपदर्शयताम्मतं निश्चयतोऽयुक्तं व्यवहारतश्च युक्तमित्युपदर्शितम् | ६८ | २ | ८ |
| १८७ | त्रिविधधर्म्माभ्यासस्य व्यवहारतो युक्तत्वमित्यत्र हेतूपदर्शनम् | ६९ | १ | ४ |

| | | | | |
|---|---|---|---|---|
| १८८ | त्रिविधधर्म्माभ्यासस्य तथाभव्यत्वं हेतुतयोपदर्शितमनन्तरगाथायां तत्स्वरूपपरिज्ञानार्थमुपदेशपदगताया गाथायाः प्रदर्शनम् सामग्रीवैलक्षण्यादितो विवेचनेन तथाभव्यत्वस्य हेतुत्वव्यवस्थापनञ्च विस्तरतः | ६९ | २ | १ |
| १८९ | तथाभव्यत्वेन कार्यसिद्धावपि संयमयोगव्यापारस्य न नैरर्थक्यमित्युपपादितम् | ७१ | १ | ४ |
| १९० | विचित्रभव्यत्वानुगुणत्वेनान्तरङ्गयत्नस्यैव साध्वपेक्षितत्वन्न तु बहिरङ्गस्येत्येतदध्यात्मध्यानयोगस्य सकलयोगशास्त्रोपनिषद्भूतत्वोट्टंकनेन दृढीकृतम् | ७१ | १ | १० |
| १९१ | अध्यात्मध्यानयोगस्य फलाभिष्टवनम् | ७१ | २ | ३ |
| १९२ | अध्यात्मपरिणतिक्रमादानन्दवृद्धिक्रमे भगवतीसम्मतिप्रदर्शनं तदीयपाठप्रदर्शनञ्च | ७१ | २ | १० |
| १९३ | अध्यात्मध्यानस्य निश्चयतो व्यवहारतश्चोपायप्रदर्शनम् | ७२ | २ | २ |
| १९४ | व्यवहारतोऽध्यात्मध्यानयोगोपायानां कल्याणमित्रयोगादीनां कर्त्तव्यतयोपदेशः | ७२ | २ | ८ |
| १९५ | परोपकारपरपीडापरिहारविषयप्रवृत्तिवैमुख्यभवस्वरूपचिन्तनपरिमाणानां कर्त्तव्यतयोपदेशः | ७२ | २ | १३ |
| १९६ | पूज्यार्चनजीवानिन्दनलोकानुवर्त्तनगुणरागाणां कर्त्तव्यतयोपदेशः | ७३ | १ | ७ |
| १९७ | निर्गुणे माध्यस्थ्यं कुशीलसंसर्गवर्ज्जनं प्रमादपरिहारश्च कर्त्तव्य इत्युपदेशः | ७३ | १ | १२ |
| १९८ | अशुद्धोपयोगपरिणामोन्मूलनपुरस्सरं क्रोधादिकषायत्यागसमुद्भूतस्वभावसमवस्थानलक्षणशुद्ध्या कूटस्थात्मस्वरूपभावनं कर्त्तव्यतयोपदिष्टम् | ७३ | २ | ४ |

| | | | | |
|---|---|---|---|---|
| १९९ | देहगेहधनशयनमित्रपुत्रादयोऽन्या अहमन्य इत्येवं स्वरूपमात्मस्वरूपभावनाकारमुपदिष्टम् | ७३ | २ | ९ |
| २०० | परमपदस्वरूपस्य कर्ममलक्षयपवित्रितस्य चारित्रमर्यादामुपगतस्य ज्ञानदर्शनसमृद्धस्यानादिनिधनस्यात्मस्वरूपस्य नियमेनोपादेयत्वमुपदिष्टम् | ७४ | २ | १३ |
| २०१ | सकलमपि प्रकरणार्थमुपसंजिहीर्षवः परमकारुणिका भगवन्तः श्रीमद्यशोविजयवाचका विविधविषमविषयाशीविषविषविलुप्तजीवनजन्तुजातानां जांगुलीमन्त्रायमाणा अविकलकेवलालोकबलावलोकितलोकालोकपदार्थसार्थपरमपुरुषवीतरागाज्ञागर्भं समासतो यथा यथा रागद्वेषविलयस्तथा तथा प्रवर्तितव्यमित्युपदेशसाररत्नमुपदेशरहस्यरहस्यमुपदिदिशुः | ७४ | १ | ४ |
| २०२ | प्रकरणान्तेऽन्तिममंगलरूपस्वगुरुनाममन्त्रस्मृतिपूर्वकप्रकरणकरणप्रयोजनमभिहितवन्तः | ७४ | १ | ६ |
| २०३ | कपोलकल्पितत्वपरिहृतये युक्तिगर्भपूर्वाचार्यवचनसंदर्भानुसरणावेदनपूर्वकं ग्रन्थग्रन्थनफलप्रयोजनं सूचितम् | ७४ | १ | ७ |


॥ इति न्यायविशारदन्यायाचार्योपाध्यायपदालंकृतश्रीमद्यशोविजयगणिनिर्मितोपदेशरहस्यप्रकरणविषयसूचीपत्रम् ॥

## ॥ अकारादिक्रमेण मूलगाथानुक्रमणिका ॥



| गाथाङ्कः | गाथा. | पत्रम्. | पृष्ठम्. |
|---|---|---|---|
| | अ | | |
| १७१ | अइदंपज्जत्थो पुण | ६५ | १ |
| १९७ | अगुणे मज्झत्थत्तं | ७३ | १ |
| १४८ | अणुवत्तनावि कज्जा | ६० | १ |
| २०३ | अणुसरिय जुत्तिगब्भं | ७३ | २ |
| १३ | अण्णइ विलक्खए किर | ५ | २ |
| १८६ | अण्णे धम्मत्थाणं | ६८ | २ |
| १५६ | अण्णेहि वि पडिवन्नं | ६२ | १ |
| ९० | अप्पयट्टो वि पयट्टो | ३७ | २ |
| १८२ | अपरिणए धम्मंमी | ६७ | २ |
| ३८ | अलमेत्थ पसंगेणं | २० | २ |
| १०१ | अवि य अणायारमुए | ४१ | १ |
| ९८ | अविसंकिज्जया इच्चाइ | ३९ | २ |
| १६१ | अविहिकरणंमि दोसो | ६३ | १ |
| ४९ | अह तं विसिट्ठमेवं | २४ | १ |
| ५३ | अहवाभिमाणमत्तं | २५ | २ |
| ३७ | अह हीणं दव्वत्थयं | २० | १ |
| ७१ | अंतरधारालग्गे | ३२ | १ |
| ८६ | अंधो असायरहिओ | ३६ | २ |
| | आ | | |
| १७० | आगमविहिअणिसिद्धे | ६४ | २ |
| २०० | आयसरूवं णिच्चं | ७३ | २ |
| १६० | आवन्नमकरणिज्जं | ६३ | १ |

| गाथाङ्कः | गाथा. | पत्रम्. | पृष्ठम्. |
|---|---|---|---|
| | **इ** | | |
| ७७ | इय पासइ सज्जक्खो | ३३ | २ |
| ५९ | इह दव्वसुत्तजोगा | २७ | १ |
| | **उ** | | |
| १३६ | उन्नयमवक्ख इयरस्स | ५६ | २ |
| १५० | उभयण्णूवि य किरिया | ६१ | १ |
| १०७ | उववासो वि य एक्को | ४४ | १ |
| | **ए** | | |
| २० | एए खु अणुवओगा | १० | १ |
| २६ | एएसिं दव्वाणा | १३ | १ |
| ७५ | एएहिंतो पावं | ३३ | १ |
| १७ | एगो अप्पाहन्ने | ८ | २ |
| ६४ | एत्तो अ एत्थ णेयं | २९ | १ |
| ११४ | एत्तो अकरणनियमो | ४७ | १ |

| गाथाङ्कः | गाथा. | पत्रम्. | पृष्ठम्. |
|---|---|---|---|
| ५५ | एत्तो उ जोगसुद्धी | २६ | १ |
| १७४ | एत्तो च्चिय उववज्जइ | ६५ | २ |
| ३६ | एत्तो च्चिय पन्नवणी | १९ | २ |
| ११ | एत्तो पन्नवणिज्जा | ५ | १ |
| १५७ | एत्थ पयत्थाईण | ६२ | २ |
| १६४ | एयमगहणं भावा | ६३ | २ |
| १०५ | एयमिह अयाणंता | ४३ | २ |
| १९३ | एयस्स पुण उवाओ | ७२ | २ |
| २९ | एयं च णेयमेवं | १४ | २ |
| १८५ | एयं चिय इह तत्तं | ६८ | २ |
| १९१ | एयंमि परिणमंते | ७१ | २ |
| १२६ | एयंमि वि कालंमी | ५३ | २ |
| १२५ | एवं खीणे मोहे | ५३ | २ |
| ९१ | एवं खु दुस्समाए | ३७ | २ |

| गाथाङ्कः | गाथा. | पत्रम्. | पृष्ठम्. |
|---|---|---|---|
| १८३ | एवं जिणोवएसो | ६८ | १ |
| ४४ | एवं णाऊण सया | २२ | २ |
| ४७ | एवं तुल्लबलत्तं | २३ | २ |
| १७५ | एवंपि सुअं अहिअं | ६६ | १ |
| ६६ | एवमकालपयोगे | ३० | १ |
| १७२ | एवं सम्मन्नाणं | ६६ | २ |
| १७८ | एवं सम्मन्नाणं | ६६ | २ |
| १६७ | एस महावक्कत्थो | ६४ | १ |
| ७८ | एसुवएसो फलवं | ३४ | १ |
| ६३ | एसो आणाजत्ता | २८ | २ |
| १७९ | एसो चेव पमाणी | ६७ | १ |
| १०२ | एसो पवयणसारो | ४२ | २ |
| ४६ | एसो य पुरिसग्गारो | २३ | २ |

| गाथाङ्कः | गाथा. | पत्रम्. | पृष्ठम्. |
|---|---|---|---|
| | क | | |
| १९५ | कज्जो परोवयारो | ७२ | २ |
| १४४ | कयमेत्थ पसंगेणं | ५८ | २ |
| ४२ | कह एस पुरा चत्तो | २१ | २ |
| १३२ | कामं सव्वपदेसुं | ५५ | १ |
| ८ | किरियावि खेयमित्तं | ३ | २ |
| २०१ | किं बहुणा इह जह जह | ७३ | २ |
| ९४ | केइ असग्गहगहिया | ३८ | २ |
| | ग | | |
| ८१ | गुणठाणावावारे | ३५ | १ |
| ८५ | गुणठाणगपरिणामे | ३६ | २ |
| १८ | गंठिगया सइबंधग | ९ | २ |
| ५७ | गंठिम्मि अभिन्नम्मी | २६ | २ |
| ६० | गंठिम्मि विभिन्नंमी | २७ | २ |

| गाथाङ्कः | गाथा. | पत्रम्. | पृष्ठम्. |
|---|---|---|---|
| १६२ | गंथं चएज्ज एत्थवि | ६३ | २ |
| | **च** | | |
| १०३ | चरणकरणप्पहाणा | ४३ | १ |
| ३४ | चेइयवेयावच्चं | १८ | १ |
| | **छ** | | |
| १९८ | छिन्दिउमसुहविगप्पं | ७३ | १ |
| | **ज** | | |
| २७ | जइवि हु आयसभावे | १३ | २ |
| १९० | जत्तो अ अंतरंगो | ७१ | १ |
| ६१ | जमिणं होइ फलंगं | २८ | १ |
| १४५ | जयणा खलु आणाए | ५९ | १ |
| १३५ | जयणावेक्खाइ अओ | ५६ | २ |
| १२९ | जह एसणिज्जनाणे | ५४ | १ |
| ५० | जह कम्मसंतई इह | २४ | १ |

| गाथाङ्कः | गाथा. | पत्रम्. | पृष्ठम्. |
|---|---|---|---|
| १५३ | जह जह बहुस्सुओ सं- | ६१ | २ |
| ४९ | जह तुल्लणिमित्ताणं | २२ | २ |
| १८४ | जह निव्विग्घं सिग्घं | ६८ | १ |
| ६८ | जह वा दहस्स सारय- | ३१ | १ |
| ८८ | जह सम्मसुट्ठिआणं | ३७ | १ |
| १३७ | जावइया उस्सग्गा | ५७ | १ |
| ३३ | जुत्तो य इमो भणिओ | १७ | १ |
| ५६ | जेण विरहिया किरिया | २६ | २ |
| १५२ | जो एअगुणविउत्तो | ६१ | १ |
| १५ | जो सीलवं अ सुअवं | ७ | २ |
| १५१ | जो हेउवायपक्खं- | ६१ | १ |
| १२१ | जं खलु पच्चक्खायं | ५२ | २ |
| ९६ | जं हीणा तुल्लत्तं | ३९ | १ |

| गाथाङ्कः | गाथा. | पत्रम्. | पृष्ठम्. |
|---|---|---|---|
| | ण | | |
| ३० | ण य आरंभाणुमई | १५ | २ |
| १२८ | ण य एअं दुण्णेयं | ५४ | १ |
| ७२ | ण य एयं अण्णेसिं | ३२ | १ |
| १४१ | ण य एवं जिणवयणे | ५८ | १ |
| ७९ | ण य एवं वभियारो | ३४ | १ |
| १२३ | ण य एवं सो देवो | ५३ | १ |
| ११५ | ण य तस्स गरहणिज्जो | ४७ | २ |
| ६७ | ण य तं पि अंतरंगं | ३० | २ |
| १८१ | ण य दुक्करंमि धम्मे | ६७ | २ |
| ३२ | ण य धम्मट्ठा हिंसा | १६ | १ |
| १३९ | ण वि किंचि अणुण्णायं | ५७ | २ |
| १२२ | ण सयंभू स मणूसो | ५३ | १ |
| १२४ | ण हु अत्थि अभिणिवेसो | ५३ | १ |
| ७३ | णाऊण इमं सम्मं | ३२ | २ |
| २५ | णाऊण परिहरंतो | १२ | २ |
| ११० | णाए अण्णायाओ | ४५ | २ |
| ६५ | णिच्छयओ पुण कालो | ३० | १ |
| १३३ | णिद्दोसंमि अणुण्णा | ५५ | २ |
| ९२ | णियमा णत्थि चरित्तं | ३८ | १ |
| १३० | णेगंतेणाणुण्णा | ५४ | २ |
| | त | | |
| १११ | तत्तो पुणो ण बंधइ | ४५ | २ |
| ७६ | तब्बंधठिई जाया | ३३ | २ |
| ५४ | तह्मा आणाजोगो | २६ | १ |
| ५१ | तह्मा उ दोवि हेऊ | २४ | २ |
| १०९ | तम्हा गुरुलहुभावं | ४५ | १ |
| ८२ | तह्मा वयपरिणामे | ३५ | १ |

| गाथाङ्कः | गाथा. | पत्रम्. | पृष्ठम्. |
|---|---|---|---|
| २०२ | तवगणरोहणसुरगिरि | ७३ | २ |
| १६५ | तवज्झाणाइ कुज्जा | ६४ | १ |
| १८८ | तह भव्वत्तं चित्तं | ६९ | २ |
| १८९ | तह वि खलु जयंति जई | ७० | १ |
| ७० | तिमिरहरा जइ दिट्ठी | ३१ | २ |
| १८७ | तिविहंपि भावभेआ | ६९ | १ |
| १६६ | तुच्छावत्ताईणं | ६४ | १ |
| ९ | तेसिं अवंकगामी | ४ | १ |
| | द | | |
| ११८ | दव्वपरिणामचाए | ५० | २ |
| १३८ | दव्वादिएहि जुत्तस्सु | ५७ | १ |
| १६८ | दाणपसंसणिसेहे | ६४ | २ |
| ४८ | दारुसमं खलु दइवं | २३ | २ |
| १४६ | दीसंति बहू मुंडा | ५९ | २ |

| गाथाङ्कः | गाथा. | पत्रम्. | पृष्ठम्. |
|---|---|---|---|
| १७६ | दीहो उवओगद्धा | ६६ | १ |
| ११३ | देसविरइगुणठाणे | ४६ | २ |
| १४० | दोसा जेण निरुज्झं- | ५७ | २ |
| १९९ | देहं गेहं च धणं | ७३ | २ |
| | न | | |
| ९९ | नणु इह विभज्जवाओ | ४० | २ |
| ८० | नणु एवं सुत्तत्थ- | ३४ | २ |
| १७७ | नणु फलिओ वक्कत्थो | ६६ | २ |
| ३ | नणु विप्पडिसिद्धेसुं | १ | २ |
| ११८ | ननु कारणियं भणिअं | ४४ | २ |
| १ | नमिऊण वद्धमाणं | १ | १ |
| ३९ | नो आगमभावाणा | २० | २ |
| | प | | |
| २४ | पच्चक्खाणविहाणं | ११ | २ |

| गाथाङ्कः | गाथा. | पत्रम्. | पृष्ठम्. |
|---|---|---|---|
| ४३ | पडिबंधो वि य एत्थं | २२ | १ |
| ४१ | परपरिणामुम्मग्गे | २१ | २ |
| ५ | परिणामोवि अ णियमा | २ | २ |
| ११७ | परिणिट्ठियवयणमिणं | ५० | १ |
| १२ | पावं विवज्जयंतो | ५ | २ |
| २१ | पाहण्णं वि य इत्थं | १० | २ |
| १९६ | पुज्जा पूएअव्वा | ७३ | १ |
| ८४ | पुट्ठालंबणसेवी | ३६ | १ |
| १५८ | पुरओ चिट्ठइ रुक्खो | ६२ | २ |
| ८३ | पुव्विं दुच्चिन्नाणं | ३५ | १ |
| | ब | | |
| १४३ | बज्झकिरियाविसेसे | ५६ | २ |
| १८० | बहवे जीवंति तओ | ६७ | २ |
| २८ | बीयाहाणं इहइं | १४ | १ |
| | भ | | |
| ४ | भण्णइ आणाबज्झा | ३ | १ |
| १६ | भण्णइ दव्वाराहण- | ८ | १ |
| ११२ | भणिओ अकरणनियमो | ४५ | २ |
| ११६ | भणियं च कप्पभासे | ४७ | २ |
| १९२ | भणियं च भगवईए | ७१ | २ |
| १०४ | भणियं च भगवयावि | ४३ | १ |
| १४७ | भवठिइनिरूवणंमे | ५९ | २ |
| ४० | भावाणा पुण जायइ | २१ | २ |
| | म | | |
| २० | मग्गणुसारी सद्धो | ४ | २ |
| ९५ | मज्झंता अन्नाणा | ३८ | २ |
| ७ | मंडुक्कचुण्णकप्पो | ३ | १ |
| ८९ | मालइगुणजुण्णो महु- | ३७ | २ |

| गाथाङ्कः | गाथा. | पत्रम्. | पृष्ठम्. |
|---|---|---|---|
| १५९ | मूअं केवलसूत्तं | ६२ | १ |
| ८७ | मोणंमि णियं सर्सि | ३७ | २ |
| | **र** | | |
| १३१ | रागद्दोसाणुगया | ५४ | २ |
| १३४ | रागद्दोसाणुगयं | ५६ | २ |
| | **ल** | | |
| २ | लद्धूण माणुसत्तं | १ | २ |
| १९ | लिंगाइ होंति तीसे | ९ | २ |
| ९७ | लोगो हि वज्झदिठ्ठी | ३९ | १ |
| | **व** | | |
| १७३ | वकत्थाइमइच्चिय | | |
| १६९ | वकत्थो पुण एवं | ६४ | २ |
| ६२ | वज्जेयव्वो एसो | २८ | १ |
| १६३ | वत्थाईण अगहणं | ६३ | २ |
| ५२ | ववहारो पुण एत्थ | २५ | १ |
| ७४ | विसयम्मि अपत्तेवि हु | ३२ | २ |
| ५८ | वेहपरिणामरहिए | २६ | २ |
| | **स** | | |
| ३५ | सक्खाउ संजयाणं | १९ | १ |
| ९३ | सज्झायाइणिओगा | ३८ | १ |
| १०० | सदसदविसेसणाओ | ४० | २ |
| ११९ | सव्वे वि अ अइयारा | ५२ | १ |
| १४९ | सा आयरक्खणट्ठं | ६० | २ |
| १२७ | सा पुण बहुतरयास- | ५३ | २ |
| ६९ | साभावियं खलु सुहं | ३१ | २ |
| १२० | सामाइअं चिय जओ | ५२ | २ |
| १५४ | सुत्तत्थाण विसुद्धी | ६१ | २ |
| १४ | सुत्तं अत्थणिबद्धं | ७ | १ |

| गाथाङ्कः | गाथा. | पत्रम्. | पृष्ठम्. | गाथाङ्कः | गाथा. | पत्रम्. | पृष्ठम्. |
|---|---|---|---|---|---|---|---|
| १०६ | सुकुंछाइसु जत्तो | ४३ | २ | १४२ | संथरओ सद्वाणं | ५८ | २ |
| ६ | सुद्धो सुओवओगा | ३ | १ | १९४ | संबंधो कायव्वो | ७२ | २ |
| २३ | सुस्सूसइ अणुरज्जइ | ११ | २ | | ह | | |
| २२ | सो अपुणबंधगो जो | ११ | १ | १५९ | हंतव्वा नो भूआ | ६३ | १ |
| ३१ | सोमिलदाहाणुमई | १६ | १ | | | | |


॥ इति न्यायविशारदन्यायाचार्योपाध्यायपदालंकृतश्रीमद्यशोविजयगणि-
निर्मितोपदेशरहस्यप्रकरणगाथाकाराद्यक्षरानुक्रमणिका ॥

# उपदेशरहस्यम् ॥

ऐँ नमः ॥ ऐङ्कारकलितरूपां स्मृत्वा वाग्देवतां विबुधवन्द्याम् । निजमुपदेशरहस्यं विवृणोमि गभीरमर्थेन ॥१॥ इह हि विपुलपुण्यप्राग्भारलभ्यमवाप्य मनुजत्वं संसेव्य च गुरुकुलवासं परिज्ञाय च प्रवचनानुयोगं सम्यक् स्वपरहितार्थितया मार्गोपदेशाय प्रयतितव्यमित्ययमुपक्रमस्तत्रेयमाद्यगाथा ।

**नमिऊण वद्धमाणं वुच्छं भविआण बोहणट्ठाए । सम्मं गुरूवइट्ठं उवएसरहस्समुक्किट्ठं ॥ १ ॥**

नमिऊणत्ति नत्वा तत्त्वतः स्वाभेदेनांतर्भूतध्यातृध्येयभावेन प्रणिधाय, वर्द्धमानं वर्त्तमानतीर्थाधिपतित्वेनासन्नोपकारिणं गर्भावतारसमयमारभ्यैव प्रवर्द्धमानधनधान्यादिविपुलविभवमनुविभाव्य प्रमुदिताभ्यां मातापितृभ्यां दत्तवर्द्धमानाभिधानं चरमतीर्थकरम्, अनेन निर्विघ्नग्रन्थपरिसमाप्तये शिष्टाचारपरिपालनाय च मङ्गलमुपनिबद्धम्, वक्ष्ये प्रतिपादयिष्यामि, उपदेशस्य हितप्रवृत्त्यनुकूलवाक्यस्य, रहस्यमुपनिषद्भूतमित्युत्तरेण योगः, अनेनाभिधेयमुक्तम् । कीदृशमित्याह । सम्यक् सूत्रोक्तविधिना, गुरुभिरनुयोगवृद्धैः, उपदिष्टमुपदर्शितम्, अनेन गुरुवाचनोपगतसूत्रमूलतया तात्त्विकत्वमस्यावेदितं भवति, गुरुपर्वक्रमलक्षणश्च सम्बन्धः सूचितो भवति, एवं सोऽयं प्रतिपाद्यप्रतिपादकभावसम्बन्धोऽपि सामर्थ्याद्गम्यते । पुनः कीदृशमित्याह । उत्कृष्टमागमैकाधिकारिकत्वेन मुमुक्षूपादेयत्वादितरग्रन्थातिशयितम्, अनेनाधिकारी प्रत्यपादि । किमर्थमित्याह । भव्यानां भगवद्बहुमानिनयासन्नसिद्धिकानां दुःषमाकालदोषवशादनतिसूक्ष्मधियां दुरवबोधविप्रकीर्णतत्त्वप्रवचनार्थानां तत्त्वजिज्ञासूनाम्, बोधनार्थं सङ्कलितकतिपयोपादेयार्थपरिज्ञानार्थम्, अनेन प्रयोजनमुक्तम्, परमप्रयोजनस्य मोक्षस्याविशेषेपि सङ्कलितनयाविधार्थतत्त्वप-

रिच्छेदस्यास्य विशेषप्रयोजनत्वात् ॥ १ ॥ प्रतिज्ञातमेवाह ।



**लद्धूण माणुसत्तं सुदुल्लहं वीयरागपण्णत्ते । धम्मे पयट्टियव्वं निउणेहिं सुत्तणीईए ॥ २ ॥**

लब्ध्वा प्रकृतितनुकषायत्वादिगुणसमाजेनावाप्य, सुदुर्लभमज्ञानप्रमाददोषप्रभवप्रतिपातेन सुदीर्घैकेन्द्रियादिकायस्थित्यवगुण्ठितसंसारचक्रवालपरिभ्रमणान्तरिततया समयप्रसिद्धैश्चोल्लकपाशकादिदृष्टान्तैरतिदुरासादपुनरुत्पत्तिकम्, मनुजत्वं धर्मश्रवणादिसामग्र्युपहितं नरभवम्, वीतरागप्रज्ञप्ते सर्वज्ञभाषिते, धर्मे तपश्चरणाद्यनुष्ठाने, प्रवर्त्तितव्यं यथाशक्त्युद्यमो विधेयो, निपुणैर्धर्मपरीक्षादक्षैः, सूत्रनीत्या सूत्राज्ञानतिक्रमेण, आज्ञाव्याकोप (ष) स्य महापायनिबन्धनत्वात् ॥ २ ॥ अथागमप्रमाणे बलवत्त्वाभिमानिनामेव भवतां सूत्रनीत्यवलम्बनाग्रहः स च न शोभन इत्यभिप्रायवान् परः शङ्कते ।

**नणु विप्पडिसिद्धेसुं वयणेसुं कस्स होइ वीसासो । सो धम्मो कायव्वो जत्थ अहिंसा परमरम्मा ॥३॥**

नन्वित्याक्षेपे, विप्रतिषिद्धेषु सर्वदर्शनिनां परस्परमसम्मतेषु, वचनेषु स्वस्वागमरूपेषु, कस्य नाम मध्यस्थस्य पुंसः, भवतु विश्वासः प्रामाण्यप्रतिपत्तिरूपः, न च विश्वासाविषयीभूतं वचनं प्रवृत्तिमाधातुमुत्सहते, न च स्वपरिग्रहमात्रं विश्वासनिमित्तं भवितुमर्हति अतात्त्विकविश्वासस्यापि ततो माध्यस्थप्रतिबद्धतयानुत्थानात्, अन्यथा जैनवाक्यादिवत्कापिलादिवाक्यादपि प्रामाणिकाः किं न प्रवर्त्तेरन्? कथं तर्ह्यामुष्मिकीप्रवृत्तिरित्यत आह । स धर्मः कर्त्तव्यो यत्राहिंसा जीवदया परमरम्या सूक्ष्माभोगपूर्विका, प्रतिपादिता भवतीति वाक्यशेषः, इत्थं च शुद्धाहिंसादेशकत्वमेव वचनं (ने) विश्वासबीजमिति भावः। युक्तं चैतत्, अन्यैरप्यङ्गीकृतत्वात् । यदाहुः । "श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् । आत्मनः प्रतिकूलानि परेषां न समाचरेत्" इति ॥ ३ ॥ एतत् प्रतिविधातुमाह ।

**भण्णइ आणावज्झा लोगुत्तरणीइओ ण उ अहिंसा । सा णज्जइ सुत्ताओ हेउसरूवाणुबंधेहिं ॥४॥**

भण्यतेऽत्रोत्तरं दीयते, आज्ञाबाह्या सूत्रविषयस्वतन्त्रविश्वासाप्रयोज्यप्रवृत्तिका, अहिंसैव तावल्लोकोत्तरनीतितो न भवति, प्रासुकपुष्पफलशैवलादिभोजिनां विजनारण्यवासिनां बालतपस्विनां स्वच्छन्दागीतार्थानां लोकोत्तरयतीनां च गुरुकुलवासतद्विनयकरणशास्त्राभ्यासादिवर्ज्जितायाः केवलायास्तस्याः लोकमूलत्वेन लौकिकत्वानपायात् । तदाह भगवान् हरिभद्रसूरिः । "धम्मट्ठाणमहिंसा सारो एसोत्ति उज्जमइ एत्तो । सव्वपरिच्चाएणं एगो इह लोगनीईएत्ति[१]"॥ न चेयं संसारसागरनिस्तारतरी लौकिकानुष्ठानस्य संसाराविनाभावित्वात् । कथं तर्हि शुद्धाऽहिंसा ज्ञायते इत्यत्राह । सा शुद्धाऽहिंसा, हेतुस्वरूपानुबन्धैः, सूत्रात्सर्वज्ञवचनात्, ज्ञायते । तथाहि । हेतुतस्तावदयतनाऽपरपर्यायात्प्रमादात्, स्वरूपतश्च प्राणव्यपरोपणतः, अनुबन्धतश्च पापकर्म्मबन्धार्जितदुःखलक्षणात्, इह हिंसा प्रतीयते । तथा च सूत्रम् । "अजयं चरमाणो अ पाणभूयाइं हिंसइ । बंधई पावयं कम्मं तं से होइ कडुअंफलंति[२]"॥ एतद्वैलक्षण्यं चाहिंसायां योजनीयं यतनाया हेतुत्वात्परप्राणाव्यपरोपणस्य स्वरूपत्वादात्यन्तिकसुखलाभस्य चानुबन्धत्वात् । तथा च । शुद्धाहिंसाप्रतीतिविश्वासो वचनविश्वासात्तद्विश्वासश्चाहिंसाधीविश्वासादित्यन्योन्याश्रयान्नाहिंसादेशकत्वं वचनविश्वासे बीजमिति स्वातन्त्र्येणैवागमस्य परलोकविधौ प्रवर्त्तकत्वाद्बलवत्त्वमव्याहतमिति फलितम् । यथोक्तम् । "परलोकविधौ शास्त्रात् प्रायो नान्यदपेक्षते । आसन्नभव्यो मतिमान् श्रद्धाधनसमन्वितः ॥ १ ॥ पापामयौषधं शास्त्रं शास्त्रं पुण्यनिबन्धनम् । चक्षुः सर्वत्रगं शास्त्रं शास्त्रं सर्वार्थसाधनम् ॥२॥" इति । विश्वासबीजं चात्राऽऽप्तोक्तत्वमेव, रागद्वेषमोहानामेवानृतवचनबीजत्वेन

---

१ धर्मस्थानमहिंसा सार एष इति उद्यच्छति इतः । सर्वपरित्यागेनैक इह लोकनीत्येति ॥

२ अयतं चरंश्च प्राणिभूतानि हिनस्ति । बध्नाति पापकं कर्म तत्तस्य भवति कटुकफलमिति ॥

तत्क्षयवतो भगवतो वचस्यनृतत्वशङ्कानुपपत्तेः। तदुवाच वाचकमुख्यः, "रागाद्वा द्वेषाद्वा मोहाद्वा वाक्यमुच्यते ह्यनृतम्। यस्य तु नैते दोषास्तस्यानृतकारणं किं स्यात्"॥ इति। आप्तोक्तत्वं च महाजनपरिग्रहात्संवादिजातीयत्वाद्वा सुग्रहम्, इति विपश्चितमन्यत्र ॥ ४ ॥ ननु किमिह कालविलम्बोचितप्रयासकारिणा सूत्राभ्यासेनाहिंसोपायेनैव पिण्डविशुद्ध्येषणादिना परिणामविशुद्ध्यथ निस्तारोपपत्तेस्तावन्मात्रपरिज्ञानस्य च स्वच्छन्दतयाप्युपपत्तेः किं गुरुकुलवासादिप्रयासेनेत्याशङ्क्याह।

**परिणामोवि अ णियमा आणावज्झो ण सुंदरो भणिओ। तित्थयरेबहुमाणासग्गहदुट्ठोत्ति तंतंमि॥५॥**

आज्ञाबाह्यः स्वेच्छामात्रप्रवृत्तः, परिणामोपि प्रस्तावाज्जीवरक्षणादिविषयशुभान्तःकरणपरिणतिरूपोऽपि, नियमान्निश्चयेन, न सुन्दरः कुशलानुबन्धी, भणितः प्रतिपादितः, तीर्थकरे आज्ञादातरि सर्वज्ञे, बहुः स्वात्मापेक्षया बलीयान् मानो नमनं बहुमानस्तद्विपरीतोऽबहुमानोऽभक्तिपरिणाम इति यावत् ततो योऽसद्ग्रहस्तदाहितविपर्ययवासनारूपस्तेन दुष्टः, इति हेतोः, तन्त्रे भगवत्प्रवचने। न हि यो यद्वचननिरपेक्षः प्रवर्त्तते स तत्र बहुमानवान् भवति। यथा कापिलादिः सुगतशिवादौ। जिनवचननिरपेक्षश्च गुरुकुलवासादिपरित्यागेन शुद्धपिण्डैषणादिकारी स्वच्छन्दसाधुरिति न भवति भगवद्बहुमानी, न च तद्वासनाविरहितः शुभोपि परिणामः परमार्थतः सुन्दरः पङ्काविलजलस्थानीयत्वेन विशुद्ध्यनङ्गत्वात्। यदाहुः, "वचनाराधनया खलु धर्मस्तद्बाधया त्वधर्म इति। इदमत्र धर्मगुह्यं सर्वस्वं चैतदेवास्य॥१॥ अस्मिन् हृदयस्थे सति हृदयस्थस्तद्गुतो मुनीन्द्र इति। हृदयस्थिते च तस्मिन् नियमात्सर्वार्थसंसिद्धिः ॥ २ ॥" इति। अत एव भगवदबहुमानगर्भतया स्वच्छन्दयतिपरिणामः संसारमोचकादिपरिणामवत् प्रत्यपायबहुलतयाऽशुभ एव निर्णीतः। तदाहुः। मलमच्छभवविमोअंगविसि(स?)न्नभोईण जारिसो एसो। मोहा सुहोवि असुहो

तप्फलओ एवमेसो वे(वि)त्ति३" ॥ ५ ॥ नन्वेवं शुद्धः परिणामो विशिष्टश्रुतोपयोगादेवेति माषतुषादीनां तदनुपपत्तिरिति शुद्धपरिणामहेतुमुपदर्शयन्नाह ।

**सुद्धो सुओवओगा मग्गणुसारित्तओ अ केसिंची। जायइ गलिए नियमा मिच्छत्तकए विवज्जासे॥६॥**

शुद्धः परिणामः, श्रुतोपयोगात्प्रवचनज्ञानाद्बहूनाम्, केषाञ्चिच्च माषतुषप्रभृतीनाम्, मार्गानुसारित्वतः, मार्गश्चेतसोऽवक्रगमनं भुजङ्गमनलिकायानतुल्यो विशिष्टगुणस्थानावाप्तिप्रगुणः स्वरसवाही जीवपरिणतिविशेषस्तदनुसरणशीलत्वात्, जायते उत्पद्यते, बहुविशेषावधारणक्षमश्रुतज्ञानादि(दे)व मार्गानुसारित्वाहितशुभौघसंज्ञानादपि रौद्रसंसारदुःखनिस्तारकगुरुकुलवासबहुमानाद्भगवद्बहुमानाद्भगवद्भक्तिवासनोपपत्तेः, दृश्यन्ते हि बहिर्बहुश्रुतमपठन्तोप्यतितीक्ष्णसूक्ष्मप्रज्ञतया बहुपाठकस्थूलप्रज्ञपुरुषानुपलब्धं तत्त्वमुपलभमानाः कतिपये। नन्वेवं गुरुविषययाथार्थ्यज्ञानावरणविगमात्तत्त्वज्ञानोपपत्तावपि माषतुषादीनां शेषतत्त्वविषयविभ्रमसद्भावात् कथमेकान्तशुद्धपरिणामोपपत्तिरित्यत आह। गलिते व्यपगते, नियमान्निश्चयतः, मिथ्यात्वकृते, विपर्यासेऽसद्ग्रहे। तथा च मिथ्यात्वाभावान्न तेषां विपरीतवासनाहितः शेषतत्त्वविषयोपि विभ्रमः, तथा क्रियाव्यत्ययहेतुकषायविशेषाभावाच्च न तथाविधक्रियानुपपत्तिः, निबिडजडिमजनितानाभोगश्च नात्मगुणं दूषयितुमलम्, संशयानध्यवसायापेक्षया विपर्यासदोषस्यैव बलीयस्त्वात्। तदाहुः। "न मिथ्यात्वसमः शत्रुर्न मिथ्यात्वसमं विषम्। न मिथ्यात्वसमो रोगो न मिथ्यात्वसमं तमः॥" इति न किञ्चिद्दुष्टम् ॥ ६ ॥ ननु मार्गानुसारित्वं स्वाभिप्रेतसामाचारीनिष्ठानामेव न त्वन्येषामित्याग्रहमात्रमित्यत आह।

**मंडुक्कचुण्णकप्पो किरिआजणिओ वओ किलेसाणं। तद्दड्ढचुण्णकप्पो नाणकओ तं च आणाए ॥७॥**

---

३ गलमत्स्यभवविमोचकविशीर्ण (विषान्न ?) भोजिनः यादृश एषः। मोहात् शुभोऽप्यशुभः तत्फलत एवमेष वे(षोऽपी)ति ॥

क्रियाजनितो वितथक्रियाभ्यासमात्रोत्पादितः, क्लेशानां दुःखानाम्, व्ययोऽपगमः, तथाविधसामग्रीलाभभाव्युत्पत्तिकत्वेन जीवबीजतया मण्डूकचूर्णकल्पः पुनर्भविष्यत्तथापरिणामभेकातिसूक्ष्मक्षोदतुल्यः। आज्ञाबाह्यानां क्रियामात्रकालभाविभ्यां प्रबलविपर्यासाभ्यां रागद्वेषाभ्यां पापानुबन्धिनः सातवेदनीयादेः कर्मणो बन्धे मिथ्यात्वमोहनीयस्यापि नियमतो बन्धाद्भवान्तरप्राप्तौ तत्पुण्यविपाके समुदीर्णमिथ्यात्वमोहानां हिताहितकृत्येषु मूढतामुपगतानां प्रागुपात्तकर्मस्थितिक्षये निःपारनरकपारावारमज्जनोपपत्तेः। ज्ञानकृतश्च क्लेशानां व्ययस्तद्दग्धचूर्णकल्पः पावकप्लुष्टभेकचूर्णकल्पः, निर्बीजत्वात्, ज्ञानस्य निरनुबन्धाशुभप्रकृत्युपहितपुण्यानुबन्धिपुण्यहेतुक्रियाकारिणः आनुषङ्गिकसुखभोगद्वारा निरवशेषदुःखक्षयहेतुत्वात्। तच्च ज्ञानमाज्ञया गुरुपारतन्त्र्यलक्षणया प्रतीयते, तस्या गुर्वादिविषयाविपर्यासज्ञानकार्यत्वात्। इत्थं च यद्यन्येऽपि मार्गानुसारिणः स्युस्तदा क्रियामात्रे स्वच्छन्दतया नानुरक्ताः स्युः किन्तु ज्ञानार्थितया गुरुपारतन्त्र्यमेवाश्रयेयुरिति फलितम्॥७॥ नन्वेवमाज्ञयैव ज्ञानव्यवस्थितौ कथं परेषां तद्विना मासक्षपणादिविशिष्टक्रिया कथं वा स्वपक्षबद्धोद्धुरादराणामपि प्रेत्यहिताय प्रवर्त्तमानानां प्रशमो दृश्यत इत्याशङ्क्याह।

**किरियावि खेयमित्तं मोहकया हंदि होइ अण्णेसिं। सम्मोहसच्छयाए पसमो परिणामओ मोहो॥८॥**

क्रियापि मासक्षपणादिका, अन्येषामाज्ञाबाह्यानाम्, मोहकृता मृगतृष्णायामुदकभ्रमवतां प्रवृत्तिरिव प्रबलमोहमूलविपर्यासधीजनिता, खेदमात्रं फलानुपहितश्रमरूपैव। परलोकानुपायेऽपि तदर्थितया प्रवर्त्तमानानां बाह्यानां दोषभासं पर्यालोच्य बहुगुणकलितमपि गुरुकुलवासं परित्यजतां स्वच्छन्दयतीनां च मोहपारवश्यानपायात्। तदिदमुक्तम्, "पायं अभिन्नगंठीतमा उ तह दुक्करंपि कुव्वंता। बज्झच्चण(?) ते साहू धंखाहरणेण विण्णेया[४]"॥इति। तथा सम्मोहस्वच्छतया रागद्वेषमोहसन्निपातलक्ष-

---

४ प्रायोऽभिन्नग्रन्थितमास्तु तथा दुष्करमपि कुर्वन्तः। बाह्यत्यागं (?) ते साधवो ध्वांक्षाहरणेन विज्ञेयाः॥

णव्याधेरनुद्रेकावस्थालक्षणया हेतुभूतया, प्रशमो रागद्वेषमन्दतालक्षणः, परिणामत आयतिफलयोग्यतालक्षणात्, मोहोऽधिक-दोषरूपः। यथा हि वातपित्तश्लेष्मसंक्षोभजनितव्याधेर्देहादनुत्तारेपि कुतोऽपि वेलाबलादनुद्रेकावस्थायां मन्दतापि पुनरधिकसं-क्षोभप्रयोजकतया तत्त्वतो दोषरूपैव, तथा निर्बीजत्वं निर्बीजत्वाभिमुख्यं वा विना मोहपरिणत्यवस्थाविशेषकृता रागद्वेषमन्द-तापि दोषरूपैव । तदाहुः । "जो मंदरागदोसो परिणामो सुद्धओ तओ होइ । मोहम्मि य पबलम्मि ण मंदया हंदि एएसिं[५] ॥ सम्मोहसच्छयाए जहाहिओ हंत दुक्खपरिणामो । आणाबज्झसमाओ एयारिसओ उ विन्नेओत्ति[६]" ॥ इत्थं च परेषां क्रियाप्रशमयोर्मोहहेतुकत्वान्न ज्ञानकार्यत्वमिति व्यवस्थितम् ॥ ८ ॥ अथ स्वच्छन्दचारिणां सर्वापि क्रिया कथं भ्रममात्रं गुरु-कुलवासादिपरित्यागक्रियाया भ्रमहेतुकत्वेपि शुद्धाहारग्रहणादिक्रियाया अतथात्वात् त्यक्तक्रियांशे च भगवद्वचनाबहुमाने-पीतरांशे तदयोगादबहुमतांशेपीतरेषामिव दृढतरविपर्यासायोगाच्चेत्याशङ्क्याह ।

**तेसिं अवंकगामी परिणामो णत्थि तेण किरिआए। अन्नाणे बहुपडणं ववहारा णिच्छया णियमा॥९॥**

तेषामाज्ञाबाह्यानाम्, अवक्रगामी स्वरसत ऋजुमार्गाभिमुखः, परिणामः क्षयोपशमविशेषोपनतः, नास्ति। तेन क्रियायाः, व्यवहाराद्व्यवहारनयमाश्रित्य, अज्ञाने बहुपतनं बहुषु स्थलेषूत्सर्गापवादादिपर्यालोचनासम्भवेन विपर्यासोपपत्तेः, स्तोकस्य तु न भवत्यपि व्यवहारतस्तत्र पतनम्, आपाततः श्रुतसंवादात्, निश्चयतो निश्चयनयमाश्रित्य, नियमात्सर्वथैव तत्क्रियाया अज्ञाने पतनम्, आपाततः श्रुतसंवादिन्या अपि तत्क्रियायाः क्षयोपशमविशेषसहकार्यभावेन विशिष्टनिर्जरां प्रत्यप्रत्यलत्वेनाकिञ्चि-

---

५ यो मन्दरागद्वेषः परिणामः शुद्धकस्ततो भवति । मोहे च प्रबले न मदन्ता हन्दि (निश्चये) एतेषाम् ॥

६ सम्मोहस्वच्छतया यथाधिको हन्त दुःखपरिणामः । आज्ञाबाह्यसमायः एतादृशस्तु विज्ञेय इति ॥

त्करत्वात् । इत्थं च, "अपरिच्छिअसुअणिहसस्स केवलमभिन्नसुत्तचारिस्स । सव्वुज्जमेण वि कयं अन्नाणतवे बहुं पडइ⁷" ॥ इत्याद्यागममनुसृत्य तेषु स्तोकज्ञानसम्भावनया न व्यामोहो विधेयो मार्गानुसारित्वाभावे दोषस्य मृदुमध्यादिभावेऽपि मार्गानुसारिफलानुपपत्तेः ॥ ९ ॥ अथ कीदृशोऽवक्रगामी स्यादित्याह ।



**मग्गणुसारी सड्ढो पन्नवणिज्जो कियावरो चेव । गुणरागी जो सक्कं आरभइ अवंकगामी सो ॥ १० ॥**

मार्गानुसारी निसर्गतस्तत्त्वानुकूलप्रवृत्तिरपायहेतुक्लिष्टकर्मविगमादुपशमात्, एष चाभिलषितावाप्तिं प्रत्यवन्ध्यकारणं कान्तारगतप्रतिनियतपुरप्राप्तियोग्यतायुक्तान्धस्येव, न चैवं श्रुतातिशयानुपयोगप्रसङ्गः, विशिष्यतत्त्वप्रतिपत्तौ तदुपयोगात्, योग्यतामात्रस्य च तत्त्वविषयौघसंज्ञानमात्रहेतुत्वात्, दृश्यते हि नीलादिधीयोग्यतामात्रात्तदतिशयाच्च नीलादिविषयकसामान्यविशेषधीविशेष इति द्रष्टव्यम्, तथा श्राद्धस्तत्त्वं प्रति श्रद्धावान् स्वप्रत्यनीकक्लेशह्रासातिशयावाप्तव्यमहानिधानग्रहणविधानोपदेशश्रद्धालुनरवत् विहितानुष्ठानरुचिर्वा, अत एव हेतुद्वयात् प्रज्ञापनीयः कथञ्चिदनाभोगादन्यथाप्रवृत्तौ तथाविधगीतार्थेन सम्बोधयितुं शक्यत्वात्तथाविधकर्मक्षयोपशमादविद्यमानासदभिनिवेशः प्राप्तव्यमहानिधिग्रहणान्यथाप्रवृत्तसुकरसम्बोधननरवत्, तथाऽतएव हेतोः, क्रियापरश्चारित्रमोहनीयकर्मक्षयोपशमजनितमुक्तिसाधनानुष्ठानकरणपरायणः, तथाविधनिधानग्रहणव्यापृतपुरुषवत्, चः समुच्चये, एवोऽवधारणे, तथा गुणरागी विशुद्धाध्यवसायतया स्वगतेषु परगतेषु वा गुणेषु ज्ञानादिषु रागः प्रमोदो यस्यासावसौ मत्सरविरोधिपरिणामवानित्यर्थः, इदं हि गुणलाभानुबन्धेऽवन्ध्यं बीजं प्रतिबन्धकस्य मत्सरस्यापगमात्, तथा यः शक्यं स्वकृतिसाध्यं गुरुबालग्लानादिविषयवैयावृत्त्याद्यनुष्ठानमारभते, न त्वशक्यं अशक्यारम्भस्योत्तरकालमावश्यक-

७ अपरिच्छिन्नश्रुतनिकषस्य (?) केवलमभिन्नसूत्रचारिणः । सर्वोद्यमेनापि कृतं अज्ञानतपसि बहु पतति ॥

परिहाणिशरीरग्लान्यादिजनकत्वेनोत्तरोत्तरशुभानुबन्धानुवृत्त्यनुपपत्तेः, आज्ञाशुद्धं प्रेक्षापूर्वकं स्वशक्त्यानुष्ठानं हि सुवर्णघट-सदृशम्, तद्विपरीतं च मृन्मयघटसदृशं निरनुबन्धत्वात्, इति हि समयविदः शक्यमारभत इत्युक्त्या नाशक्यमारभते, न च शक्ये प्रमाद्यतीत्यपि लभ्यते, सोऽवक्रगामी नान्यः क्रियामात्रपर इति, इत्थं च आज्ञापारतन्त्र्यं विना न शुद्धिरिति व्यवस्थितम् ॥ १० ॥ नन्वेवमेकाकिविहार उत्सीदेदेवेत्यत आह ।

**एत्तोपन्नवणिज्जा असक्कमेगागिचारमिच्छंता । आणाबज्झा णेया सुत्तं गीयत्थविसयं तु ॥ ११ ॥**

इत आज्ञापारतन्त्र्यस्यैव चारित्राङ्गत्वात्, अप्रज्ञापनीया गुरुकुलवासत्यागो नोचित इति दृढनिर्बन्धेनापि गीतार्थैर्बोध-यितुमशक्याः, अशक्यं तथाविधज्ञानाभावेन स्वतन्त्रतयाऽलभ्यचारित्रशुद्धिकम्, एकाकिचारमेकाकिविहारम्, इच्छन्तः प्रार्थय-मानाः, कलहादिहेतुतया नोचितः समुदायवास इति विपर्यस्तधीदुष्टान्तःकरणत्वात्, आज्ञाबाह्या ज्ञेयाः, "अप्पागमो किलिस्सइ जइवि करेइ अइदुक्करं च तवं । सुंदरबुद्धीइ कयं बहुअं पि ण सुंदरं होइ[८] ॥" इत्यादिवचनात्सुन्दरपरिणामस्यापि तेषां तत्त्वतो दुष्टत्वात् । नन्वेवं "न यालभिज्जा णिउणं सहायं गुणाहिअं वा गुणओ समं वा । इक्कोवि पावाइं विवज्जयंतो विहरेज्ज कामेसु असज्जमाणो[९]" ॥ इति सूत्रोक्तैकाकिविहारविरोध इत्यत आह । सूत्रं तूपदर्शितं गीतार्थविषयं तस्य पुष्टालम्बनं विना एकाकि-विहारानभ्यनुज्ञानात् ॥ ११ ॥ कथं गीतार्थविषयत्वमुक्तं सूत्रस्येति समर्थयति ॥

---

८ अल्पागमः क्लिश्यति यद्यपि करोत्यतिदुष्करं च तपः । सुन्दरबुद्ध्या कृतं बहुकमपि न सुन्दरं भवति ॥

९ न चालम्भयेत् निपुणं सहायं गुणाधिकं वा गुणतः समं वा । एकोपि पापानि विवर्जयन् सन् विहरेत् कामेष्वसज्जमानः ॥

पावं विवज्जयंतो कामेसु तहा असज्जमाणो य। णागीयो अन्नाणी किं काहीच्चाइवयणाओ ॥१२॥

उक्तसूत्रे हि पापवर्जनं कामासङ्गश्चापवादिकैकाकिविहारेऽधिकारिविशेषणतयोक्तौ, न चागीतो भीमो भीमसेन इति न्यायादगीतार्थः पापं वर्जयन् तथा कामेष्वसज्जमानो भवति। कुत इत्याह। "अन्नाणी किं काही" इत्यादिवचनात्। उक्तं हि सूत्रे। "पढमं नाणं तओ दया एवं चिट्ठइ सव्वसंजओ। अन्नाणी किं काही किं वा नाही छेयपावगं१०" ॥ इति ग्रन्थेनागीतार्थस्य पापापरिज्ञानम्, न च तत्परिज्ञानविरहे तस्य तद्वर्जनं सम्भवति, न च तदभावे कामानासङ्गोपि, तस्य तत्त्वतो ज्ञाननिर्वर्त्तनीयत्वात्, अतो विशेषणान्यथानुपपत्त्यैवास्य विशेषविषयत्वमावश्यकम् ॥ १२ ॥ विपक्षे दोषमाह।

अण्णह विरुज्झए किर गीअण्णविहारवज्जणप्पमुहं। गीअम्मिवि उचियमिणं तयण्णलाभंतरायम्मि॥१३

अन्यथोक्तसूत्रस्य गीतार्थाविषयकत्वे, विरुद्ध्यतेऽसङ्गतार्थं भवति, किल, गीतान्यविहारो गीतार्थानिश्रिताऽगीतार्थविहारस्तद्वर्जनप्रमुखम्, तथाहि, "गीयत्थो य विहारो बीयो गीयत्थमीसितो भणिओ। इत्तो तइअविहारो नाणुन्नाओ जिणवरेहिं११" ॥ इत्यादिना गीतार्थतन्निश्रातिरिक्तविहारो निषिद्धः, तथा "एगाणियस्स दोसा इत्थी साणे तहेव पडिणीए। भिक्खुविसोहि महव्वय तम्हा सबिइज्जए गमणं१२" ॥ इत्यादिना एकाकिनः सतो भिक्षाटने स्त्रीकृतसंक्षोभे इच्छानिच्छाकृताविशु-

१० प्रथमं ज्ञानं ततो दया एवं तिष्ठति सर्वसंयतः। अज्ञानी किं करिष्यति किंवा ज्ञास्यति छेदपापकम् ॥
११ गीतार्थश्च विहारो द्वितीयो गीतार्थमिश्रितो भणितः। इतस्तृतीयविहारो नानुज्ञातो जिनवरैः ॥
१२ एकाकिनो दोषाः, स्त्री श्वा तथैव प्रत्यनीकः। भिक्षुविशुद्धिर्महाव्रतानि, तस्मात्सद्वितीयके गमनम् ॥

द्धिः, सहायाभावाशङ्कितत्वादिपराभवः, एकाकितापर्यालोचनकृतप्रत्यनीकाभिभवः, युगपद् गृहत्रयस्य भिक्षाग्रहणे एककस्योपयोगकरणेऽशक्तत्वात्तदशुद्धिः, तत एव च प्राणातिपातविराधना, निमित्तप्रश्ने च निःशङ्कतया तद्भणने मृषावादः, विप्रकीर्णद्रव्यदर्शने जिघृक्षादिभावाददत्तादानम्, स्त्रीमुखनिरीक्षणादौ मैथुनम्, तत्र स्नेहात्परिग्रहः,इति दोषकदम्बकम्, यतस्तस्मात्सद्वितीयस्यैव गमनमनुज्ञातम्, बहुकालभाविनि विहारे चैतद्विशेषत एव युज्यते। किञ्च। "सुअं मे आउस्संतेणं भगवया एवमक्खायं१३" ॥ इत्याचारप्रथमसूत्रेपि श्रुतं मया वसता गुरुकुले भगवतैवमाख्यातमित्यर्थात्सर्वसमाचारस्यादौ निरूपितत्वेन गुरुकुलवासस्यैव प्रकृष्टाज्ञारूपत्वं निश्चीयते। यदाह। "एसा य परा आणा, पयडा जं गुरुकुलं न मोत्तव्वं। आयारपढमसुत्ते, एत्तो च्चिय दंसिअं एयं१४"॥ इत्थं चाज्ञारुचित्वस्य गुरुकुलवासव्याप्यत्वं प्रतीयते, तदुभयपरिणामयोर्हेतुहेतुमद्भावात्, अत एव गुरुकुलवासाभावे आज्ञारुचित्वस्याप्यभावः। तदाह। "एयम्मि परिच्चत्ते, आणा खलु भगवओ परिच्चत्ता। तीए अ परिच्चागे, दोह्नवि लोगाण चाउत्ति१५" ॥ "ता न चरणपरिणामे एयं असमंजसं इहं होइ। आसण्णसिद्धिआणं जीवाणं तहा य भणिअमिणं१६" ॥ "नाणस्स होइ भागी थिरयरओ दंसणे चरित्ते य। धन्ना आवकहाए गुरुकुलवासं ण मुचंतित्ति१७" ॥ न चैवं गुरुकुलवास-

१३ श्रुतं मया, आयुष्मता भगवतैवमाख्यातम् ॥

१४ एषा च परा आज्ञा, प्रकटा यद् गुरुकुलं न मोक्तव्यम्। आचाराप्रथमसूत्रे, इत एव दर्शितमेतत् ॥

१५ एतस्मिन् परित्यक्ते, आज्ञा खलु भगवतः परित्यक्ता। तस्याश्च परित्यागे, द्वयोरपि लोकयोस्त्याग इति ॥

१६ तस्मान्न चरणपरिणामे एतदसमञ्जसमिह भवति। आसन्नसिद्धिकानां जीवानां तथा च भणितममिदम् ॥

१७ ज्ञानस्य भवति भागी, स्थिरतरको दर्शने चारित्रे च। धन्या यावत्कथं गुरुकुलवासं न मुञ्चन्ति इति ।

त्यागिनां स्वस्मिन्नाज्ञारुचित्वस्वसंवेदनानुपपत्तिः, स्वाज्ञारुचौ भगवदाज्ञारुचित्वभ्रमात्तदुपपत्तेः । अपि च कुलवध्वादिज्ञातैरपि तत्र तत्र प्रवचने गुरुकुलवासात्याम एव दृढीक्रियते । तत्र निवसतामेव बाह्यानुष्ठानाभावेपि सदुपदेशश्रवणादिजनितसंवेगस्य क्षमादिगुणप्रकर्षस्य सुविहितसहायतया ब्रह्मचर्यगुप्तिविशुद्धेर्गुरुवैयावृत्त्यादिजनितमहानिर्जरालाभस्य च सम्भवात् । अपि चाजातकल्पवतामगीतार्थानां जातकल्पवतां गीतार्थानामपि ऋतुबद्धकाले पञ्चभ्यो वर्षासु च ग्लानत्वादिसम्भवात्सप्तभ्यो न्यूनतयाऽसमाप्तानामुत्सर्गतस्तत्क्षेत्रगतशिष्यभक्तपानवस्त्रपात्रादिविषयागमप्रसिद्धाभाव्यनिषेध उक्तः । तदाह । "जाओ अ अजाओ अ, दुविहो कप्पो अ होइ विण्णेओ । इक्किको पुण दुविहो, समत्तकप्पो अ असमत्तो१८" ॥ "गीयत्थ जायकप्पो, अग्गीओ खलु भवे अजाओ अ । पणगसमत्तकप्पो तदूणगो होइ असमत्तो१९" ॥ उउबद्धे, वासासु य सत्तसमत्तो तदूणगो इयरो । असमत्ताजायाणं ओहेण होइ आहव्वंति (होइ आहव्वंति)२०" ॥ न चैतत्सर्वमुक्तसूत्रेणागीतार्थविहारानुज्ञाने सङ्गच्छत इति । गीतेपि गीतार्थेप्युचितमिदमुक्तसूत्रम्, तदन्यस्य गीतार्थान्यस्य स्वाधीनगुणवतः, लाभः प्राप्तिः, तदन्तराये तद्विघ्ने, अन्यथा ससहायताया एव युक्तत्वात्, यतोऽभिधीयते । "कालम्मि संकिलिट्ठे छकायदयावरोवि संविग्गो । जयजोगीणमलंभे पणगन्नयरेण संवसइ२१" ॥ पार्श्वस्थावसन्नकुशीलसंसक्तयथाच्छन्दाभिधानां पञ्चानां साधूनामेकतरेण सह वसतीत्यर्थः । इत्थं च यतयोग्य-

---

१८ जातश्चाजातश्च द्विविधः कल्पश्च भवति विज्ञेयः । एकैकः पुनर्द्विविधः समाप्तकल्पश्चासमाप्तकल्पश्च ॥

१९ गीतार्थो जातकल्पः, अगीतार्थः खलु भवेद् अजातश्च । पञ्चकसमाप्तकल्पः, तदूनको भवत्यसमाप्तः ॥

२० ऋतुबद्धे, वर्षासु च सप्तसमाप्तः तदूनक इतरः । असमाप्ताजातानां ओघेन भवति आहत्य (भवति आहत्यम्) इति ॥

२१ काले संक्लिष्टे षट्कायदयापरोऽपि संविग्नः । यतयोगिनामलाभे पञ्चकान्यतरेण संवसति ॥

मार्गेर्निमित्तत्वमपि कदाचिदपोद्यत इति । नातिशयितदुःसङ्गरागादिकारणं विना गीतार्थस्याप्येकाकिनो विहारोऽनुज्ञातः, तथाविधकारणे तु गीतार्थ एकाक्यपि विहरेत्, अगीतार्थस्तु न सर्वथेति सिद्धम्॥ १३॥ ननु स्फुटार्थं सूत्रं किमित्येवं युक्त्या व्याकुलीक्रियत इत्यत आह ।

**सुत्तं अत्थणिबद्धं छायाछायावओ जह णिबद्धा । तेणं केवलसुत्ते अणुरत्तो होइ पडिणीओ ॥१४॥**

सूत्रम्, अर्थस्य निर्युक्तिभाष्यादिव्याख्यानस्य, निबद्धं परतन्त्रम्, यथा, छाया, छायावतः पुरुषस्य, निबद्धा परतन्त्रा, छायागमनागमनयोर्नियमतः स्वाश्रयगमनागमनानुविधायित्वात्, एवं हि सूत्रमप्यर्थपर्यालोचनमाप्यतातत्पर्य एव प्रमाणं नान्यथाऽतिप्रसंगादिना प्रमाणस्य निश्चेतुमशक्यत्वात्, इति भवत्यर्थप्रामाण्याधीनप्रामाण्यकत्वात्सूत्रमर्थनिबद्धम् । तदुक्तं बृहत्कल्पभाष्ये । "छाया जहा छायवतो णिबद्धा संपट्ठिए जाति ठिते य ठाति । अत्थो तहा गच्छति पज्जवेसु सुत्तंपि अत्थाणुचरं तहेव[२२] ॥ विही व सुत्ते तहिं वारणा वा उभयं च इत्थं ति विकोवणट्ठा । उस्सग्गउ णेव सुअं पमाणं न वाऽपमाणं कुसला वयंति[२३] ॥ अंधो अ पंगुं वहए स चावि कहेइ दोण्हंपि हिताय पंथमिति[२४]" ॥ अपि च यथाश्रुतस्यैव सूत्रस्य प्रामाण्येऽनुयोगप्रक्रमावैयर्थ्यप्रसङ्गः । तदाहुः । "जं जह सुत्ते भणियं तहेव जइ तव्विआलणा णत्थि । किं कालिआणुओगो दिट्ठो

---

२२ छाया यथा छायावतो निबद्धा संप्रस्थिते याति स्थिते च तिष्ठति । अर्थस्तथा गच्छति पर्यायेषु सूत्रमपि अर्थानुचरं तथैव ॥

२३ विधिर्वा सूत्रे तत्र वारणा वा । उभयं च इत्थं त्रयो विकल्पनार्थाः । उत्सर्गतो नैव श्रुतं प्रमाणं न वाऽप्रमाणं कुशला वदन्ति ॥

२४ अन्धश्च पङ्गुं वहते स चापि कथयति द्वावपि हिताय पन्थानमिति ॥

दिट्ठिप्पहाणेहिंति२५" ॥ इत्थमनभ्युपगच्छतामपायमुपदर्शयति । तेन सूत्रस्यार्थनिबद्धत्वेन, केवलसूत्रे, अनुरक्तः, सूत्रमेवैकं नः प्रमाणं नान्यदिति भूतायत्त इव प्रकुर्वन्, भवति, प्रत्यनीकः, अर्थप्रामाण्यमनभ्युपगच्छतोपि श्रुतं प्रति प्रत्यनीकताभिधानात् । तथा च व्याख्याप्रज्ञप्तिसूत्रम् । "सुअं पडुच्च कइ पडिणीआ पण्णत्ता । गोयमा, तओ पडिणीआ पण्णत्ता, तं सुत्तपडिणीए अत्थपडिणीए तदुभयपडिणीएत्ति२६" ॥ यथाश्रुतार्थविपर्ययाभ्युपगममात्रादेवार्थप्रत्यनीकत्वमिति पामरः, तन्न, "सुत्तत्थो खलु पढमो" इत्याद्युक्तक्रमवतोऽर्थस्य क्वाप्यंशेऽप्रामाण्याभ्युपगमे प्रत्यनीकतानपायादिति । तथा चार्थप्रत्यनीकताया निबिडज्ञानावरणकर्मबन्धहेतुत्वात्तामुत्सृज्योपदर्शितसूत्रार्थे न शङ्का विधेया ॥ १४ ॥ नन्वेवं स्वाधीनविहारिणश्चारित्रनिषेधे भगवदुक्तविरोधः, इति शङ्कते ।

**जो सीलवं असुअवं सो देसाराहगो कहं एवं । जन्नाणेऽनुट्ठाणं पुण्णं इहरा य णो देसो ॥ १५ ॥**

यः, शीलवाननुष्ठानानुष्ठानसम्पन्नः, तथाऽश्रुतवान् भावतोऽनधिगतश्रुतज्ञानः, स देशाराधकश्चारित्ररूपदेशपालनपरः । कथमेवमपरतन्त्रस्य चारित्रनिषेधे युज्यते । यद् यस्मात्कारणाद् ज्ञाने सत्यनुष्ठानं पूर्णं रत्नत्रयसमुदायास्कन्दितमेव सम्भवति, अल्पश्रुतानामपि माषतुषादीनां गुरुपारतन्त्र्येण रत्नत्रयसाम्राज्योपपत्तेः, बहुश्रुतापेक्षयाऽल्पश्रुतानुष्ठानस्य देशत्वे चाकेवलिनः, देशाराधकत्वाविश्रामप्रसङ्गात्, न चात्र निश्चयनयसूक्ष्मेक्षिकास्ति, येन सर्वसंवर एव तद्विश्रामोपपत्ताविष्टापत्तिः कर्तुं शक्या,

२५ यद् यथा सूत्रे भणितं तथैव यदि तद्विचारणा नास्ति । किं कालिकानुयोगो दृष्टो दृष्टिप्रधानैरिति ॥

२६ श्रुतं प्रतीत्य कति प्रत्यनीकाः प्रज्ञप्ताः । गौतम, त्रयः प्रत्यनीकाः प्रज्ञप्ताः । तद्यथा । सूत्रप्रत्यनीकः, अर्थप्रत्यनीकः, तदुभयप्रत्यनीक इति ॥

तदानीं श्रुतशीलसन्निपातायोगात्, इतरथा च ज्ञानाभावे च, नो देशस्तदनुष्ठानं युज्यते, यत्रैव हि विशकलिते यत्समुदाय-घटकरूपं प्रतीयते तत्रैव तद्देशत्वं नान्यत्र, यथा विशकलितगुडादौ मदिराद्यवयवगतस्वादविशेषवत्तया प्रतीयमाने मदिरा-दिदेशत्वं नान्यत्र यथा सिकतादौ, न च प्रकृते रत्नसमुदायघटकचारित्ररूपं पारतन्त्र्यलक्षणमपरतन्त्रशीले सम्भवतीति कथं तत्र देशत्वम्। "इत्थं च तत्थ णं जे से पढमे पुरिसजाए से णं पुरिसे सीलवं असुअवं उवरए अविण्णातधम्मे एस णं गोयमा मए पुरिसे देसाराहए पण्णत्ते[27]"॥ इति भागवतवचनादपरतन्त्रस्याप्यनन्यगत्या चारित्रमुपेयमिति भावः॥ १५॥ समाधत्ते।

**भन्नइ दव्वाराहणमेयं सुत्तं पडुच्च दट्ठव्वं। सो पुण दव्वपयत्थो दुविहो इह सुत्तणिद्दिट्ठे॥ १६॥**

भण्यतेऽत्रोत्तरं दीयते। एतच्छीलवतो अश्रुतवतो देशाराधकत्वप्रतिपादकं व्याख्याप्रज्ञप्तिसूत्रम्, द्रव्याराधनां बाह्यतप-श्चरणाद्यनुष्ठानपालनाम्, प्रतीत्याश्रित्य, द्रष्टव्यं निर्णेयम्, समुदयनिष्पन्नस्य पारतन्त्र्यरूपस्योभयासाधारण्येपि बाह्यक्रिया-त्वस्योभयसाधारणत्वेन देशत्वानपायात्, न खलु गुडादावपि समुदयनिष्पन्नद्रवत्वविशेषादिरूपाभावेप्युभयदशासाधारणविवे-च्याविवेच्यभाववर्जितस्वादविशेषभावमात्रान्मदिरादिदेशत्वं व्याहन्यते। यदि च समुदायपृथग्भूते देशव्यवहारो नास्त्येवेत्य-भिमानस्तदास्तु त्रिषु मध्ये द्रव्यत एकपालनं पारिभाषिकमेव देशाराधकत्वम्, न चैवं श्रुतमात्रसम्पन्नेपि देशाराधकत्वप्रसङ्गः, तत्र प्राप्तदेशापालनतदप्राप्तान्यतररूपदेशविराधकत्वस्यैव परिभाषणात्, स्वतन्त्रपरिभाषाया अपर्यनुयोज्यत्वात्, तदाह भगव-

---

२७ इत्थं च तत्र यः स प्रथमः पुरुषजातः स पुरुषः शीलवान् अश्रुतवान् उपरतः अविज्ञातधर्म एष गौतम! मया पुरुषः देशाराधकः प्रज्ञप्तः॥

तीष्टमिकारः । "देसविराहएत्ति" । देशं स्तोकमंशं ज्ञानदर्शनचारित्ररूपस्य मोक्षमार्गस्य तृतीयभागरूपं चारित्रं विराधयतीत्यर्थः प्राप्तस्य तस्यापालनादप्राप्तेर्वेति । न चैवं श्रुतवतो द्रव्यचारित्रप्राप्तौ सर्वाराधकत्वप्रसङ्गः, तद्वतो भावचारित्रस्यैव प्राप्तेः, श्रुतशब्देन तात्त्विकज्ञानदर्शनयोरेव ग्रहणात् । इदमपि व्यवहारनयमतेन, एतन्नये भग्नचारित्रस्यापि कस्यचित्पश्चात्तापादिलिङ्गकश्रुतपरिणामाभङ्गाभ्युपगमात् । निश्चयनयमते तु चरणभङ्गे श्रुतभङ्गोऽप्यावश्यकः, श्रुतफलस्य विरमणादेरभावे श्रुतस्य सत्त्वेऽप्यसत्कल्पत्वात् । तदिदमुक्तमागमे । "णिच्छयणयस्स चरणस्सुवघाए नाणदंसणवहोवि । ववहारस्स उ चरणे हयम्मि भयणा उ सेसाणंति२८" ॥ भजनां पुनरत्रेत्थं विवेचयन्ति वृद्धाः । "एवं च अभिणिवेसा चरणविघाएन नाणमाइआ तप्पडिसिद्धा सेवणमोहा सद्दहणभावेहिं अणभिणिवेसाओ पुण विवज्जया होंति तव्विघाए वि तक्कज्जुवलंभाओ पच्छायावाइभावेणं२९ ॥ इति । न चात्र प्रस्तावादुभयोरेकरूपेणैव ग्रहणं युक्तम् । अर्थापत्त्या द्रव्यशीलस्यैव ग्रहणौचित्यादिति दिक् । द्रव्यपदार्थं विवेचयितुमाह । स द्रव्याराधनाघटकः, पुनः, द्रव्यपदार्थः, द्विविधो द्विप्रकारः, इह जगति, सूत्रनीत्या, ज्ञातव्यः ॥१६॥ द्वैविध्यमेव दर्शयति ॥

**एगो अप्पाहन्ने अण्णो पुण होइ भावजोग्गत्ते । पढमो गंठिगयाणं बितिओ पुण बंधगाईणं ॥१७॥**

---

२८ निश्चयनयस्य चरणस्योपघाते ज्ञानदर्शनवधोऽपि । व्यवहारस्य तु चरणे हते भजना तु शेषाणाम् इति ॥

२९ एवं चाभिनिवेशात् चरणविघातेन ज्ञानादयः तत्प्रतिषिद्धाः सेवनामोहात् श्रद्धानभावैः अनभिनिवेशात्पुनर्विवर्ज्यका भवन्ति तद्विघातेऽपि तत्कार्योपलम्भात्पश्चात्तापादिभावेन ॥

एको द्रव्यपदार्थः, अप्राधान्ये मुख्यपदार्थाभावलक्षणे, वर्त्तते, अप्राधान्यमात्रस्यापेक्षिकत्वेनाव्यवस्थितत्वात्, यथा आचार्यलक्षणाभाववत्तयाङ्गारमर्दको द्रव्याचार्य इति व्यपदिश्यते। तदाह, "अप्पाहन्ने वि इहं कत्थइ दिट्ठो उ दव्वसद्दोत्ति। अंगारमद्दगो जह दव्वायरिओ सयाभव्वोत्ति३०" ॥ अन्यः पुनर्भवति, भावयोग्यत्वे फलजननयोग्यत्वे, यथा मृत्पिण्डो घटजननयोग्यः सन् द्रव्यघट इति व्यपदिश्यते, सुश्रावकश्च साधुगुणप्रतिपत्तियोग्यो द्रव्यसाधुरिति, साधुश्च देवभावप्रतिपत्तियोग्यो द्रव्यदेव इति। तदाह, "मिउपिंडो दव्वघडो सुसावगो तह य दव्वसाहुत्ति। साहू अ दव्वदेवो एमाइ सुए जओ भणिअं३१" ॥ इति। एतच्च योग्यत्वमेकभविकबद्धायुष्काभिमुखनामगोत्रलक्षणं नयभेदतो विचित्रं द्रष्टव्यम्। तथाहि, नैगमसंग्रहव्यवहारा एव त्रिविधं योग्यत्वमिच्छन्ति, स्थूलदृष्टित्वात्, दृश्यते हि स्थूलदृशां कारणे कार्योपचारं कृत्वा इत्थं व्यपदेशप्रवृत्तिः, यथा राज्यार्हकुमारे राजशब्दस्य, घृतप्रक्षेपयोग्ये च घटे घृतघटशब्दस्येति। ऋजुसूत्रस्तु द्विविधमेवेच्छति बद्धायुष्कमभिमुखनामगोत्रं च, पूर्वनयेभ्यो विशुद्धत्वादाद्यस्यातिव्यवहितत्वेनातिप्रसक्तत्वात्। शब्दादयस्तु त्रयो विशुद्धतरत्वाद् द्वितीयमप्यतिव्यवहितं न मन्यन्ते, अतिप्रसङ्गभयादेकमेव चरमभेदमिच्छन्तीति। तदिदमुक्तमुपदेशपदे, "अन्नो पुण जोगत्ते चित्ते णयभेदओ मुणेअव्वोत्ति३२" ॥ द्वयोर्द्रव्यविराधनयोः स्वामिविभागमुपदर्शयति। प्रथमोऽप्राधान्यवृत्तिः द्रव्यपदार्थः, ग्रन्थिरिव ग्रन्थिर्घनरागद्वेषपरिणामः, तदाह भाष्यकारः, "गंठित्ति सुदुब्भेओ कक्खडघणरूढगूढगंठिव्व। जीवस्स कम्मजणिओ घणरागदोसपरि-

---

३० अप्राधान्येऽपीह कुत्रचिद्दृष्टस्तु द्रव्यशब्द इति। अङ्गारमर्दको यथा द्रव्याचार्यः सदाऽभव्य इति ॥

३१ मृत्पिण्डो द्रव्यघटः सुश्रावकस्तथा च द्रव्यसाधुरिति। साधुश्च द्रव्यदेव एवमादि श्रुते यतो भणितम् ॥

३२ अन्यः पुनर्योग्यत्वे चित्रे नयभेदतो ज्ञातव्य इति ॥

णामोत्ति३३"॥ तं गताः तं प्राप्तास्तेषाम्, अतिव्यवहितकालवर्त्तित्वेन तेषां भावाराधनजननोचितपर्यायरूपयोग्यताया अभावात्, द्वितीयो योग्यत्ववृत्तिर्द्रव्यपदार्थः, पुनरपुनर्बन्धकादीनाम्, तेषामासन्नसिद्धिकत्वेन भावाज्ञाजननपरिणतिरूपयोग्यताया अव्याहतत्वात् ॥ १७ ॥ अथ के ते ग्रन्थिगताः कथं च तेषां द्रव्याराधनसम्भव इत्याह ।



**गंठिगया सइबंधग मग्गाभिमुहा य मग्गपडिआ य। तह अभविआ य तेसिं पूआदत्थेण दव्वाणा॥१८॥**

ग्रंथिगताश्चात्रेमेऽधिकृताः, अपुनर्बन्धकस्य पृथक्निर्दिष्टत्वेन गोबलीवर्दन्यायेन तदतिरिक्तत्वलाभात्, सकृद्बन्धका ये नाम यथाप्रवृत्तकरणेन ग्रन्थिप्रदेशमागता अप्यभिन्नग्रन्थयः सकृदेवोत्कृष्टां सागरोपमकोटाकोटीसप्ततिलक्षणां स्थितिं भ्रन्स्यन्ति, मार्गाभिमुखाश्च क्षयोपशमविशेषमार्गरूपनगरनिकटस्थाः, मार्गपतिताश्चाव्यवधानतो बहिर्भूताः,तथेति समुच्चये, चः पुनरर्थे,अभव्याः कदापि मुक्तिगमनायोग्याः, तेषां पूजाद्यर्थं तीर्थङ्करादिपूजादर्शनात्तत्प्राप्त्याद्यर्थम्, द्रव्याज्ञा द्रव्यचारित्रग्रहणरूपा, भवति। तथा चोक्तं परमपूज्यैः। "तित्थंकराइपूअं दट्ठूणण्णेण वावि कज्जेण। सुअसामाइअलाभो होज्ज अभव्वस्स गंठिम्मित्ति३४"॥१८॥ द्रव्याज्ञाया लिङ्गान्याह ।

**लिंगाइं होंति तीसे ण तदत्थालोअणं न गुणरागो। नापत्तपुव्वहरिसो विहिभंगे णो भवभयं च॥१९॥**

लिङ्गानि व्याप्यानि, भवन्ति, तस्या द्रव्याज्ञायाः, न तदर्थालोचनम् आज्ञाविधायकसामायिकादिसूत्रार्थपर्यालो-

३३ ग्रन्थिरिति सुदुर्भेदः कर्कशघनरूढगुप्तग्रन्थिवत्। जीवस्य कर्मजनितो घनरागद्वेषपरिणाम इति ॥

३४ तीर्थङ्करादिपूजां दृष्ट्वाऽन्येन वापि कार्येण। श्रुतसामायिकलाभो भवेदभव्यस्य ग्रन्थाविति ॥

चनाभावः, तथा, न नैव, गुणरागः सामायिकाद्युपदेशके भगवति सामायिकादिसूत्रे सामायिकाद्यर्थे च यथास्थितपरमहितोपदेशकत्वान्यसमयविलक्षणसुनिश्चितप्रामाण्यकत्वापवर्गैकफलकत्वादिगुणबहुमानलक्षणः, तथा, न अप्राप्तपूर्वहर्षः विस्मयान्नापूर्वप्राप्तविलक्षणप्रमोदः, न खल्वनादिभवे पर्यटता मया कदापीदं दरिद्रेण महानिधानमिव पारमेश्वरमनुष्ठानं प्राप्तम्, इदानीं च तदुपलम्भात् कृतार्थोऽस्मि इत्यादिप्रशंसाद्यभिव्यङ्ग्यः, तथा, विधिभङ्गे प्रमादतो विधिपरित्यागे, न, भवभयं च संसारत्रासश्चेति ॥ १९ ॥ तदर्थानालोचनादिषु द्रव्याज्ञालिङ्गेष्वन्तर्वृत्त्यापि सोपपत्तिकं द्रव्यपदप्रवृत्तिमुपदर्शयन्नाह ।

**एए खु अणुवओगा एत्तो च्चिय हंदि अप्पहाणत्तं । जमणुवओगभवाओणंताओ हुंति किरियाओ ॥ २० ॥**

एते तदर्थानालोचनादयः, खु इति निश्चये, अनुपयोगा उपयोगप्रतिपक्षपरिणामविशेषाः, इत्थं च "अनुपयोगो द्रव्यमिति" वचनादन्तर्वृत्त्या द्रव्यपदप्रवृत्तिरविरुद्धा, विशेषाभावे सामान्याभावात्, इत एवानुपयोगसद्भावादेव, हन्दीत्युपदर्शने, अप्रधानत्वम्, प्रकृतक्रियाया इति शेषः, उपयुक्तद्रव्यक्रियाया एव भावक्रियाप्राप्तिहेतुत्वादिति भावः, विपक्षे बाधकमाह । यद् यस्मात्कारणात्, अनुपयोगभवा उपयोगापूर्विकाः, क्रियाः, अनन्ता अपरिमिताः, भवन्ति, अभव्यानामप्यनन्तशो जैनक्रियासाध्यग्रैवेयकोपपातश्रवणात्, न चैवं प्रधानहेतोः फलासन्निधानं युज्यत इति ॥२०॥ नन्वेवं तथाविधोपयोगशून्यो गृहस्थानां द्रव्यस्तवो निष्फल एव स्यात्, अथात्रेष्टापत्तिरेव आज्ञारागाभावाद्भावस्तवाहेतुत्वेन तन्त्रद्रव्यत्वाभावात्, सद्विषयगामित्वेन भोगविशेषहेतुत्वेपि तस्य मोक्षहेतुत्वाभावेनाप्रधानत्वेनैव द्रव्यत्वव्यवस्थितेः, तदिदमुक्तम् । "जं पुण एयवि उत्तं एगंतेणेव भावसुण्णंति । तं विसयम्मि वि ण तओ भावत्थयाहेउतो णेयं[35] ॥ अप्पाहण्णा एवं इमस्स दव्वत्थयत्तम-

---

३५ यत्पुनरेतदप्युक्तमेकान्तेनैव भावशून्यमिति । तद्विषयेपि न ततो भावस्तवाहेतुतो ज्ञेयम् ॥

विरुद्धं । आणावज्झत्तणओ न होइ मुक्खंगया णवरं३६ ॥ भोगादिफलविसेसो उ अत्थि एत्तो वि विसयभेदेण । तुच्छो अतग्गो जह्मा हवदि पगारंतरेणावि३७" ॥ इति । इति चेत्, तथाप्यभिनवश्राद्धानां तदर्थालोचनादिविरहिणां प्रासङ्गिकद्रव्यस्तवादौ मुग्धश्राद्धादीनां रोहिण्यादितपसि अनभ्यासनलिद्धिकानां मार्गप्रवेशार्थं सुविहितानुज्ञाते दीक्षाग्रहणादौ च प्रवृत्तिः कथमुपपद्येतेसत आह ।

पाहण्णं वि य इत्थं कुग्गहविरहाउ गुरुनिओगेणं । तहवि हु मुक्खफलं पइ अप्पाहण्णं वि अविरुद्धं ॥२१॥

प्राधान्यमप्यत्र द्रव्याज्ञायाम्, गुरुनियोगेन गुरुपारतन्त्र्येण, कुग्रहविरहादसद्ग्रहपरित्यागात्, भवति, अभिनवश्राद्धानामपि यथाकथञ्चित् द्रव्यस्तवादिप्रवृत्त्यादिनात्यारम्भासद्ग्रहाभिवृत्तेर्मुग्धश्राद्धादीनामपि रोहिण्यादितपसि तत्तद्देवताद्युद्देशेनाप्युपपन्नतया प्रवृत्तौ मुग्धतासहकृतानुषङ्गिककषायनिरोधब्रह्मजिनपूजादिपरिणामेन मार्गानुसारिभावप्राप्त्यासद्ग्रहनिवृत्तेः । तदाह । "एवं पडिवत्तीए एत्तो मग्गाणुसारिभावाओ । चरणं विहियं बहवे पत्ता जीवा महाभागा३८" ॥ इति । मार्गप्रवेशार्थं ग्राहितदीक्षाया अपि द्रव्यसम्यक्त्वारोपपूर्वकसदभ्याससहकृतायाः सकृद्बन्धकादीनामन्यसमयाभ्यासवासनाहितासद्ग्रहतिरस्करणक्षमत्वात् । तदाह । "दिक्खाविहाणमेअं भाविज्जं तं तु तंतणीईए । सइ अपुणबंधगाणं-

---

३६ अप्राधान्यादेवमस्य द्रव्यस्तवत्वमविरुद्धम् । आज्ञाबाह्यत्वतो न भवति मोक्षांगता नवरम् ॥

३७ भोगादिफलविशेष स्त्वस्तीतोऽपि विषयभेदेन । तुच्छोऽताद्दग्यस्मात् भवति प्रकारान्तरेणापि ॥

३८ एवं प्रतिपत्त्यैतस्मान्मार्गानुसारिभावात् । चरणं विहितं बहवः प्राप्ता जीवा महाभाग्याः ॥

कुग्गहविरहं लहुं कुणइत्तीति[३९]" ॥ तथापि मुख्यफलं भावाज्ञाराधनं प्रत्यप्राधान्यमप्यविरुद्धम् । अयमर्थः, यद्यप्यत्रासद्ग्रहपरित्यागफलापेक्षया योग्यतयैव द्रव्यत्वं तथापि भावाज्ञाराधनं प्रति तत्त्वतोऽप्रधानतयैव तथात्वम्, घटं प्रति कुम्भकारेण कुम्भकारपितुरिव, सम्यग्दर्शनादिकं प्रत्यसद्ग्रहपरित्यागेनान्यथासिद्ध्या द्रव्यदीक्षाया हेतुत्वायोगादिति । नन्वसद्ग्रहपरित्यागद्वाराऽपुनर्बन्धकादीनामिव, सकृद्बन्धकादीनामपि द्रव्याज्ञाया योग्यतया हेतुत्वमविरुद्धम्, व्यापारेण व्यापारिणोऽन्यथासिद्ध्ययोगात्, अन्यथाऽपुनर्बन्धकीयद्रव्याज्ञाया अप्यहेतुत्वादिति चेत्, सत्यम्, तथापि व्यवधानाव्यवधानाभ्यामेव समयप्रतिनियताभ्यां योग्यायोग्यत्वव्यवस्थितेः फलसन्निधानासन्निधानयोर्हेतुभेदप्रयोज्यत्वेन तद्भेदव्यवस्थितेश्च सर्वथा स्वरूपपरावृत्तिं विना सहकारियोगताया अप्यनुपपत्तेः, विवेचितं चेदं स्याद्वादकल्पलतायामिति नेह प्रयासः ॥ २१ ॥ अथ केऽपुनर्बन्धकादयः कथं च तेषां योग्यतया द्रव्याज्ञासम्भव इति गाथापञ्चकेनाह ।

**सो अपुणबंधगो जो णो पावं कुणइ तिव्वभावेणं । बहुमण्णइ णेव भवं सेवइ सव्वत्थ उचियठिइं ॥२२॥**

सोऽपुनर्बन्धकः ग्रन्थिप्रदेशागतः सन् पुनरुत्कृष्टस्थित्यबन्धौपयिकयोग्यतावान्, यः, पापमशुद्धं कर्म, तत्कारणत्वाद्धिंसाद्यपि, तीव्रभावेन गाढसंक्लिष्टपरिणामेन, न करोति न विधत्ते, अत्यन्तोत्कटमिथ्यात्वादिक्षयोपशमेन लब्धात्मनैर्मल्यविशेषत्वात्, तीव्रेतिविशेषणादापन्नमतीव्रभावात् करोत्यपि, तथाविधकर्मदोषात्, तथा, नैव, बहु मन्यते उत्कटेच्छाविषयीकरोति, भवं संसारम्, तत्र सुखस्य दुःखानुबन्धित्वेनानिष्टत्वप्रतिसन्धानात्, तदा, सर्वत्र मातापितृदेवातिथिप्रभृतिषु, उचितस्थितिं देशकालावस्थापेक्षया घटमानप्रतिपत्तिरूपाम्, सेवते भजते, कर्मलाघवेन मार्गानुसारिताभिमुखत्वात् ॥ २२ ॥

---

३९ दीक्षाविधानमेतद्भावयेत् तत्तु तन्त्रनीत्या । सकृदपुनर्बन्धकानां कुग्रहविरहं लघु करोतीति ॥

**सुस्सूसइ अणुरज्जइ धम्मे णियमेण कुणइ जहसत्ति । गुरुदेवाणं भत्तिं सम्मद्दिट्ठी इमो भणिओ ॥२३**

शुश्रूषति धर्मं श्रोतुमिच्छति, धर्मश्रवणेच्छा चेह जिज्ञासोत्तरकालभाविनी तरुणीसमालिङ्गितरागज्ञतरुणकिन्नरगेयशुश्रूषाधिका ग्राह्या, यदाह, "यूनो वैदग्ध्यवतः कान्तायुक्तस्य कामिनोपि दृढम् । किन्नरगेयश्रवणादधिको धर्मश्रुतौ रागः" ॥ इति । तथा, धर्मे कुशलानुष्ठाने, अनुरज्यति सामग्रीवैकल्यात्तदकरणेऽपि तत्रैव चित्ताभिलाषमनुबध्नाति, कान्तारातीतदरिद्रब्राह्मणहविःपूर्णभोजनाभिलाषादप्यधिकम्, तथा, यथाशक्ति स्वयोगसमाधानमनतिक्रम्य न पुनरसद्ग्रहेण, गुरुदेवानां धर्माचार्यपरमाराध्यानाम्, भक्तिं वैयावृत्त्यादिप्रतिपत्तिरूपाम्, नियमेन नियोगेन अवश्यं मयैतद् गुरुकार्यं देवकार्यं वा कर्त्तव्यमित्यविच्छिन्नाभिनिवेशलक्षणेन गुणश्रद्धालुमनुष्यचिन्तामणिवैयावृत्त्यनियमाधिकेन, करोति, अयमीदृग्गुणयुक्तः, सम्यग्दृष्टिः, भणितः प्रतिपादितः, शुश्रूषादीनां सम्यग्दर्शनलिङ्गत्वात्, व्रतप्रतिपत्तेश्च भजनाप्राप्तत्वेन नात्र ग्रहणम्, सम्यक्त्वप्रतिपत्त्युत्तरमप्रतिपातेन श्रावकत्वप्राप्त्यन्तरकालस्य पल्योपमपृथक्त्वमानस्य कस्यचिदतिशयितवीर्योल्लासेन शीघ्रमपवर्त्तनेपि बहूनां यथोक्तान्तरोपपत्तेः, देवादिभवे च यावतीं स्थितिं क्षपयति तावत्या एव भवस्वाभाव्यादधिकाया अर्जनेन बह्वन्तरभावात् । तदिदमाह ।
" सुस्सूस धम्मराओ गुरुदेवाणं जहा समाहीए । वेयावच्चे णियमो वयपडिवत्ती य भयणाओत्ति[४०]" ॥ २३ ॥

**पच्चक्खाणविहाणं जाणंतो थूलपावओ विरओ । आणासुद्धे जोगे वट्टंतो देसचारित्ती ॥ २४ ॥**

प्रत्याख्यानविधानं भङ्गकदम्बकोपेतं प्रत्याख्यानप्रकारम्, जानन्नुपयुज्य परिच्छिन्दन् सन्, स्थूलपापतो नीरागत्रसजन्तूनां सङ्कल्पपूर्वकनिरपेक्षहिंसादिरूपात्, विरतो निवृत्तः, भङ्गकदम्बकं चात्रेत्थं भावनीयम्, स्थूलप्राणातिपातं प्रत्या-

---

४० शुश्रूषा धर्मरागो गुरुदेवानां यथासमाधि । वैयावृत्त्ये नियमो व्रतप्रतिपत्तिश्च भजनात इति ॥

चक्षाणः श्रमणोपासकस्तावदतीतं प्रतिक्रामति निन्दाद्वारेण ततो निवर्त्तत इत्यर्थः, प्रत्युत्पन्नं च संवृणोति न करोतीत्यर्थः, अनागतं च प्रत्याख्याति न करिष्यामीत्यादिप्रतिज्ञाविषयीकुरुत इत्यर्थः, तत्र प्रत्येकमेकोनपञ्चाशद्विकल्पाः, कृतकारितानुमतमध्ये त्रिविधद्विविधैकविधप्रत्याख्येयेषु मनोवाक्कायकरणमध्यात्रिद्व्येकसंयोगेन प्रत्येकं त्रिधा भिद्यमानेषु एकत्रित्रित्रिनवनवत्रिनवनवभङ्गानामुत्पत्तेः । तदाह ।"तिण्णि तिया तिण्णि दुया तिण्णि य इक्का हवंति जोगेसु । तिदुएक्कं तिदुएक्कं तिदुएक्कं चेति करणाइं[४१]"।। एगो तिण्णि य तियगा दो नवगा तह य तिण्णि नव नव य । भंगनवगस्स एवं भंगा एगूणपण्णा-

| | | |
|---|---|---|
| ३३३ | २२२ | १११ |
| ३२१ | ३२१ | ३२१ |
| १३३ | ३९९ | ३९९ |

सं[४२]" ।। स्थापना चेयम् । एवं सर्वमीलने सप्तचत्वारिंशदधिकं भङ्गकशतं भवति, एकोनपञ्चाशतां त्रिगुणितानामेतावतां भावात् । तत्रातीतकालमपेक्ष्य मनसा कृताद्वा हतोऽयं येन मया तदासौ न हत इत्येवमनुध्यानाद्विरमणम्, इतरस्यासत्त्वेन निवर्त्तयितुमशक्यत्वात्, मनसा कारिताच्च विरमणं 'हन्त न युक्तं कृतं यदसौ परेण न घातित' इति चिन्तनात्, मनसानुमताच्च विरमणं हतानुस्मरणेन तदनुमोदनात्, एवं वचसा तथाविधवचनप्रवर्त्तनात्, कायेन च तथाविधाङ्गविकारकरणात् । अथवा कृतादीनां मनःप्रभृतिना निन्दनेन तदनुमोदननिषेधान्निवृत्तिः. अन्यथा तन्निन्दनाभावे तदनुमोदनानिवृत्तेः कृतादेः क्रियमाणादितुल्यतापत्तेः । वर्त्तमानकालमपेक्ष्य भावना च सुगमैव । भविष्यत्कालमपेक्ष्य तु मनसाऽकरणं हनिष्याम्येनमित्यचिन्तनात्, अकारणं च घातयिष्याम्येनमित्यचिन्तनात्, अननुमतिश्च भाविनं वधमनुश्रुत्य हर्षाकरणात्, एवं वाचा कायेन च तथाविधचेष्टाभिस्तत्तन्निवृत्तिर्भाव्या । अथ कायवाङ्-

---

४१ त्रयस्त्रिकास्त्रयो द्विकास्त्रयश्च एकका भवन्ति योगेषु । त्रिद्व्येकं त्रिद्व्येकं त्रिद्व्येकं चेति करणानि ।।

४२ एकस्त्रयश्च त्रिका द्वौ नवकौ तथा च त्रयो नव नव च । भङ्गनवकस्य एवं भङ्गा एकोनपञ्चाशत् ।।

मनसां यथाक्रमं करणकारणानुमतय एवं सम्भवन्ति न कारणादीनीति चेत्, न, वक्तृविवक्षाधीनविकल्पतल्पगतकारणादिभेदस्यापि दुष्परिहरत्वात्, कर्मबन्धविशेषप्रयोजकप्रयत्नभेदस्य प्रामाणिकत्वाच्च, अत एव कथं मनसा करणादीति प्रश्ने यथा वाक्काययोरिखेव सिद्धान्तितं वृद्धैः । तथा चाहुः । "आह कहं पुण मणसा करणं कारावणं अणुमई अ । जह वइतणुजोगेहिं करणाइ तह भवे मणसा[४३] ॥ तयहीणत्ता वयतणुकरणाईणं च अहव मणकरणं । सावज्जजोगमणणं पण्णत्तं वीयरागेहिं[४४] ॥ कारावणं पुण मणसा चिंतेइ कारउ एस सावज्जं । चिंतेइ अ काऊणं सुकयं अणुमई होइत्ति[४५]" ॥ एवं मृषावादादिविरमणेऽपि सप्तचत्वारिंशदधिकभङ्गशतसद्भावात् पञ्चस्वणुव्रतेषु सप्तशतानि पञ्चत्रिंशदधिकानि भङ्गकानां भवन्तीति । एतत्परिज्ञानेनैव श्रमणोपासकानामाजीवकोपासकेभ्य उत्कर्षात् प्रत्याख्यानविधानज्ञानं मुख्यविशेषणमुपात्तम् । तथा चोक्तं भगवत्याम् । "एते खलु एरिसगा समणोवासगा भवंति । णो खलु एरिसगा आजीविओवासगा भवतित्ति[४६]" ॥ अत्र खल्वीदृशत्वनिषेध आजीवकोपासकानामुक्तार्थापरिज्ञानाद्दिष्टत इति । तथा, आज्ञाशुद्धे शुद्धाज्ञाबहुमानगर्भिते, योगे आवश्यकानुष्ठाने, वर्त्तमान आज्ञाभङ्गात् कृतान्तकोपादिव बिभ्यत् देशचारित्री व्रतश्रावकः, भवति ॥ २४ ॥

**णाऊण परिहरंतो सव्वं सावज्जजोगमुज्जुत्तो । पंचसमिओ तिगुत्तो सव्वचरित्ती महासत्तो ॥२५॥**

---

४३ आह कथं पुनर्मनसा करणं कारापणमनुमतिश्च । यथा वाक्तनुयोगाभ्यां करणादि तथा भवेन्मनसा ॥
४४ तदधीनत्वाद्वचस्तनुकरणादीनां चाथवा मनःकरणम् । सावद्ययोगमननं प्रज्ञप्तं वीतरागैः ॥
४५ कारापणं पुनर्मनसा चिन्तयति कारयतु एष सावद्यम् । चिन्तयति च कारापयित्वा सुकृतमनुमतिर्भवतीति ॥
४६ एते खलु एतादृशाः श्रमणोपासका भवन्ति । न खलु एतादृशा आजीविकोपासका भवन्तीति ॥

ज्ञात्वा उपादेयशुद्धात्मस्वभावप्रतिपन्थ्यशुभोपयोगनिमित्ततया हेयत्वेन विविच्य, सर्वं स्थूलविषयत्वाद्व्यवच्छेदकवर्जितत्वेन निरवशेषम्, सावद्ययोगं प्राणातिपातादिपापव्यापारम्, परिहरन् त्रिविधं त्रिविधेन प्रत्याचक्षाणः, उद्युक्तः स्वाभिलषितवनिताविशेषप्राप्तावान्तरालिकं शीतादिकष्टसहनं कामीव मुक्तौ दृढानुरागितया तत्प्राप्तावान्तरालिकमुपस्थितं परीषहोपसर्गचक्रमगणयन् मुक्त्युपायानुसरणे दृढाभ्यासवान्, तथा पञ्चभिरीर्यादिभिः समितः, तिसृभिर्मनोगुप्त्यादिभिर्गुप्तो भवति, चारित्री सर्वविरतः, महासत्त्वोऽमरनरपर्षदक्षोभ्याज्ञारुचित्वावगुण्ठितयोगस्थैर्यगुणवत्त्वात् ॥ २५ ॥

एएसिं दव्वाणा भावाणाजणणजोग्गयाए उ। थोवावि हु जं सुद्धा बीआहाणेण पुण्णफला ॥ २६ ॥

एतेषामपुनर्बन्धकादीनां सर्वविरतपर्यन्तानाम्, द्रव्याज्ञा स्वस्वोचितबाह्यानुष्ठानरूपा, भावाज्ञाजननयोग्यतया, तु, तुरेवकारार्थः, भावाज्ञाजननयोग्यतयैव नान्यथा, नन्वेवं भावाज्ञालाभात् प्रागपुनर्बन्धकस्य द्रव्याज्ञोपपत्तावपि तदुत्तरमविरतसम्यग्दृष्ट्यादीनां तदनुपपत्तिः सिद्धासिद्धावस्थयोः फलतद्योग्यतयोर्विरोधादित्याशंक्याह। स्तोकापि अल्पापि, यद् यस्मात्कारणात्, बीजाधानेन शुद्धा सती पूर्णफला उत्कृष्टाज्ञाजननी भवत्याज्ञेति योगः। एवं चाविरतसम्यग्दृष्ट्यादीनामप्यनुत्कृष्टाज्ञाऽसम्भवेप्युत्तरोत्तरोत्कृष्टाज्ञाजननान्न द्रव्याज्ञानुपपत्तिरिति भावः ॥ २६ ॥ अथ भाव एव भावाभिवृद्धिहेतुः "सइ संजाओ भावो पायं भावंतरं तओ कुणइ[४७]" ॥ इति वचनात्, जीवविशेषोत्कृष्टभावेऽनुत्कृष्टभावसञ्चयस्य हेतुत्वावधारणात्, अत एवामृते देहगतमात्रे देहसौष्ठवारोग्यादिकमिवान्तर्गतशुभभावसद्भाव एव भक्तिवृद्ध्यादिकम्। अन्यैरप्युक्तम्।

---

४७ सकृत्सञ्जातो भावः प्रायो भावान्तरं ततः करोति ॥

तदाह । "अमए देहगए जह अपरिणयम्मि वि सुभाउ भावत्ति । तह मोक्खहेउअमए अण्णेहि वि हंदि णिद्दिट्ठा[४८]" ॥ द्रव्याज्ञोत्कर्षस्य तु न भावाज्ञोत्कर्षहेतुत्वम्, स्तोकाया अपि प्रणिधानशुद्धायास्तस्या भावोत्कर्षहेतुत्वात्, अत एव मासकल्पविहारादावत्यन्ताशक्तौ संस्तारपरावर्त्तादिनापि विशिष्टगुणलाभप्रच्यवमुपदिशन्ति । तदाहुः । "संथारपरावत्तं अभिग्गहं चेव चित्तरूवं तु । एत्तो उ कुसलबुद्धी विहारपडिमादिसु करेंति[४९]" ॥ तथा च कथमपुनर्बन्धकादौ द्रव्याज्ञाविशेषस्तदविशेषेऽपि भावविशेषात् फलविशेषाविरोधादित्याशंक्याह ।

**जइवि हु आयसभावे भावे परिणामिकारणं भावो। बीआहाणविसुद्धा तहवि णिमित्तं खु दवाणा ॥२७॥**

यद्यपि, आत्मस्वभावे, द्रव्यार्थतया तादात्म्यवृत्तिमजहति, भावे परिणामिकारणं भाव एव, घटं प्रति मृत्पिण्डस्येव कार्यरूपतया परिणमतः कारणस्य परिणामिकारणत्वात्, न तु द्रव्याज्ञा, कायपुद्गलादिपरिणामरूपायास्तस्या भावपरिणत्ययोगात्, औदयिकी हि सा क्षायोपशमिकश्च भाव इत्यनयोः परिणामिपरिणामकभावो दूरोत्सारित एव । तथापि, खु इति निश्चये, बीजाधानविशुद्धा, द्रव्याज्ञा, निमित्तं निमित्तकारणम् । इत्थमपि ह्यस्या उत्कर्ष उपपद्यत एव, निश्चयतो बीजाधानेनान्ततो व्यक्तिविशेषरूपस्यैवातिशयस्य जननात्, उत्कृष्टफलाजनकरूपपरित्यागं विनोत्कृष्टफलजनकत्वानुपपत्तेः, उत्कर्षाक्षेपकत्वाच्च, अत एव घटादिविशेषे दण्डादिविशेषोपीष्यत एव, कुर्वद्रूपत्वेन हेतुत्वात्, अस्तु वा बीजाधानमेव द्रव्याज्ञायां विशेषः, बीजाधानविशिष्टक्रियात्वेनैव शुद्धभावहेतुत्वात्तद्विशेषस्य च भावविशेषादेवोपपत्तेः, क्रियायामपि तत्सम्बन्धादेव वि-

४८ अमृते देहगते यथाऽपरिणतेऽपि शुभतो भाव इति । तथा मोक्षहेतुरमृतेऽन्यैरपि हन्दि निर्दिष्टः ॥

४९ संस्तारपरावर्त्तं अभिग्रहं चैव चित्तरूपं तु । इतस्तु कुशलबुद्धिः विहारप्रतिमादिषु कुर्वन्ति ॥

शिष्टत्वव्यवहारोपपत्तेरित्यन्यत्र विस्तरः ॥ २७ ॥ बीजाधानेनैव द्रव्याज्ञाया भावाज्ञाजननयोग्यत्वमित्युक्तम्, अतो बीजाधानस्वरूपमेव निरूपयति ।

बीआहाणं इहइं भावाणाए उ होइ बहुमाणो । तक्कारणेवि अत्था जं दव्वथओ वि सदणुमओ ॥२८॥

बीजाधानम्, इहइंति अत्र प्रक्रमे, भावाज्ञायास्तु, तुरेवकारार्थः, भावाज्ञायाः एव, भवति, बहुमान उपादेयत्वज्ञानरूपश्रद्धाजनितः प्रमोदोऽनुमोदनाख्यः, शालिमुद्गादिबीजवपनं विना सुवृष्टेरपि क्षेत्रे शस्यस्येव, एनं विना हेतुसहस्रादप्यात्मनि धर्मोत्पत्तेरयोगात्, यदाह, " अकए बीजक्खेवे जहा सुवासे वि न भवई सस्सं । तह धम्मबीयविरहे न सुस्समाए वि तस्सस्सं५० " ॥ यद्यपि शास्त्रान्तरेऽन्यान्यपि धर्मबीजानि पठितानि, तथाहि । " जिनेषु कुशलं चित्तं तन्नमस्कार एव च । प्रमाणादि च संशुद्धं धर्मबीजमनुत्तमम् ॥ १ ॥ उपादेयधियात्यन्तं संज्ञाविष्कम्भणान्वितम् । फलाभिसन्धिरहितं संशुद्धं चैतदीदृशम् ॥ २ ॥ आचार्यादिष्वपि ह्येतद्विशुद्धं भावयोगिषु । वैयावृत्त्यं च विधिवच्छुद्धाशयविशेषतः ॥ ३ ॥ भवोद्वेगश्च सहजो द्रव्याभिग्रहपालनम् । तथा सिद्धान्तमाश्रित्य विधिना लिखितादि च ॥ ४ ॥ रचना पूजना दानं श्रवणं वचनाग्रहः। प्रकाशनाथ स्वाध्यायश्चिंतना भावनेति च ॥ ५ ॥ दुःखितेषु दयात्यन्तमद्वेषो गुणवत्सु च । औचित्यासेवनं चैवं सर्वत्रैवाविशेषतः ॥ ६ ॥" इत्यादि, तथाप्यत्र मुख्यत्वादव्यभिचारित्वाच्च भावाज्ञाबहुमान एव गृहीतः । अत एवोपदेशपदेपि, बीजाधानार्थिनामतिशयेनात्रैव प्रयत्नः कर्तव्यतयोपदिष्टः । तदुक्तम्, " ता एअम्मि पयत्तो ओहेणं वीयरागवयणम्मि । बहुमाणो

---

५० अकृते बीजक्षेपे यथा सुवर्षायामपि न भवति सस्यम् । तथा धर्मबीजविरहे न सुषमायामपि तत्सस्यम् ॥

काय॰वो धीरेहिं कयं पसंगेणं५१" ॥ अत्रौघेन सामान्येन वीतरागवचने वीतरागप्रतिपादितेऽपुनर्बन्धकचेष्टाप्रभृत्ययोगिकेवलिपर्यवसाने तत्तच्छुद्धसामाचारे, बहुमानो भावप्रतिबन्धः क्षयोपशमवैचित्र्यान्मृदुमध्याधिमात्रः, कर्त्तव्य इति विवृतम्, भावाज्ञाया एव बहुमानस्य बीजाधानत्वे तद्योग्यद्रव्याज्ञाया अपि बहुमानस्य व्यवच्छेदप्रसङ्गभयादाह, तत्कारणेपि भावाज्ञाकारणेपि, अर्थादिष्टोपायत्वात्, बहुमानो बीजाधानं भवतीति योगः। यद् यस्मात्, द्रव्यस्तवोपि पुष्पादिना भगवत्पूजादिलक्षणो गृहिणामाचारोपि, सतां तीर्थकरादीनामनुमतोऽनुमोदनाविषयः। तदिदमाह, "जो चेव भावलेसो सो चेव य भगवओ बहुमओ उ। ण तओ विणेयरेणं ति अत्थओ सो वि एमेव५२ ॥ कज्जं इत्थं तेणं अणंतरं कारणं पि इट्ठं तु । जह आहारजतित्ति इत्थं तेणेह आहारोत्ति५३" ॥ २८ ॥ द्रव्यस्तवस्य सदनुमतत्वमेव तन्त्रगर्भयुक्त्योपपादयन्नाह।

**एयं च णेयमेवं विसए अणिसेहओ जिणिंदस्स । चेइअपूअणवत्तियकाउस्सगा य साहूणं ॥२९॥** 

एतच्च द्रव्यस्तवस्य सदनुमतत्वम्, एवमित्थमेव ज्ञेयं नान्यथा, कुत इत्याह, विषये वल्युपहारादौ जिनप्रासादादौ च विधेये राजराजामात्यभरतादौ योग्यप्रज्ञाप्ये, जिनेंद्रस्य तीर्थकृतः, अनिषेधादनिवारणात्, इत्थं चात्रायं प्रयोगो द्रष्टव्यः, द्रव्यस्तवो भगवदनुमतिविषयः, योग्यप्रज्ञाप्ये भगवदनिवारितत्वात्, यन्नैवं तन्नैवम्, यथा कामादयः, जमालिविहारादावनेकशः पृष्टस्यापि भगवतस्तूष्णीम्भावेन व्यभिचारपरिहारार्थं योग्यप्रज्ञाप्य इति विशेषणम्, यदि च भगवानेनं नान्वमोद-

---

५१ तस्मात् एतस्मिन् प्रयत्नः ओघेन वीतरागवचने । बहुमानः कर्त्तव्यो धीरैः कृतं प्रसंगेन ॥

५२ यश्चैव भावलेशः स चैव च भगवतो बहुमतस्तु । न ततो विनेतरेणेत्यर्थतः सोप्येवमेव ॥

५३ कार्यमत्र तेन अनन्तरं कारणमपि इष्टं तु । यथाहारजतृप्तिः इत्थं तेनेह आहार इति ॥

यिष्यत्तदा निराकरिष्यत्, अन्यथाऽयोग्ये निषेध्यमनिषेध्योपदेशान्तरदाने तदनुमतिप्रसङ्गात्, इत्थमेव सर्वविरतिमनुद्दिश्य प्रथमत एव देशविरतिपथोपदेशे क्रमभङ्गव्यवस्थितेः इति विपक्षबाधकस्तर्कः। तदिदमाह, "ओसरणे बलिमादी ण चेह जं भगवया वि पडिसिद्धं। ता एस अणुण्णाओ उचिआणं गम्मती तेण[५४] ॥ तथा "जिणभवणकारणादि वि भरहाईण ण निवारिअं तेणं। जह तेसिं चिय कामा सल्लविसादीहिं णाएहिं[५५] ॥ ता तं पि अणुमयं चिय अप्पडिसेहाउ तंतजुत्तीए। इय सेसाण वि एत्थं अणुमोअणमाइ ण विरुद्धं[५६]" ॥ च पुनः, चैत्यपूजनप्रत्ययिककायोत्सर्गात् साधूनामिदमित्थमेव विज्ञेयम्, "अरहंत चेइआणं वंदणवत्तिआए पूअणवत्तिआए सक्कारवत्तिआए" इत्यादि सूत्रे हि अर्हच्चैत्यानां बन्दनपूजनसत्कारादिना यो लाभः स ममेतः कायोत्सर्गाद्भवत्विसेतत्प्रार्थनापरं व्यवस्थितम्, तत्र पूजा माल्यादिभिः, सत्कारश्च वस्त्रादिभिः। अन्ये तु विपर्ययेण व्याचक्षते। द्विधापि द्रव्यस्तवस्यानुमोदनं साधूनां प्राप्तं कायोत्सर्गसमकक्षतयोपादेयत्वधिया तत्रात्यन्तिकोत्साहोदयात्। तदिदमाह। "जइणो वि हु दवत्थयभेदो अणुमो अणेण अत्थित्ति। एयं च एत्थ णेयं इय सुद्धं तंतजुत्तीए[५७] ॥ तंतम्मि वंदणाणपूअणसक्कारहेउ उस्सग्गो। जइणो वि हु णिद्दिट्ठो ते पुण दव्वत्थअसरूवे[५८]॥ मल्लादि-

---

५४ अवसरणे (समवसरणे) बल्यादि नचेह यद्भगवतापि प्रतिषिद्धम्। तस्मादेषोऽनुज्ञात उचितानां गम्यते तेन ॥

५५ जिनभवनकारणाद्यपि भरतादीनां न निवारितं तेन। यथा तेषां चैव कामाः शल्यविषादिभिर्ज्ञातैः ॥

५६ तस्मात् तदप्यनुमतं चैव अप्रतिषेधात्तन्त्रयुक्त्या। इति शेषाणामपि अत्र अनुमोदनादि न विरुद्धम् ॥

५७ यतेरपि द्रव्यस्तवभेदः अनुमोदनेन अस्तीति। एतच्चात्र ज्ञेयं इति शुद्धं तन्त्रयुक्त्या ॥

५८ तन्त्रे वन्दनपूजनसत्कारहेतुरुत्सर्गः। यतेरपि खलु निर्दिष्टः ते पुनः द्रव्यस्तवस्वरूपाः ॥

एहिं पूआ सक्कारोपवरवत्थमाईहिं । अण्णे विवज्जओ इह दुहा वि दव्वत्थओ एत्थ५९ " ॥ २९ ॥ नन्वेवमारम्भानुमतिप्रसङ्गो द्रव्यस्तवस्य पृथिव्याद्युपमर्दननान्तरीयकत्वादित्याशंक्याह ।



**ण य आरंभाणुमई एत्थं भावस्स चेव बहुमाणा । खलिअचरणाइमुत्तय बहुमाणे सा भवे इहरा ॥ ३० ॥**

न चात्र द्रव्यस्तवानुमोदने, आरम्भानुमतिः, कुत इत्याह । भावस्य चैव बहुमानात्, साक्षात् खल्वनुमोदनीयत्वं भावस्यैव, तद्द्वारा तु द्रव्यस्तवस्येति, तदनुमोदनेपि फलतो भावस्यैवानुमोदनान्नारम्भानुमतिस्तस्य, तदफलकत्वात् । विपक्षे बाधकमाह । इतरथा भावविशेषमुपादायारम्भवदनुमतावारम्भानुमताभ्युपगम्यमानायाम्, स्कलितचरणस्य बहिर्गतस्य सतो वर्षति मेघे पालिबन्धेन जले पतद्ग्रहं निधाय तरन्तीं नावमिव सलिलं प्रेक्षितवतः षट्कायोपमर्दनान्नायं चारित्रधर्मस्य योग्यो बाल इति स्थविरैर्निंदितस्य विराधितचारित्रस्यातिमुक्तकस्य, बहुमाने भगवच्चरणकमलसमीपमुपागतानां स्थविराणां पुरश्चरमशरीरी खल्वयं तेन न हीलनीयः किन्तु महानिधानमिवाग्लान्या विधिना परिपालनीय इति भगवत्कृतप्रशंसालक्षणे, सा आरम्भानुमतिः भवेत्तदानींतनतदीयभावस्यारम्भनियतत्वात्, अथ तत्रारम्भदोषमुपेक्ष्यासन्नसिद्धिकपरिणामानुबद्धं तदीयजीवद्रव्यमेव भगवतानुमतमिति चेत्, प्रकृतेपि तमुपेक्ष्य शुद्धभावानुबद्धं द्रव्यस्तवस्वरूपमनुमोदयतः को दोष इति निभालनीयं सूक्ष्मदृशा ॥ ३० ॥ नन्वतिमुक्तकेऽनुमोद्योपेक्ष्ययोः पारिणामिकभावारम्भयोर्भेदान्माभूदेकानुमोदन इतरानुमोदनम्, प्रकृते तु द्रव्यस्तवस्यैव स्नानपुष्पार्चनकृष्णागुरुधूपादिपूर्वापरक्रियाकदम्बकात्मकस्य जलादिजीवप्राणत्यागानुकूलव्यापारत्वादेकानुमोदन इतरानुमोदनमावश्यकमित्याशंक्य प्रसङ्गान्तरमाह ।

५९ माल्यादिकैः पूजा सत्कारः प्रवरवस्त्रादिभिः । अन्ये विपर्यय इह द्विधापि द्रव्यस्तवोऽत्र ॥

सोमिलदाहाणुमई अवि जिणवरणेमिणा कया होइ। गयसुकुमालमसाणट्ठाणं अणुमण्णमाणेण ॥

अपि पुनरेवमारम्भानुमतावभ्युपगम्यमानायाम्, जिनवरनेमिना केवलिमुख्येन नेमिनाथेन, सोमिलदाहस्य निजपुत्रीपरित्यागानुसन्धानप्रज्वलितरोषाग्निना श्वसुरेण सोमिलेन कृतस्य भगवन्तं नेमिनाथमापृच्छ्य विपुलनिर्जरालाभार्थितया स्मशाने कृतकायोत्सर्गस्य मेरोरिव निःप्रकम्पस्य गजसुकुमारस्य तीव्राङ्गारभृतमृत्तिकापालिबन्धेन मस्तकदाहस्य अनुमतिः, कृता भवेत्, किम्भूतेन, गजसुकुमारस्मशानस्थानमनुमन्यमानेन, एतदीयं स्मशानस्थानमेव हि शिरोदहनानुकूलव्यापारः, तदभावे सोमिलव्यापारानुपपत्तेः, तथा च तदनुमोदने तदीयशिरोदहनानुकूलव्यापारस्याप्यनुमतिप्रसक्तिः, यदि चात्र निर्जरानुकूलव्यापारत्वेनैवानुमतिस्तदीयतद्व्यापारत्वादिना वा नतु रूपान्तरेण दण्डादौ घटसाधनत्वादिना वा घटादिविषयकेच्छाजन्येच्छाविषयत्वेपि द्रव्यत्वादिना तदभाववदुपपत्तेरिति विभाव्यते, तदा प्रकृतेपि तुल्यम्, द्रव्यस्तवस्यापि जिनपूजात्वादिनैवानुमतेः ॥ ३१ ॥ नन्वत्र भावानुमतिद्वारकानुमतिर्न युक्ता धर्मजनकत्वभ्रममूलकप्रवृत्तिविषयत्वेनास्य धर्मार्थहिंसात्वेन धर्माजनकत्वादिति पापिष्ठमतमाशंक्य निराकुर्वन्नाह।

ण य धम्मट्ठा हिंसा एसो सावज्जओ सरूवेण। अण्णह पुट्ठालंबण णइउत्ताराइ विहडिज्जा॥ ३२ ॥

न च एषो द्रव्यस्तवो धर्मार्था हिंसा, कुत इत्यत्र हेतुगर्भं विशेषणमाह, सावद्य एव सावद्यकः, स्वार्थे कप्रत्ययः, स्वरूपेण अवधारणफलत्वाद्वाक्यस्य स्वरूपेणैव सावद्यो यत इत्यर्थः, अनुबन्धतस्तु निरवद्य एवायम्, भगवद्गतचरणादिगुणबहुमानगर्भत्वेन चरणप्रतिपत्तिहेतुत्वात्, अत एवास्य भावस्तवानुविद्धत्वमिष्यते, आज्ञापरतन्त्रत्वाल्लौकिककुप्रावचनिकद्रव्यस्तवापेक्षयाऽधिकौदार्यौचित्यादिगुणयोगितया विशिष्टोन्नतिनिमित्तत्वाच्च, तदाह। "दव्वत्थओ वि एवं आणापरतंतभावले-

सेण । समणुगओ व्विय णेओ हिगारिणो सुपरिसुद्धो त्ति[६०] ॥ लोगे सलाहणिज्जो विसेसजोगाव उण्णइणिमित्तं । जो सासणस्स जायइ सो णेओ सुपरिसुद्धो त्ति[६१]" ॥ विपक्षे बाधकमाह । अन्यथा अनुबन्धतो निरवद्यस्यापि स्वरूपतः सावद्यस्य हिंसात्वे, पुष्टालम्बनं भयपरिहारादिपुष्टकारणार्थं विहितम्, नद्युत्तारादि, विघटेत, नद्युत्तारादेरपि जलादिजीवविराधनामयत्वेन स्वरूपतः सावद्यत्वात्, विहितं च नद्युत्तारादिकमुत्सर्गतो निषिद्धमप्यपवादतः प्रवचने, तथा च स्थानांगसूत्रम्, "नो कप्पइ णिग्गंथाण वा णिग्गंथीण वा इमाओ उद्दिट्ठाओ गणिआओ विअंजिआओ पंचमहण्णवाओ महाणईओ अंतो मासस्स दुक्खुत्तो वा तिक्खुत्तो वा उत्तरित्तए वा संतरित्तए वा । तं । गंगा जउणा सरउ एरावई मही । पंचहिं ठाणेहिं कप्पंति । तं । भयसि वा दुब्भिक्खंसि वा पव्वहेज्ज व णं कोई दओघंसि वा एज्जमाणंसि महया वा अणारिएहिंति[६२]" ॥ भयंसित्ति भये राजप्रत्यनीकादेः सकाशादुपध्यपहारविषये १, दुर्भिक्षे भिक्षाऽभावे २, पव्वहेज्जत्ति प्रव्यथेतान्तर्भूतकारितार्थत्वात् प्रवाहयेत् कचित् प्रत्यनीकस्ततः ३, दओघंसित्ति उदकौघे वा गङ्गादीनामुन्मार्गगामित्वेनागच्छति ४, महता वा, आटोपेनेति शेषः, अणारिएसु त्ति विभक्तिव्यत्ययादनार्यैर्म्लेच्छादिभिर्जीवितचारित्रापहारिभिः, अभिभूतानामिति शेषः ५ । भयादिपरिहारार्थत्वादत्र न धर्मार्थहिं-

---

६० द्रव्यस्तवोपि एवं आज्ञापरतन्त्रभावलेशेन । समनुगतोपि च ज्ञेयः अधिकारिणः सुपरिशुद्ध इति ॥

६१ लोके श्लाघनीयो विशेषयोगा इवोन्नतिनिमित्तम् । यः शासनस्य जायते स ज्ञेयः सुपरिशुद्ध इति ॥

६२ नो कल्पते निर्ग्रन्थानां वा निर्ग्रंथीनां वा इमाः उद्दिष्टा गणिता व्यञ्जिता पंचमहार्णवाः महानद्यः अन्तोमासस्य द्विकृत्वो वा त्रिकृत्वो वा उत्तरितुं वा सन्तरितुं वा । तद्यथा । गंगा यमुना सरयूः इरावती मही । पंचभिः स्थानैः कल्पन्ते । तद्यथा । भये वा दुर्भिक्षे वा प्रव्यथेत वा कचित् उदकौघे वा आगच्छति महता वा अनार्यैरिति ॥

सात्वमिति चेत्, न, फलतस्तस्यापि धर्मार्थत्वात्, अन्यथा शरीराद्यर्थत्वेन श्रामण्यव्याघातात्, साक्षाद् ज्ञानादिधर्मार्थमपि वर्षासु ग्रामानुग्रामविहारादिकं प्रागिषिद्धमप्यपोहितम् श्रूयत एव, तथाचार्षम् । " णो कप्पइ णिग्गंथाण वा णिग्गंथीण वा गामाणुग्गामं दूइज्जित्तए। पंचहिं ठाणेहिं कप्पइ । तं । नाणठ्ठयाए१, दंसणठ्ठयाए२, चरित्तठ्ठयाए३, आयरिअउवज्झाए वा से वीसुंभेज्जा४, आयरियउवज्झायाणं वा बहियावेयावच्चकरणयाए५ ६३ ॥ " इत्यादि विहितत्वान्नात्र हिंसात्वम्, प्रमादयोगेन प्राणव्यपरोपणस्यैव तल्लक्षणत्वात्, अन्यथाऽतिप्रसंगादावश्यकक्रिययापि कदाचित् प्राणव्यापत्तिसम्भवात्, न चात्र प्रमादोऽस्ति । अज्ञानरूपस्य विधिस्कलनकृतयोगदुःप्रणिधानादिरूपस्य वा तस्यापरिदृश्यमानत्वादिति चेत्, तुल्यमिदमन्यत्र समाधानम् ॥ ३२ ॥ विहितत्वमेवात्र समर्थयन्नाह ॥

**जुत्तो य इमो भणिओ विरयाविरयाण कूवणाएण । समयम्मि अण्णहा पुण निवडिज्जा अत्थदंडम्मि ॥ ३३ ॥**

युक्तश्चेष्टफलश्च, अयं द्रव्यस्तवः, विरताविरतानां देशसंयमवताम्, कूपज्ञातेन कूपदृष्टान्तेन, समये जिनप्रवचने । तथा चावश्यकनिर्युक्तिग्रन्थः, " अकसिणपवत्तगाणं विरयाविरयाण एस खलु जुत्तो । संसारपयणुकरणे दव्वत्थए कूव-

---

६३ नो कल्पते निर्ग्रन्थानां वा निर्ग्रन्थीनां वा ग्रामानुग्रामं द्रोतुम् । पंचभिः स्थानैः कल्पते । तद्यथा । ज्ञानार्थतया१ दर्शनार्थतया२ चारित्रार्थतया३ आचार्योपाध्यायं वा तस्य विष्वग्भवेत् ( विश्रमेत )४ आचार्योपाध्यायानां वा बहिर्वैयावृत्त्यकरणतायै५ ॥

दिट्ठंतोत्ति६४"॥ अस्या अर्थः । अकृत्स्नमपरिपूर्णं संयमं प्रवर्त्तयन्ति विदधति ये तेऽकृत्स्नप्रवर्त्तकास्तेषाम्, अत एव विरताश्च ते निवृत्ता स्थूलादिविशेषणेभ्यः प्राणातिपातादिभ्योऽविरताश्चानिवृत्ताः सूक्ष्मादिविशेषणेभ्यस्तेभ्य एवेति विरताविरतास्तेषाम्, एष द्रव्यस्तवः, खलुरवधारणे भिन्नक्रमश्च, युक्त एव सङ्गत एव, किम्फलोऽयमित्याह, संसारं भवं प्रतनुमल्पं करोतीति संसारप्रतनुकरणः, इह च विशेषणस्य परनिपातः सिद्धसेनाचार्य इत्यादाविव न दुष्टः, लुप्तभावप्रत्ययत्वाद्वा संसारप्रतनुताकरण इति दृश्यम्, ननु कथञ्चित् सावद्यतया सदोषत्वेनानाश्रयणीयत्वादस्य कथं संसारप्रतनुकारित्वमित्याशंक्याह, द्रव्यस्तवे आश्रयणीयतया साधयितुमिष्टे, कूपदृष्टान्तोऽवटखननदृष्टान्तः । यथाहि तत्खनने श्रमपिपासादिदोषसम्भवेप्यग्रे स्वादुजलप्रादुर्भूतौ तदपनयनपूर्वकगुणान्तरदर्शनान्नायुक्तत्वं तथा द्रव्यस्तवेऽपि पृथिव्याद्यारम्भप्रभवदोषापनयनपूर्वकगुणान्तरदर्शनान्न तथात्वम् । तथा महानिशीथश्रुतस्कंधेप्युक्तम् । "अकसिणपवत्तगाणं विरयाविरयाण एस खलु जुत्तो । जे कसिणसंजमविऊ पुप्फाइ न कप्पए तेसिं६५ ।।" इत्यादि । तथा, "काउं पि जिणाययणेहिं मंडियं सयलमेइणीवट्टं । दाणाइचउक्केण वि सुट्ठु वि गच्छिज्ज अच्चुअं न परओ६६" ॥ इत्यपि । तत्र द्रव्यस्तवाच्चारित्रमुत्कर्षयितुं प्रतिपादयता तस्यानन्तर्येणाच्युतप्राप्तिफलकत्वं दानादिचतुष्कसमकक्षत्वं तत्प्राणत्वं वा प्रतिपादितं भवतीति विमुच्यासद्ग्रहं रहसि पर्यालोचनीयम् । महानिशीथादेरप्रामाण्ये च गतमाचारादिप्रामाण्येनापि, विरोधस्य सर्वत्रोट्टङ्कयितुं समाधातुं वा शक्यत्वात् । यदि च नैव-

६४ अकृत्स्नप्रवर्त्तकानां विरताविरतानामेष खलु युक्तः । संसारप्रतनुकरणे द्रव्यस्तवे कूपदृष्टान्तः ॥

६५ अकृत्स्नप्रवर्त्तकानां विरताविरतानामेष खलु युक्तः । ये कृत्स्नसंयमविदः पुष्पादि न कल्पते तेषाम् ॥

६६ कृत्वापि जिनायतनैः मण्डितं सकलमेदिनीवर्त्तम् । दानादिचतुष्केनापि सुष्ठ्वपि गच्छेत् अच्युतं न परतः ॥

मिष्यते तदाह, अन्यथा पुनर्निपतेद्यमर्थदण्डेन । तथा च सूत्रकृतांगे क्रियास्थानाध्ययने, "पढमे दंडसमादाणे अट्ठादंडवत्तिएत्ति आहिज्जइ से जहा णामए केइ पुरिसे आयहेउं वा, णाइहेउं वा, अगारहेउं वा, परिवारहेउं वा, मित्तहेउं वा, नागहेउं वा, भूयहेउं वा, जक्खहेउं वा । तं दंडं तसथावरेहिं पाणेहिं सयमेव णिसिरइ[६७] ॥" इत्याद्यर्थदण्डप्रतिपादनाधिकारे जिनप्रतिमाया अपि नागादितुल्यतया ग्रहप्रसङ्गः, न चोपलक्षणात्तद्ग्रहोऽस्त्येवेति वाच्यम्, असदृशस्योपलक्षयितुमशक्यत्वात्, अत एवान्यत्र चैत्याद्यर्थमाश्रवाभिधानस्थले चैत्यादिपदेनान्यप्रतिमादिकमेवोत्प्रेक्षयन्ति चक्षुष्मन्त इति भावः ॥ ३३ ॥ यतीनां द्रव्यस्तवानुमतौ वचनान्तरमाह ।

**चेइयवेयावच्चं जं सुअमुवयारिओ अ जो विणओ। सो दव्वत्थओ णियमा तेण जई तमणुमणंति ॥३४**

चैत्यवैयावृत्त्यं यत् श्रुतम् । "अह केरिसए पुण आराहए वयमिणं । जे से उवहिभत्तपाणसंगहदाणकुसले । अच्चंतबालदुब्बलवुड्ढखवगे पवत्तयायरिअउवज्झाए सेहे साहम्मिए तवस्सीकुलगणसंघ चेइयट्ठे य निज्जरट्ठी वेयावच्चं अणिस्सियं दसविहं बहुविहं पकरेइत्ति[६८] ॥" प्रश्नव्याकरणे यश्चौपचारिको विनयः श्रुतो विनयसमाध्ययनादौ, तत्र हि ज्ञानदर्शनचारित्रो-

---

६७ प्रथमं दण्डसमादानं अर्थदण्डप्रत्यय इत्याख्यायते, तद्यथा नाम कश्चित्पुरुषः आत्महेतुं वा ज्ञातिहेतुं वा आगारहेतुं वा परिवारहेतुं वा मित्रहेतुं वा नागहेतुं वा भूतहेतुं वा यक्षहेतुं वा तं दण्डं त्रसस्थावरैः प्राणिभिः ( त्रसस्थावरेषु प्राणिषु ) स्वयमेव निसृजति ॥

६८ अथ कीदृशः पुनराराधयति व्रतमिदम् । यः स उपधिभक्तपानसंग्रहदानकुशलः अत्यन्तबालदुर्बलवृद्धक्षपके प्रवर्तकाचार्योपाध्याये शैक्षे साधर्मिके तपस्विकुलगणसङ्घे चैत्यार्थश्च निर्जरार्थी वैयावृत्त्यं अनिश्रितं दशविधं बहुविधं प्रकरोतीति ॥

पचारभेदाच्चतुर्विधो विनय उक्तस्तत्र चोपचारो लोकव्यवहारः पूजा वा प्रयोजनमस्येत्यौपचारिको भक्तिरूपः, स च "तित्थयरसिद्धकुलगणसंघकिरियधम्मनाणनाणीणं आयरियथेरुवज्झायगणीणं तेरसपयाणि अणासायणा य भत्ती बहुमाणो तह य वण्णजणणं तित्थयराइतेरस चउग्गुणा होंति बावण्णा६९ ॥" इति । गाथाद्वयोक्तक्रमेण द्विपंचाशद्भेदो भवति, प्रकृते च तीर्थकृद्विषयोऽयं ग्राह्यः स नियमाद्द्रव्यस्तवश्चैत्यवैयावृत्त्यस्य तीर्थकृदुपचारस्य वा तत्त्वतस्तद्रूपत्वाचेन यतयस्तद्द्रव्यस्तवमनुमन्यंते तदनुमतेरेव तत्संपादनार्थत्वात् । अत एव, "आयरियउवज्झायथेरतवस्सीगिलाणसेहाणं । साहम्मियकुलगणसंघसंगयं तमिह कायव्वं७० ॥" इति गाथोक्तदिशा दशविधस्यान्नपानादिदानभेदेनानेकप्रकारस्यानिश्रितस्य वैयावृत्यस्य करणेऽधिकारिणोऽत्यंतबालाद्यर्थकनिर्जरार्थित्वमधिकारिविशेषणमुक्तम्, चेइअट्ठेय इत्यत्र सप्तप्रयोगादेतासां योऽर्थः प्रयोजनं स तथा, तत्र च निर्जरार्थी कर्मक्षयकाम इति व्याख्यानाद्भवति च यत्किंचिच्छुद्धयोगव्यापारे चैत्यादिकृत्यसंपत्तिः, यदुक्तं निर्युक्तिकृता "चेइयकुलगणसंघे आयरिआणं च पवयणसुएसु । सव्वेसु वि तेण कयं तवसंजममुज्जमंतेणं७१" ॥ इति, अत्र च विशिष्टस्य प्रायो मिथोंतर्भावात्, यच्चाधिकारिविशेषणघटकम्, तन्नियमादनुमोद्यमेव संपाद्यमेव चेति सर्वमवदातम् ॥३४॥
नन्वनुमोद्यत्वेऽस्य साक्षात्कर्त्तव्यत्वमपि न कथमित्याशंकायामाह ।



---

६९ तीर्थकरसिद्धकुलगणसंघक्रियाधर्मज्ञानज्ञानिनां आचार्यस्थविरोपाध्यायगणिनां त्रयोदशपदानि अनाशातना च भक्तिः बहुमानस्तथा च वर्णजननं तीर्थकरादित्रयोदश चतुर्गुणा भवन्ति द्वापंचाशत् ॥

७० आचार्योपाध्यायस्थविरतपस्विग्लानशैक्षाणाम् । साधर्मिककुलगणसंघसंगतं तदिह कर्त्तव्यम् ॥

७१ चैत्यकुलगणसङ्घे आचार्याणां च प्रवचनश्रुतेषु । सर्वेष्वपि तेन कृतं तपःसंयमोद्यमवता ॥

सक्खाउ संजयाणं भावपहाणत्तओ ण सो जुत्तो । भावोअतयणुमोअणमेत्तो त्तं चेव जुत्तयरं॥३५॥

साक्षात्तु स्वयंकरणतः पुनः, संयतानां सर्वविरतानाम्, नासौ द्रव्यस्तवः, युक्तः, कुत इत्याह-भावप्रधानत्वात् द्रव्यस्तवफलीभूतैकांतशुद्धपरिणामपरप्रवृत्तिकत्वात्, स्नानाद्यधिकारित्वाभावेन तदनुपपत्तेः, कार्यार्थं तदप्याश्रीयतां को दोष इति चेत्, न, तदुपपत्तौ स्वरूपतः सावद्यस्याश्रयितुमयुक्तत्वात्, न खलु भुजाभ्यां नदीन्तरीतुं समर्थास्तदुत्तरणार्थं कंटकादियुक्तं काष्ठमाद्रियंते, न चौषधं विनैवाचिरेण रोगोपशमयोग्यतावंतो दीर्घकालभाविरोगोपशमहेतुभूते कटुकौषधपानक्षारशरावेधादावादृता भवंति, द्रव्यस्तवतो हि पुण्यानुबंधिपुण्योपलंभात् सुदेवत्वसुमानुषत्वादिलाभक्रमेणैव कर्मक्षयः, भावस्तवात्तु आहत्यैवेति, तदिदमाह । "असुहत्तरमुत्तरणप्पाओ दव्वत्थओ समत्तो य । नदिमाइसु परो पुण समत्थ बाहुत्तरणकप्पो[७२]॥ कडुगोसहादिजोगा मंथररोगसमसण्णिहो वारि । पढमो विणोसहेणं तक्खयतुल्लो अ बितिओ त्थ[७३] ॥ पढमाउ कुसलबंधो तस्स विवागेण सुगइमादीआ । तत्तो परंपराए बितिओ वि हु होइ कालेणं[७४]॥ चरणपडिवत्तिरूवो थोअव्वो च्चिय पवित्तिगुरुओ उ । संपुण्णाणाकरणं कयकिच्चे हंदि उचियं तु[७५] ॥" नचैवं निरवद्यत्वाद्भावप्रधानत्वं श्रावकस्याप्याश्रयणीयम्, कथंचिदाज्ञाकरणगुणपरिज्ञानेपि चारित्रमोहनीयकर्मविपाकप्राबल्यात्तत्क्रियाया हालाहलव्याप्तपुरुषव्यापारसदृश-

---

७२ असुखोत्तारं उत्तरणप्रायो द्रव्यस्तवः समस्तश्च । नद्यादिषु परः पुनः समर्थो बाहूत्तरणकल्पः ॥

७३ कटुकौषधादियोगान्मंथररोगशमसन्निभो वारि । प्रथमो विनौषधेन तत्क्षयतुल्यश्च द्वितीयोऽत्र ॥

७४ प्रथमतः कुशलबन्धः तस्य विपाके सुगत्यादयः । ततः परम्परया द्वितीयोऽपि खलु भवति कालेन ॥

७५ चरणप्रतिपत्तिरूपः स्तोक एव प्रवृत्तिगुरुकस्तु । संपूर्णाज्ञाकरणं कृतकृत्ये हन्दि उचितन्तु ॥

त्वेन गुणीभूतभावत्वात्, चिकित्सार्हतया द्रव्यप्रधानत्वाच्च, न चैवं भावमात्रादेव तेषां कृतार्थत्वे सुपात्रदानादिकमपि विच्छिद्येत, तद्विधानकाले तदविधानं दोषायेति चेत्, प्रकृतेप्येतत् किं नालोचयसि, आरंभभयान्नालोचयामीति चेत्, विधिभक्तिमतामितो भगवदर्चनादिदर्शनाद्बहवः प्रतिबुद्ध्य शिवं यास्यंतो षड्जीवनिकायं रक्षिष्यंतीत्यादिपर्यालोचनजनितसमुल्लासानां नास्त्येव तदवकाशः, इतरेषां च भग्नचित्ततया न काप्यधिकार इति विभावनीयम्। तदेवं संयतानामकर्त्तव्यो द्रव्यस्तवो गृहिणां च कर्त्तव्य इति व्यवस्थितम्, ननु यद् यस्याकर्त्तव्यम् न तत्तस्यानुमोद्यम्, यथा धार्मिकाणां हिंसादिकम्, इति कथं द्रव्यस्तवस्याकर्त्तव्यत्वे यतीनामनुमोद्यत्वमित्यत्राह। भावैश्च तदनुमोदनं द्रव्यस्तवानुमोदनम्, सुकृतानुमोदनस्य चारित्रप्राणत्वात्, अतस्तच्च एतस्य भिन्नक्रमत्वात्, युक्ततरमेव अतिशयेन युक्तमेव, ततो भावप्रधानत्वाभंगात्, प्रत्युत ततस्तदुपचयाद्भावधारयैव गुणश्रेण्यभिवृद्धेः। "अविशुद्धस्स ण वड्ढइ गुणसेढी तत्तिया ठाई[७६] ॥" इति वचनात्, उक्तानुमानं च स्वातंत्र्येण सुपात्रदान एव व्यभिचारि, द्रव्याभावेन तस्य यतीनामकर्त्तव्यत्वेऽप्यनुमोद्यत्वादिति भावः ॥ ३५ ॥ यत एवं द्रव्यस्तवानुमोदनमेव साधोर्युक्तमत इयं व्यवस्थोपपद्यत इत्याह।

**एत्तो च्चिय पण्णवणी तप्फलभासा ण चेव आणमणी। ण य पुट्ठस्स भगवओ भासा इच्छाणुलोमा य॥३६**

इत एव साधोर्द्रव्यस्तवानुमोदनमात्रस्य युक्तत्वादेव, तत्फलभाषा द्रव्यस्तवफलप्रतिपादिका गीः, प्रज्ञापनी श्रद्धातिशयजनकफलज्ञापनमात्रपरा, नचैवाज्ञापनी त्वं प्रासादार्थं पृथिवीं खन जलादिकं वाऽऽनयेत्याद्यभिलापेन द्रव्यस्तवांगकर्त्तव्यतादेशकतया साक्षात् प्रवर्त्तिका, अथ "यस्तृणमयीमपि कुटीं कुर्याद्दद्यात्तथैकमपि पुष्पम्। भक्त्या परमगुरुभ्यः पुण्यो-

७६ अविशुद्धस्य न वर्धते गुणश्रेणिः तावती तिष्ठति।

न्मानं कुतस्तस्य ॥ जिनभवनं जिनबिंबं जिनपूजां जिनमतं च यः कुर्यात् । तस्य नरामरशिवसुखफलानि करपल्लवस्थानि॥" इत्यादिवाचकमुख्यवचनानां कारकत्वमेव प्रतिभाति न तु ज्ञापकत्वमिति चेत्, न, फलज्ञापनमात्रतात्पर्यकेभ्य एतेभ्यः फलार्थिनां श्रोतॄणां स्वत एव प्रवृत्तेः, श्रोतार इतो द्रव्यस्तवे प्रवर्त्तन्तामिति तात्पर्याभावेन फलतोपि साक्षादप्रवर्त्तकत्वात् । यदि पुनः साक्षात् परप्रवर्त्तनयाप्येतानि वचनान्यदुष्टानि स्युः तदा साक्षादेव तत्र तत्प्रवर्त्तनमपि विधेयं स्यात्, तथा च वैरस्वामिचरितालंबनस्य पुष्टत्वमेव स्यात्, पुष्टत्वं च तस्य श्रूयते, वंदनकनिर्युक्तौ, एतस्य भग्नशुभपरिणामालंबनतयोपदिष्टत्वात्, तथाहि । "चेइअकुलगणसंघे अन्नं वा किं पि काउ निस्साणं । अहवा वि अज्जवइरे तो स चेतीअकरणिज्जं । चेइअपूआ किं वइरसामिणा मुणिअपुव्वसारेणं । न कया पूरिआइ तओ मोक्खंगं सा वि साहूणं[७७] ॥" इति, नच नैव, पृष्टस्य नाटकादिकं प्रदर्शयामीत्यादिगिरा देवादिना पर्यनुयुक्तस्य, भगवतः, चारित्रग्रहणादिप्रश्नस्थल इवेच्छानुलोमा च भाषा यथा सुखमित्याद्याकारा प्रवर्त्तते, तस्या निसर्गत आप्तेष्टसाधनताज्ञापकत्वेन "इष्टं वैद्योपदिष्टम्" इति न्यायात् साक्षात् प्रवृत्तिहेतुप्रायत्वात् ॥ ३६ ॥ अथ हीनत्वादेव नानुमोद्यत्वं द्रव्यस्तवस्य साधूनामित्याशंकाशेषं परिहरन्नाह ।

**अह हीणं दव्वत्थयं अणुमण्णिज्जा ण संजओ त्ति मई । ता कस्सवि सुहजोगं तित्थयरो णाणुमण्णिज्जा ॥ ३७**

अथेत्युपन्यासे यदि, हीनं स्वयोगापेक्षया तुच्छम्, द्रव्यस्तवं नानुमन्येतेति मतिस्ते, तत्कस्यापि शुभयोगं तीर्थकरो नानुमन्येत, अधस्तनगुणस्थानवर्त्तिनां सर्वेषामपि शुभयोगस्य तीर्थकरापेक्षया हीनत्वात्, विरतिरूपत्वमेव तदनुमोद्यतायां

---

७७ चैत्यकुलगणसंघान् अन्यद्वा किमपि कृत्वा निश्राम् । अथवाऽपि आर्यवज्रः तस्मात् तच्चैत्यकरणीयम् । चैत्यपूजा किं वज्रस्वामिना ज्ञातपूर्वसारेण । न कदा पूरिता ततो मोक्षाङ्गं सापि साधूनाम् ॥

प्रयोजकमिति तु यद्याद्रियते, तदा द्रव्यस्तवस्याप्यसदारंभनिवृत्तिरूपत्वात् किमिति नानुमोद्यत्वम्, वस्तुत आज्ञाशुद्धत्वमेव तथा, तीर्थंकरनामकर्माश्रवरूपस्य सम्यक्त्वस्यापि तथात्वात्, तच्चात्राक्षतमेवेत्यवसेयम् ॥ ३७ ॥ उपसंहरन्नाह ।

**अलमेत्थ पसंगेणं दोण्हवि अणुमोअणाई आणाणं । बीआहाणविसुद्धा दव्वाणा होइ णायव्वा ॥३८॥**

अलमत्र प्रकृतविचारे, प्रसंगेन आनुषंगिकविस्तरेण, द्वयोरपि प्रधानद्रव्यभावसंगतयोः आज्ञयोः, अनुमोदनया बीजाधानविशुद्धा द्रव्याज्ञा भवति ज्ञातव्या, बीजीभूतया तयाऽपुनर्बंधकाद्युचितभावजननप्रधानद्रव्याज्ञायाः प्रेत्योपपत्तेः । द्वयोरित्युक्त्याऽप्रधानाज्ञानुमोदनायाः प्रत्यपायबहुलत्वमेव सूच्यते, तथा च हरिभद्राचार्यवचनम्, "तेसिं बहुमाणेणं उम्मग्गणुमोअणा अणिट्ठफला । तह्मा तित्थयराणाट्ठिएसु जुत्तो कित्थ बहुमाणो त्ति[७८] ॥" यदि च परंपरया भावाज्ञाप्रयोजकतया साप्यनुमोद्या स्यात्, तदा निगोदभावादेरपि स्वोपमर्दपूर्वकपरिणामांतरव्यवहिततत्परिणामप्रयोजकतयाऽनुमोद्यत्वप्रशक्तिरित्यवसेयम् ॥ ३८ ॥ अथ क्रियायां विधिशुद्धोपयोगयोगादेव द्रव्याज्ञायाः प्राधान्यमुपपद्यते । "चेलाइविहाणम्मी तग्गयचित्ताइणा य विन्नेओ । तव्वुड्ढिभावभावेहिं तह य दव्वेयरविसेसो[७९] ॥" इति वचनात्, तथा च आगमदेशे क्रियारूपभावे आगमनिषेधान्नो आगमतो भावाज्ञात्वमेव युक्तम्, नोशब्दस्य देशनिषेधार्थत्वात्, न तु द्रव्याज्ञात्वमित्याशंकायामाह ।

**नोआगमभावाणा एसा णो बज्झकिरियमहिगिच्च । दव्वेण य भावेण य छेयत्तं सुए भणिअं ॥ ३९ ॥**

---

७८ तेषां बहुमानेनोन्मार्गानुमोदनाऽनिष्टफला । तस्मात्तीर्थकराज्ञास्थितेषु युक्तः कुत्र बहुमान इति ॥

७९ चेलादि (शिष्यादि) विधाने तद्गतचित्तादिना च विज्ञेयः । तद्वृद्धिभावभावैस्तथा च द्रव्येतरविशेषः ॥

एषा अधिकृतद्रव्याज्ञा, नो नैव, बाह्यक्रियामधिकृत्य, नोआगमभावाज्ञा अंतर्वृत्त्या जीवपरिणामरूपायाः क्रियाया भावत्वेपि बहिर्वृत्त्या शरीरपरिणामरूपायास्तस्या द्रव्यत्वाविरोधात्, एतच्चेत्थमेव यद् यस्मात्, श्रुते आवश्यकनिर्युक्त्यादि-लक्षणे, द्रव्येण भावेन च, छेकत्वं वंदनया संपूर्णफलप्रयोजकत्वलक्षणम्, भणितम्, तथा च तद्ग्रंथः "रुप्पं टंकं विसमाहयक्खरं णवि य रूवगो छेयो। दोण्हं वि समाओगे रूवो छेयत्तणमुवेइ[८०] ॥ रुप्पं पत्तेयबुहा टंकं जे लिंगधारिणो समणा। दव्वस्स य भावस्स य छेओ समणो समाओगे त्ति[८१] ॥" अत्र द्रव्यभावसमायोगवतः टंकयुक्तरूप्यस्थानीयप्रथमभंग-पतितस्य वंदना मोक्षफलतया एकांतशुद्धैव ॥ द्रव्यानुपेतस्य भाववतः टंकानालिखितरूप्यस्थानीयद्वितीयभंगपतितस्यापि मो-क्षाभ्युदयफलसाधकत्वात्तथैव, भावप्राधान्यात्, आह च। "क्रियाशून्यश्च यो भावो भावशून्या च या क्रिया। अनयोरंतरं ज्ञेयं भानुखद्योतयोरिव॥" इति, भावविहीनद्रव्यक्रियावतः टंकलिखितभिन्नद्रव्यस्थानीयतृतीयभंगपतितस्योभयहीनस्य मुद्रामा-त्रस्थानीयचतुर्थभंगपतितस्य च प्रायः क्लिष्टसत्त्वानां संभवतीति कुदेवत्वादिप्रयोजकतयाऽनिष्टफलैव। अन्ये त्वाहुः, नाममात्रे-णार्हत्यप्यंत्यभंगद्वयवंदना लौकिक्येव, लौकिकवंदनायाः फलस्यैवैतस्याः फलत्वात्। यदि चेयं जैनी स्यात्, तदा विध्य-विध्यासेवनसहकारिभ्यामिष्टानिष्टार्थफला स्यात्, तस्यास्तत्स्वभावत्वात्, न चेतोऽविध्यासेवनेऽपि साक्षादनिष्टफलं प-श्यामः, ततो जैनीवदाभासमानाऽपीयं लौकिक्येवेति। अत्र प्रथमभंगे भावसत्त्वेऽपि द्रव्याप्रत्ययाभिधानादुपयुक्तानामपि द्रव्याज्ञा नायुक्तेति फलितम् ॥ ३९ ॥ उक्ता सप्रसंगं द्रव्याज्ञा, अथोपादेयां भावाज्ञां निरूपयति।

---

८० रूप्यं टंकं विषमाहताक्षरं नापि च रूप्यकश्छेकः। द्वयोरपि समायोगे रूप्यं छेकत्वमुपैति ॥

८१ रूप्यं प्रत्येकबुधाः टंकं ये लिङ्गधारिणः श्रमणाः। द्रव्यस्य च भावस्य च छेकः श्रमणः समायोग इति ॥

**भावाणा पुण जायइ सम्मद्दिट्ठिस्स मूलमहिगिच्च । कज्जाकज्जे णाओ पवट्टइ तओ हिए पायं ॥४०॥**

भावाज्ञा पुनर्जायते सम्यग्दृष्टेः, मूलं आदिम्, अधिकृत्य तदनंतरमेव प्रशमसंवेगनिर्वेदानुकंपास्तिक्यरूपमोक्षपुरप्राप्तिसार्थोपलब्धेः, ततः कार्याकार्ये इहलोकपरलोकयोर्हिताहिते नीतिव्यवहारकुनीतिपरद्रव्यापहारादिलक्षणे, ज्ञात्वा इहलोकपरलोकयोः शुभाशुभफलत्वेन निश्चित्य, प्रायो हिते प्रवर्त्तते, असति प्रतिबंधे निर्वेदप्राणस्य तस्य हित एवोत्कटेच्छाजननस्वभावत्वात्, तद्गुणप्राबल्यप्रयोज्यप्रयत्नस्य विरत्यावरककर्मस्थित्यपवर्त्तनप्रवणत्वाच्च ॥ ४० ॥ अपि च मार्गप्रवृत्तिस्वभावस्य जीवस्योन्मार्गप्रवृत्तिहेतुमिथ्यात्वांध्यनिवृत्तौ स्वभावत एव हिते प्रवृत्तिरित्युपपादयति ।

**परपरिणामुम्मग्गे चत्ते लद्धे अ नाणदीवम्मि । मग्गम्मि जं पवट्टइ एस सहावो हु जीवस्स ॥४१॥**

परपरिणामे लौकिककुप्रावचनिकवासनाजनितस्वाभेदस्वीयत्वादिज्ञानरूपे तज्जनिताध्यासिकपरद्रव्यसंबंधरूपे च, उन्मार्गे, त्यक्ते सति, लब्धे च ज्ञानदीपे, मार्गे स्वात्मप्रतिबंधमात्रविश्रांतश्रामण्यरूपे, यत् प्रवर्त्तते, एष स्वभावो हि जीवस्य, न खलु जपाकुसुमतापिच्छोपरागजनितपाटलिमकालिमविलये स्फटिकस्य प्रादुर्भवंती शुद्धतापि न अस्वाभाविकी, अन्यानधीनत्वात्, एवं ज्ञानदर्शनचारित्ररूपमार्गस्वभावस्यात्मनोपि कर्मोपाधिकरागद्वेषविलये प्रादुर्भवंती मार्गप्रवृत्तिरपि नास्वाभाविकी, तत एव, अन्यथा जन्यत्वेनापारमार्थिकतया निवृत्त्यावश्यकत्वेऽनिर्मोक्षापातात्, न हि यत्पराधीनं रूपं तत्तन्निवृत्तावप्यनुवर्त्तते, यथा स्फटिकोपरागो जपाकुसुमादिनिवृत्ताविति भावः ॥ ४१ ॥ ननु यदि मार्गप्रवृत्तिरात्मनः स्वभाव एव, तदा प्रागपि तत्प्रसंग इति शंकते ।

**कह एस पुरा चत्तो णो चत्तो तेण णिच्चमुत्तेण । अन्नाणविलयमत्तं चित्तं तु कमेण णिच्छयओ॥४२॥**

कथमेष मार्गप्रवृत्तिस्वभावः, पुरा मिथ्यादृष्ट्यादिदशायाम्, त्यक्तः स्वभावत्यागे स्वभाववतोऽवस्थानानुपपत्तेः, समाधत्ते न त्यक्तः तेन आत्मनाऽधिकृतः स्वभावः, कीदृशेन नित्यमुक्तेन सदा परद्रव्यपृथग्भूतटंकोत्कीर्णस्वभाववता बहिर्वृत्त्या परद्रव्यसंबंधेप्यंतर्वृत्त्या पुष्करपत्रवत्तस्य सर्वदा निर्लेपत्वात् । कथं तर्हि गुणस्थानक्रमव्यवस्था कथं वा मुक्त्यर्थं प्रवृत्तिः प्राप्तस्य प्राप्त्ययोगात्, इत्यत्राह । चित्रं प्रातिस्विकगुणस्थाननियतम्, अज्ञानविलयमात्रं तु, क्रमेण गुणस्थानारोहानुक्रमेण, निश्चयतो ज्ञाननयमवलंब्येष्यते, मृदुमध्याधिमात्राज्ञानविशेषनाशादेवं तत्क्रमोपपत्तेः, अन्यथा तन्मूलकमिथ्यात्वादिपरिणामनाशक्रियानुपपत्तेः, विरत्यादीनां तु गुणानां ज्ञानकाष्ठारूपत्वेनाभिव्यंग्यत्वमेव, मुक्त्यर्थं प्रवृत्तिस्तु कंठगतचामीकरन्यायेनानवाप्तत्वज्ञानादेव, नचैवं सम्यग्दृष्टेस्तदनुपपत्तिः, मुक्तिभवसाम्यपरिणतज्ञानादेव तदाहितवासनानिवृत्तेः तदर्थमेव च प्राक् प्रवृत्त्युपयोगात्, न चैवं ज्ञाननयावलंबनमन्याय्यम्, सर्वनयात्मके भगवत्प्रवचने यथोपयोगमधिकृतनयावलंबनस्यादुष्टत्वात्, विपंचितं चेदं कल्पलतायाम् ॥ ४२ ॥ ननु सम्यग्दृशो भावाज्ञाया मार्गप्रवृत्त्युपपत्तौ सर्वेषां कालावैषम्येन मुक्तिप्राप्तिप्रसंग इत्यत आह ।

**पडिबंधोवि य एत्थं कंटकजरमोहसन्निभो भणिओ । तंते तव्विगमेणं मुक्खपुरे गमणमइरेणं ॥४३॥**

प्रतिबन्धोपि विसामग्रीकृतकालविलंबरूपः, अत्र भावाज्ञायाम्, पाटलिपुरादौ प्रस्थितस्य पथिकस्येवावश्यं वेद्यकर्मपाशात्, कंटकज्वरमोहसन्निभो मेघकुमारदहनसुरार्हद्दत्तानामिव सन्निहितदूरदूरतरावधिकत्वात्, भणितः, तन्त्रे उपदेशपदादौ, देशसौराज्यसुभिक्षत्वादिगुणपरिज्ञानवतः पथिकस्य कंटकादित इव मोक्षविषयकाजरामरत्वादिगुणपरिज्ञानवतः सम्यग्दृशः सुखशीलत्वमायोन्मादशबलानुष्ठानादसदभ्यासवतो मृदुमध्याधिमात्रप्रतिबन्धोपपत्तेः । तद्विगमेन उक्तप्रतिबंधविगमेन, मोक्षपुरे

अचिरेण अविलंबेन, गमनं संपद्यते, असति प्रतिबंधे भावाज्ञाया मुक्तिमापकस्वभावत्वात् ॥ ४३ ॥ यत एवं भावाज्ञावतोपि प्रतिबन्धः संभवी अतोऽत्रातिशयितत्वं कर्त्तव्यतयोपदिशन्नाह ।

**एवं णाऊण सया बुहेण होअव्वमप्पमत्तेण । परिसुद्धाणाजोगे कम्मं णो फलइ रुद्दंपि ॥ ४४ ॥**

एवं भावाज्ञामाप्तावपि प्रतिबंधस्य कटुकविपाकतां ज्ञात्वा, सदा सर्वदा, बुधेन मुक्तिमार्गप्रवृत्तिदक्षेण, भवितव्यमप्रमत्तेन सर्वातिचारपरिहारपरायणेन, इत्थमेवाज्ञाशुद्ध्युपपत्तेः, ततः किं स्यादित्याह । परिशुद्धाज्ञायोगे दीर्घकालादरनैरंतर्यासेवितविशुद्धाज्ञासंपत्तौ, कर्म निकाचनावस्थामप्राप्तं ज्ञानावरणादिकम्, रौद्रमपि नरकादिविडंबनादायकत्वेन दारुणमपि, न फलति न स्वविपाकेन विपच्यते, यथा हि नक्तं स्वच्छंदप्रसरा अपि शशांककराभगवतो रवेरुदये निष्फलत्वमेव बिभ्रति तथास्वाभाव्यनियमात्, तथा परिशुद्धाज्ञाभ्यासादात्ममात्रप्रतिबद्धमानसानामनंतनिर्गुणभवभ्रांतिपरिश्रांतानां दारुणपरिणाममिथ्यात्वादिनिमित्तोपात्तमप्यशुद्धं कर्म न स्वफलमुपधातुं समर्थं स्यादिति ॥ ४४ ॥ एतदेव प्रतिवस्तूपमया भावयति ।

**जह तुल्लणिमित्ताणं दीसइ वाही तहा समाही अ । परिहारेयरभावा तहेव एयंपि दट्ठव्वं ॥ ४५ ॥**

यथा तुल्यनिमित्तयोः बहुसदृशतायामेकत्वप्रतिपत्तिहेतुना व्यवहारनयादेशेनैकभोजनादिभुजोः निश्चयत एवं वक्तुमशक्यत्वात्, "नाकारणं भवेत् कार्यं नान्यकारणकारणम् । अन्यथा न व्यवस्था स्यात्कार्यकारणयोः क्वचित्" ॥ इति ग्रंथेन तेन कार्यभेदे कारणभेदाभ्युपगमात् । तदिदमुक्तम्, "ववहारओ णिमित्तं तुल्लं एसो वि एत्थ तत्तंगं । एसो पवित्तिओ खलु णिच्छयणयभावजोग्गओ त्ति[८२] ॥" व्याधिस्तथा समाधिश्च दृश्यते, कथमित्याह । परिहार उपस्थित-

[८२] व्यवहारनयो निमित्तं तुल्यमेषो ऽप्यत्र तत्त्वाङ्गम् । इतः प्रवृत्तितः खलु निश्चयनयभावयोग्यत इति ॥

रोगनिदानाजीर्णादिपरित्यागः, इतरश्च अपरिहारः, तद्भावात् तदुयोगात्, तथा एतदपि उपस्थितकर्मव्याधौ तदभिवृद्धिनिबंधनाविध्यासेवने तत्साफल्यं तत्परित्यागे च तद्वैफल्याद्भावारोग्यमिति, द्रष्टव्यम्, यो हि यन्निमित्तो दोषः स तत्प्रतिपक्षासेवात एव निवर्त्तते, यथा शीतासेवनादुत्पन्नं जाड्यमुष्णसेवात इति ॥ ४५ ॥ तदेवं परिशुद्धाज्ञायोगस्य दुष्टकर्मोपक्रमहेतुत्वमित्युक्तम् । तत्र च स्वभावत एव लाघवं भवतीत्येकांतप्रतिक्षेपायास्यैव पुरुषकारत्वं विधातुं कर्मणोऽवश्यवेद्यत्वनियमेनोक्तार्थानुपपत्तिशंकां च परिहर्त्तुमाह ।

**एसो य पुरिसगारो ण धावणाई गयाणुगइओ अ। अणिययसहावकम्मे एसो अ उवक्कमणहेऊ॥४६॥**

एष च परिशुद्धाज्ञायोगलक्षणः, पुरुषकार आत्मव्यापारः, क्रमोपक्रमलक्षणं फलं प्रति द्रष्टव्यः, न धावनादिः लौकिकः, आदिना वल्गनादिग्रहः, न वा गतानुगतिकः अंधपरंपरानुपाती इत्थमेवास्मदीयैः समाचरितमित्यभिग्रहाभिनिवेशपेशलोऽज्ञानिनां पाखंडिनां जैनाभासानां वा दुःषमाकालादिकदालंबनग्रहणप्रवणानामविध्युपजीविनां संबंधी, ततः कर्मानुबन्धस्यैवानुवृत्तेः, तथा एष चानियतस्वभावे फलदानं प्रत्यनियतरूपे कर्मणि उपक्रमहेतुः, तेन "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि । अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ॥" इति सर्वलोकप्रवादश्रवणान्न भयं विधेयम्, द्विविधं हि जीवाः प्रथमतः कर्म बध्नंति, एकं शिथिलपरिणामतया फलं प्रत्यनियतरूपम्, द्वितीयं चात्यंतदृढपरिणामनिबद्धतयाऽवश्यं स्वफलसंपादकम्, तत्र प्रथमस्य तत्तद्रव्यादिसामग्रीमपेक्ष्य प्रतीकारसहत्वात्तादृशासद्वेद्यायशःकीर्त्तिलाभांतरायादिकर्मोपक्रमे प्रकृतसामर्थ्यान्न विरोध इति, यथा चैतत्तत्त्वं तथा विपंचितमध्यात्ममतपरीक्षायाम् । न चैवं स्वस्मिन्नुपक्रमणीयं कर्मानिश्चिन्वतो नाश्यानिश्चये नाशार्थिप्रवृत्त्यनुपपत्तिरिति शंकनीयम्, बलवतो नाश्यस्य संशयेपि सर्पादिदंशजन्यविषसंशये

तन्नाशार्थं भेषजपानादाविव विघ्नसंशयेपि तन्नाशार्थं मंगलकरणादाविव वा प्रवृत्त्यविरोधात् । अदृष्टजप्रवृत्तौ नाऽयनिश्चयानपेक्षाविरोध इत्यन्ये ॥ ४६ ॥ नन्वेवमपि परिशुद्धाज्ञायोगोऽदृष्टपरिपाकादेव, तुल्यसाधनानामप्यन्यतमस्यैवोदयात्, तथा च तद्धेतोरिति न्यायाददृष्टमेव फलहेतुरस्त्वित्याशंकां परिहरन्नाह ।

**एवं तुल्लबलत्तं उववण्णं दइवपुरिसगाराणं । अण्णोणसमणुविद्धा जं दोवि फलं पसाहंति ॥ ४७ ॥**

एवं उक्तरीत्या, दैवपुरुषकारयोः, तुल्यबलत्वं समप्राधान्येनैककार्यहेतुत्वलक्षणम्, उपपन्नं भवति, यद् यस्मात्, द्वावप्येतौ, अन्योन्यसमनुविद्धौ परस्परोपगृहीतौ, फलं प्रसाधयतः, कर्मलक्षणस्य दैवस्य स्वरूपयोग्यताया आत्मरूपस्य च पुरुषकारस्य सहकारियोग्यताया घटकत्वात् ॥ ४७ ॥ एतदेव भावयति ।

**दारुसमं खलु दइवं पडिमातुल्लो अ पुरिसगारोत्ति । दइवेण फलक्खेवे अइप्पसंगो हवे पयडो ॥ ४८ ॥**

दारुसमं प्रतिमादलभूतकाष्ठसमम्, खलु निश्चये, दैवं तत्र प्रत्यक्षानुमानादिना दिव्यदृशा व्यवहारदृशा च फलयोग्यतानिश्चयात्, प्रतिमातुल्यश्च प्रतिमानिष्पादनक्रियासदृशश्च, पुरुषकारः, इतिः पादपूरणे, प्रागुक्तोपपत्तिहेत्वर्थो वा, न च "शक्तयः सर्वभावानां कार्यार्थापत्तिगोचरा" इति वचनात् कार्यानुपहितयोग्यतायां मानाभावात् किमजागलस्तनायमानेन पुरुषकारेणेति शंकनीयम्, कुतोपि हेतोः प्रतिमानुत्पत्तावपि दारुदले शब्दज्ञानप्रवृत्तिरूपस्य योग्यत्वव्यवहारस्यायोग्यत्वव्यवहारविलक्षणस्यागोपालांगनाप्रसिद्धत्वेन पराकर्तुमशक्यत्वात्, अत एव न दैवस्यैव प्राधान्यमित्याह । दैवेन कर्मणा, फलाक्षेपे पुरुषकारमनपेक्ष्य फलजननेऽभ्युपगम्यमाने, अतिप्रसंगो अनवाप्ताज्ञेपि मोक्षफलापत्तिलक्षणः, भवेत् प्रकटः सर्वलोकसिद्धः ॥ ॥ ४८ ॥ अथ न दैवमात्रमेव फलहेतुर्येनातिप्रसंगः स्यात्, किंतु विशिष्टदैवमेव तथेति शंकते ॥

**अह तं विसिट्ठमेवं तेण न दाणाइभेअणुववत्ती। अक्खिवइ पुरिसगारं तं नणु अण्णत्थ तुल्लमिणं॥४९॥**

अथ तत् दैवम्, विशिष्टं विलक्षणशक्तिमदेव, एवं अधिकृतफलहेतुः, तेन दानादेः सकाशात् आदिना हिंसादिग्रहः, यो भेदः पुण्यपापोत्कर्षापकर्षलक्षणः, तदनुपपत्तिर्न भवति, सर्वास्तिकसम्मततदनुपपत्तिर्हि प्रकृतिरेवैकाकारा शुभाशुभरूपासु क्रियासु व्याम्रियत इति निर्युक्तिकसांख्यमतमास्थितानां पुरुषकारवादिभिर्दातुं शक्येत अध्यात्मभेदं विना तदनुपपत्तेः, तथा च पठंति ते "अभिसंधेः फलं भिन्नमनुष्ठाने समेऽपि हि। परमो नः स एवेह वारीव कृषिकर्मणि ॥" इति, यदि चोत्कृष्टापकृष्टशुभाशुभानुबंध्यध्यात्मकारिदैवभेद एवेष्यते, तदा नायं दोषावकाश इति, एतदेवाह तत् अधिकृतदैवम्, पुरुषकारं नियताभिसंधिकप्रयत्नरूपम्, आक्षिपति नियतफलजननाय व्यापारयति, समाधत्ते नन्वित्यक्षमायाम्, अन्यत्र पुरुषकारे, तुल्यमिदम्, शक्यं ह्येतत् पुरुषकारवादिनापि वक्तुं पुरुषकार एव तथास्वभावत्वात् कर्मोपक्रम्य शुभमशुभं वा फलं जनयतीति, दैवेन पुरुषकारस्येव तेन दैवस्यापि किंकरवद्बले गृहीत्वा व्यापारयितुं शक्यत्वात्। तदिदमाह। "तारिसयं चिय अहयं सुहाणुबंधे अज्झप्पकारित्ति। पुरिसस्स एरिसत्ते तदुवक्कमणम्मि को दोसो[८३] ॥" ४९ ॥ एतदेव भावयति।

**जह कम्मसंतई इह तह तह परिणामिणित्ति मण्णंति। तह पुरिसगारधारा जुत्ता परिणामिणी वोत्तुं॥५०**

यथा कर्मसंततिः स्वहेतोर्लब्धातिशया एकाश्रया कर्मपरिणामश्रेणी, तथा तथा परिणामिनी स्वाश्रयाऽपृथग्भूतप्रतिनियतफलजननी, इति मन्यन्ते कर्मवादिनः, तथा पुरुषकारधारा जीवव्यापारसंततिः, युक्ता परिणामिनी प्रतिनियतफलजननी, वक्तुम्, उत्तरोत्तरपुरुषकारे पूर्वपूर्वपुरुषकारादतिशयाधानोपपत्तेः, अथैवं पुरुषकारस्य तत्तत्फलं प्रति विलक्षणशक्ति-

[८३] तादृशं चैवाहतं शुभानुबन्धमध्यात्मकारीति। पुरुषस्यैतादृशत्वे तदुपक्रमणे को दोषः॥

मत्त्वेन हेतुत्वे पुरुषकारत्वेन सामान्यहेतुत्वभंगप्रसंगः, किंचैतादृशशक्तिकल्पनमुदासीनपदार्थेपि सुवचम्, अपिचैवं तत्क्षणविशिष्टकार्ये तत्क्षणस्य हेतुत्वात् स्वाश्रितकार्ये चाश्रयस्य तथात्वादनतिप्रसंगात् कारणांतरविलयप्रसंग इति चेत्, कर्मवादेऽपि तुल्यमेतदखिलदूषणजालम्, यदि च व्यवहारादिना कर्मत्वेनैव कर्मणो जन्यमात्रहेतुत्वस्वीकारान्न दोषः, हेत्वंतरोपनिपातेन फलविशेषोपपत्तेरिति विभाव्यते, तदा पुरुषकारेपि तुल्यमेतत्, सर्वत्र कालादिकलापजन्यत्वस्य संमत्यादिसिद्धत्वात्, नचैवं द्व्यणुकादिहेतुपुरुषकाराश्रयतयेश्वरसिद्ध्यापत्तिः, तद्धेतुकर्माश्रयतयाऽपि पुरुषांतरसिद्ध्यापत्तेः, संबंधविशेषेण शक्तिविशेषेण वा जीवगतकर्मणा एव सकलकार्योपपत्तौ त्वन्यत्राप्येवं सुवचत्वादित्यन्यत्र विस्तरः ॥ ५० ॥ उपसंहरन्नाह ।

**तह्मा उ दोवि हेऊ अविसेसेणं परोप्परं मिलिआ। मोक्खोवि कम्मजणिओ विभागरूवो जमेयस्स॥५१**

तस्मात्तु द्वावपि दैवपुरुषकारौ, हेतू फलजनकौ, अविशेषेण समप्राधान्येन, परस्परं मिलितौ अन्योन्यमुपगृहीतौ, ननु नानयोर्नियतं परस्परमिलनमस्ति, मोक्षे व्यभिचारात्, धर्माधर्मक्षयरूपत्वेन तत्र कर्मणोऽव्यापारादित्यत्राह । मोक्षोपि कर्मजनितो यद् यस्मात्, एतस्य कर्मणो विभागरूपः स्वल्वयम्, स चात्मानुयोगिकः कर्मप्रतियोगिकश्चेति कर्माप्यत्र प्रतियोगितया हेतुरेव, वस्तुतः पूर्वकृतस्य तावद्व्यापारसंबंधेन मुक्तिहेतुत्वं नानुपपन्नम्, व्यवहारेण तपःसंयमनिर्ग्रंथप्रवचनानां त्रयाणामेवांतर्बहिर्वृत्त्या दैवपुरुषकाररूपेण हेतुत्वानुज्ञानात्, तथा च आगमः । "तव संजमो अणुमओ णिग्गंथपवयणं च ववहारो[८४] ॥" समयस्यावधिनियामकत्वाच्च नातिप्रसंग इति, तदिदमाह "उभयतहाभावो पुण सम्मओ णवरंति[८५]" ॥

---

८४ तपः संयमोऽनुमतो निर्ग्रन्थप्रवचनं च व्यवहारः ॥

८५ उभयतथाभावः पुनः सम्मतो नवरमिति ॥

॥ ५१ ॥ नन्वेवं सर्वं कार्यं स्याद्दैवकृतम्, स्याच्च पुरुषकारकृतमिति स्याद्वाद एव सिद्धः, तथा च कथं सर्वलोकसम्मतो विविक्तव्यवहार इत्याशंक्याह ।

**ववहारो पुण एत्थ गुणप्पहाणत्तणेण पविभत्तो । कज्जमिणं दइवकयं एयं पुण पुरिसजणियंति॥५२॥**

इदं कार्यं दैवकृतम् एतत् पुनः पुरुषजनितं पुरुषकारकृतम्, इति व्यवहारः पुनरत्र विषये, गुणप्रधानत्वेन अन्यतराल्पत्वबहुत्वलक्षणेन, प्रविभक्तो भिन्नविषयतया व्यवस्थितः, तथा हि अल्पप्रयाससाहाय्येन फलमुपनयमानेन कर्मणा जनितं दैवकृतमिति व्यपदिश्यते, बहुप्रयाससाहाय्येन फलमुपनयमानेन च तेन जनितं पुरुषकारकृतमिति, अथवा अल्पकर्मसहकृतपुरुषकारजन्यं पुरुषकारकृतमिति व्यपदिश्यते, बहुकर्मसहकृतपुरुषकारजन्यं च दैवकृतमिति, विनिगमकाभावादित्थं प्रज्ञापनयोर्भेदात्, व्यवहारनयव्युत्पत्तिविशेषाच्चैवं विशेष्योपस्थितेः, सामान्यशब्दानामपि क्वचिद्विशेषपरत्वसंभवात्तदिदमाह। "ववहारो वि हु दोण्हवि इह पाहणादि णियुत्तो ॥ जमुदग्गं थेवेणं कम्मपरिणामयासेण ॥ तं दइवो विवरीयं तु पुरिसगारो मुणेयव्वो । अहवप्पकम्महेऊ ववसाओ होई पुरिसगारो त्ति ॥ बहुकम्मणिमित्तो उण अज्झवसाओ दइवो त्ति[८६]" ॥ नन्वल्पत्वं बहुलं वा न प्रकृतव्यवहारांगम्, अलपस्याप्युत्कटस्य स्वकार्यक्षमत्वात् बहोरप्यनुत्कटस्याकिंचित्करत्वात्, व्यपदिश्यते च बहुतरेणापि प्रयत्नेन जनिते दरिद्रकुरूपकुशीलोपहतेंद्रियधिग्जातीयराज्यलाभादौ दैवकृतत्वव्यपदेशः, तत्र दैवस्यैव बहुत्वं कल्प्यत इति न दोषः इति चेत्, न, कार्यगतविशेषासिद्धौ तदसिद्धेः, उत्कटत्वस्य तु परिणामविशेषप्रयोज्यस्यानपाय-

---

८६ व्यवहारोऽपि खलु द्वयोरपि इह प्राधान्यान्नियुक्तः । यदुदग्रं स्तोकेन कर्मपरिणामायासेन ॥ तद्दैवं विपरीतं तु पुरुषकारो ज्ञातव्यः । अथवाल्पकर्महेतुर्व्यवसायो भवति पुरुषकार इति ॥ बहुकर्मनिमित्तं पुनरध्यवसायो दैवमिति ॥

त्वात्, बहुत्वाल्पत्वपदाभ्यामुत्कटत्वानुत्कटत्वे एवोच्येते इति को दोष इति चेत्, न । तथापि कालांतरीयप्रयत्नापेक्षयोत्कटेनेदानींतनाल्पदैवेन जनिते दैवकृतत्वव्यपदेशापत्तेः, इदानींतनत्वस्य प्रयत्नविशेषणत्वान्न दोष इति चेत्, न, तथापि परकीयप्रयत्नमादाय तद्दोषतादवस्थ्यात्, स्वसमानाधिकरणत्वस्यापि विशेषणान्न दोष इति चेत्, न, तथापि कालांतरीयदैवमादाय तद्दोषतादवस्थ्यात्, स्वसमानकालीनत्वस्यापि विशेषणत्वान्न दोष इति चेत्, न, तथापी तरावधारणार्थप्रतिषेधानुपपत्तेः, न दैवकृतमित्यत्र स्वसमानाधिकरणस्वसमानकालीनपुरुषकाराधिकदैवस्याप्रसिद्धत्वेन तज्जनितत्वस्य निषेद्धुमशक्यत्वादिति चेत्, अत्र ब्रूमः, प्रकृते एतत्कार्यजनकदैवे निरुक्तपुरुषकाराधिकत्वाभावान्वयात् कार्यविशेषापेक्षनिरुक्ताधिक्याबाधाद्वा न दोषः, एकस्यापि भावस्य द्रव्याद्यपेक्षया विचित्रत्वात्तथैव वस्तुस्थितेः, शबलत्वेनानांशिकस्याप्यांशिकत्वाविरोधात्, यत्तु दैवजनितत्वादिकं चैत्रप्रभवत्वादिवज्जातिविशेष एवेति, तन्न, सर्वत्रैव दिव्यदृशा तदवधारणात्, व्यावहारिकं तद्भिन्नमेवेति चेत्, न, व्यवहारस्य विषयसंकोचमात्रेणैवोपपादनादधिककल्पनायां मानाभावात् ॥ ५२ ॥ प्रकारांतरेण व्यवहारमुपपादयन्नाह ।

**अहवाभिमाणमत्तं ववहारो णय ण एस तच्चंगं। णियविसयदीवणत्थं इच्छाजणिओ जमाभिमाणो॥५३**

अथवा अभिमानमात्रं इतरनिषेधांशे बाधितविषय एव, व्यवहारो दैवकृतमिदं नतु पुरुषकारकृतमित्यादिलक्षणः, नन्वेवमुभयनयसमाजरूपस्याद्वादवाक्यजन्यसमूहालंबनज्ञानविरोधित्वादपारमार्थिकोऽयं स्यादित्यत्राह नचैष व्यवहारो न तत्वांगं यद् यस्मात्, अभिमानः प्रकृतभ्रमलक्षणः, निजविषयस्य अल्पाभावविवक्षालक्षणस्य स्वसाध्यस्य, दीपनार्थं आविर्भावाय, इच्छाजनितः स्वरससिद्धः, व्यवहारनयाहितवासनावंतो हि क्वचन कार्ये दैवजनितत्वं प्रतिसंदधानास्तुल्यवित्तिवेद्यतयाऽल्पप्रयत्नजन्यत्वमपि प्रतिसंदधति, ततोऽल्पाभाववचनस्य स्वसंप्रदायसिद्धत्वेनेष्टतया तत्साधनतया ज्ञातं तत्र तदभाव-

ज्ञानमिच्छंति, ततश्चेष्टतत्साधनसंकल्पप्रवृत्तौ तथा जानंति, इतीच्छाजन्यमाभासिकं तदभावज्ञानं न तज्ज्ञानप्रतिबंधकम्, अनाहार्यतदभाववत्ताज्ञानस्यैव तद्वत्ताज्ञानप्रतिबन्धकत्वावधारणात्, युक्तं चैतत्, इत्थमेव स्वविषयप्राधान्यस्य संभवात्, आभासिकावधारणस्यैव प्राधान्यपदार्थत्वात्, इत्थमेव नयानामितरनयार्थनिराकरणमुपपद्यते, अन्यथेतरांशप्रतिक्षेपित्वेन दुर्नयत्वापत्तेरिति विवेचितं नयरहस्ये ॥ ५३ ॥ तदेवमाज्ञायोगत उभयसाम्राज्यसिद्धेः स एव श्रेयानिति विशिष्टफलमुखेनोपदिशति॥

**तम्हा आणाजोगो अणुसरियव्वो बुहेहिं जं एसो । कज्जलमिवप्पईवो अणुबंधइ उत्तरं धम्मं ॥ ५४ ॥**

तस्मात् उभयसाम्राज्यनियतत्वात्, आज्ञायोगोऽनुसर्त्तव्यो बुधैः मोक्षोपायानुसरणनिपुणैः, क्षणमप्यत्र न प्रमादो विधेय इति यावत्, यद् यस्मात्, एष सम्यग्दर्शनकालीन आज्ञायोगः, प्रदीपः कज्जलमिव उत्तरं धर्मं देशविरत्याद्यनुष्ठानम्, अनुबध्नाति संततया सन्निधापयति, प्रदीपस्थानीयं हि सम्यग्दर्शनम्, प्रकाशकत्वात्, कज्जलस्थानीयं चोत्तरधर्मम्, भावचक्षुर्निर्मलताधायकत्वात्, निर्वातस्थाननिवेशोचितश्चाज्ञायोगः, ततः कार्यानुबंधाविच्छेदादित्यवधेयम् ॥ ५४ ॥ उक्तमेव स्वपरसमयसंमत्या द्रढयति ॥

**एत्तोउ जोगसुद्धी गंभीरा जोगसंगहेसु सुआ । अज्झप्पबद्धमूला अण्णेहिं वि उवगया किरिया ॥५५॥**

इतस्तु इत एवाज्ञायोगपूर्वकानुष्ठानस्य सानुबंधत्वाद्धेतोः, दृष्टिशुद्धिः तत्सम्यग्दर्शननिर्मलता, गंभीरा अनुद्घाटमहानिधानमिवापरिकलनीयसारा, योगसंग्रहेषु साधुजनानुष्ठानसंग्राहकसिद्धांतालापकेषु द्वात्रिंशत्संख्येषु, श्रुता श्रवणगोचरीकृता, तथा अन्यैरपि तीर्थांतरीयैरपि, अध्यात्मतो वचनानुसारिमैत्र्यादिभावसंयुक्तचित्तात्मकात्, बद्धमूला सुघटितभूमिका, क्रिया उपगता, अध्यात्मविरहितायास्तस्या अबद्धमूलप्रासादरचनाया इव विपरीतफलत्वात् । युक्तं चैतदपि, अन्यथा

क्रियाभेदाभावेन दूरभव्यासन्नाभव्यादिभेदभाजां सत्वानां धर्मस्थानविशुद्धिभेदानुपपत्तेः ॥ ५५ ॥ अथ कीदृशमिदं कुतश्च जन्यत इत्याह ।



जेण विरहिआ किरिआ तणुगयरेणूवमा तमज्झप्पं । अणुबंधपहाणाउ सुद्धाणाजोगओ लब्भं ॥५६॥

येन विरहिता क्रिया बाह्यानुष्ठानात्मिका, तनुगतरेणूपमा शरीरारूढरजोराशिवदसदभिनिवेशग्रस्तत्वेन मालिन्यकारितयाऽत्यंततुच्छा, तत् क्रियाया ध्यानोपस्काररूपपरमविशुद्धिजनकताया घटकम्, अध्यात्मम्, अनुबंधप्रधानात् उत्तरोत्तरधर्मसंतत्यविच्छेदकारिणः, शुद्धाज्ञायोगाल्लभ्यम् ॥ ५६ ॥ नन्वयं केषां भवति, सम्यग्दृशामित्युक्तमेवेति चेत्, किमत्र नियामकम्, शुद्धाज्ञाया आर्हतश्रुतरूपायाः प्रागपि लाभसंभवादत आह ।

गंठिम्मि अभिन्नम्मी एसो पुण तत्तओ ण जीवाणं । नाणफलाभावाओ अन्नाणगुणा जओ भणियं॥५७

ग्रंथौ घनरागद्वेषपरिणामलक्षणे, अभिन्न अपूर्वकरणवज्रेणाकृतच्छिद्रे, एष शुद्धाज्ञायोगः, तत्त्वतोऽन्तर्वृत्त्या, न भवति, जीवानाम्, कुत इत्याह । ज्ञानफलाभावात् शब्दार्थमात्रगोचरश्रुतज्ञानसत्वेऽपि सूक्ष्मोहेन तत्वविचारणाभावात् तद्धि तत् फलम्, तदाहुः बुद्धेः फलं तत्त्वविचारणं चेति, ततोऽज्ञानगुणाद्धेयोपादेयविवेकशून्यत्वरूपतद्गुणसाम्राज्यात्, उक्तार्थे संमतिं प्रदर्शयति यतो भणितमागमे ॥ ५७ ॥

वेहपरिणामरहिए न गुणाहाणमिह होइ रयणम्मि । जह तह सुत्ताहाणं न भावओ भिन्नगंठिम्मि ॥५८॥

वेधपरिणामरहितेऽन्नातितमध्यच्छिद्रे प्रयोगपाटवादपि, न नैव, गुणाधानं सूत्रतंतुप्रवेशः, इह भवति, रत्ने पद्म- 

रागादौ, यथा तथा सूत्राधानं पारगतोदितागमन्यासलक्षणम्, न नैव, भावतः तत्त्ववृत्त्या भिन्नग्रंथौ जीवे, तत्राद्यापि सूत्राधानस्य सद्बोधसंपादकसामर्थ्याभावात्, तत्संपादनेन च तस्याविकलस्वरूपलाभसंभवादिति ॥ ५८ ॥ एतदेव सोदाहरणं भावयति ।

**इह दव्वसुत्तजोगा पायमसंता य भावओ संता। बालस्स बालभावे जह नाणं जह य तव्विगमे ॥ ५९ ॥**

इह द्रव्यसूत्रयोगाः प्रायोऽसंतः मणौ वेधपरिणामरहितेन गुणेन योगानामिव तत्प्रयोजनार्थिभिः पुंभिः संपाद्यमानानामपि तेषां बाह्यरूपतया मध्यप्रवेशविरहात्, स्वच्छंदतया मतिव्यापारेणेव जतुप्रभृतिनाश्लेषद्रव्येण रत्नस्य संयोजनेच्छाया विनाशस्येव मूलतो भ्रंशस्य संभवात्तदंतरेण च तत्र तस्यावस्थानस्थैर्याभावात्, प्रायोग्रहणेन चैतज् ज्ञापयति यदपुनर्बंधकादीनामाज्ञारुचीनां द्रव्यसूत्रयोगोपि व्यवहारेण तात्त्विकः, शुद्धबोधलाभावंध्यहेतुत्वादिति, यथोक्तं योगबिंदौ, "अपुनर्बंधकस्यायं व्यवहारेण तात्त्विक" इत्यादि, चः पुनरर्थो भिन्नक्रमश्च भावत इत्युत्तरं योज्यते, भावतश्च अविरतसम्यग्दृष्ट्यादीनां द्रव्यसूत्रयोगाभिन्नग्रंथितया मध्यप्रविष्टत्वेनावस्थानस्थैर्यात्, संतः, परमार्थसंतो निश्चयतो व्यवहारतश्च, तात्त्विकत्वात्, येषामपि मरुदेव्यादीनां व्यवहारतो नोपलभ्यंत एते, तेषामपि निश्चयत एतत्सत्त्वमभ्युपगंतव्यम्, तत्फलस्य संपन्नत्वात्, अत एवाद्ये पूर्वविद् इत्यादिकमुपपद्यते, केवलज्ञानप्राप्तियोग्यतयानुमीयमानस्याद्यशुक्लद्वयस्य तत्र भावतः पूर्ववित्त्वं विनाऽसंभवात्, अन्यथा सूत्रार्थानुपपत्तेरित्यादिकं विवेचितं लतादौ, इहापि चानुपदमेव गंठिम्मीत्यादिना विवेचयिष्यते किंचिदित्यवधेयम् । उक्तार्थे दृष्टांतमाह । बालस्य बालभावे यथा च तद्विगमे बालभावनाशेऽविकलतारुण्यप्राप्तौ, यथाहि बालस्य बालभावेऽक्षरवादौ न विवेकः समुज्जृम्भते, किंतु विषयप्रतिभासमात्रमेव भवति किंचिदिदमित्यादि, तद्वि-

गमे च तद्गतगुणदोषादिपरिज्ञानं हानोपादानफलं स्पष्टतरमुपलभ्यते, तथाऽभिन्नग्रंथीनां द्रव्यश्रुतप्रतिभासमात्रमेव भवति, असूक्ष्मप्रज्ञत्वात्, भिन्नग्रंथीनां तु हानोपादानफलं विशेषविषयं तत्परिपूर्णमेवेति, तदिदमाह "विसयपडिहासमित्तं बालस्सेव क्खरयणविसयंति । वयणाइमेसु नाणं सव्वच्छन्नाण मोणेयं ॥ १ ॥ भिन्ने तु इतो नाणं जहक्खरयणेसु तग्गयं चेव त्ति[८७] "॥५९॥ ननु भिन्नेपि ग्रंथौ माषतुषादीनां न विशदविमर्शवशोपलब्धविशुद्धतत्त्वतया शुद्धबोधः समुज्जृम्भते, अतिनिविडजडिमप्रग्र-चित्तत्वात्ततः कथं तत्र सूत्राधानसंभव इत्यत्राह ।

**गंठिम्मि विभिन्नंमी नाणं पडिबंधओ वि पडिपुण्णं । जह पाडिवओ चंदो पडिपुन्नो सुक्कपक्खम्मि ॥६०॥**

ग्रंथौ विभिन्ने प्रतिबंधतोपि तथाविधज्ञानावरणोदयकृतविघातसंभवेपि, ज्ञानं प्रतिपूर्णं अविकलमेव, "तमेव सच्चं णीसंकं जं जिणेहिं पवेइअं[८८]" ॥ इत्यादिश्रद्धानरूपया गीतार्थप्रज्ञापनीयत्वादिरूपया वा योग्यतया तुच्छस्यापि तज्ज्ञानस्य पूर्णत्वादिति भावः । स्वरूपतस्तुच्छस्यापि योग्यतया पूर्णत्वव्यपदेशे दृष्टांतमाह । यथा शुक्लपक्षे प्रातिपदः प्रतिपत्तिथिसंबंधी, चंद्रः प्रतिपूर्णः तदुज्ज्वलभावस्याचिरादेव संपूर्णोज्ज्वलभावसंपन्निमित्तत्वात्, तदिदमुक्तम्, "पडिवयम्मि विसुद्धादिभावओ सम्मरूवं तु" । ननु प्रतिपच्चंद्रस्तावदावरणैर्विमुच्यमानः सर्वथाऽनावृततया पूर्णीभवन् योग्यतया प्रागपि तथेति वक्तुं

---

८७ विषयप्रतिभासमात्रं बालस्येवाक्षररत्नविषयमिति । वचनादिषु ज्ञानं सर्वच्छन्नानां ज्ञेयम् ॥ भिन्ने तु इतो ज्ञानं यथा-क्षररत्नेषु तद्गतं चैवेति ॥

८८ तदेव सत्यं निःशंकं यज्जिनैः प्रवेदितम् ॥

८९ प्रतिपदि विशुद्धादिभावतः सम्यग्रूपन्तु ॥

युज्यते प्रकृते तु नैवम्, श्रुतज्ञानस्यैव प्रवर्द्धमानस्य केवलज्ञानपरिणामात्मकपूर्णतानुपपत्तेः, "नट्ठम्मि अ छाउमत्थिए नाणे"। इति वचनादिति चेत्, स्यादेवम्, यदि सर्वथा छाद्मस्थिकज्ञानानां नाशं ब्रूमः, न चैवमस्ति, किंतु विकलप्रकाशपरिणामेन नष्टा ध्रुवा चेतनैव केवलज्ञानतया परिणमते, इत्थमेव त्रैलक्षण्योपपत्तेरिति विभावनीयम्, इदमिह फलितं दूरभव्यादीनां द्रव्यसूत्रयोगाद् द्रव्यतः संतोपि भावतोऽसंतः, माषतुषादीनां च ते द्रव्यतोऽसंतोपि भावतः संतः, अविरतादीनां चोभयतोपि संतः, तद्बाह्यानां चोभयतोप्यसंत इति ॥ ६० ॥ एतस्य पूर्णतामेव हेतुना भावयति ।

**जमिणं होइ फलंगं दव्वेण असप्पवित्तिजुत्तं वि । अणुबंधच्छेयाओ सो खलु मूलं किलेसाणं ॥६१॥**

यद् यस्मात् इदं प्रतिबंधकालीनमपि श्रद्धादिसमन्वितभिन्नग्रंथिकज्ञानम्, द्रव्येण मनोरुचिविकलत्वलक्षणेनाप्रधानभावेन, असत्प्रवृत्त्या प्रबलावश्यवेद्यचारित्रमोहोदयादिंद्रियानुकूलाचरणरूपया, युक्तमपि फलांगं मोक्षलक्षणफलनिमित्तम्, भवति, कुत इत्याह अनुबंधो ज्ञानावरणादिपापप्रकृतीनां उत्तरोत्तरवृद्धिरूपस्तस्य छेदोऽवस्थितप्रकृतिष्वनुबंधजननशक्तिविघटनम्, विपर्याससाहित्याभावेन तथाविधशक्त्युपेताग्रिमकर्माजननं वा, ततः, किं तत इत्यत आह । सोऽनुबंधः, खलु निश्चये, मूलं क्लेशानां विपर्यासजलासिच्यमानानुबंधमूला एव हि क्लेशपादपा दुःखलक्षणाय फलाय कल्प्यंते, सम्यग्ज्ञानदहनदह्यमानमूलास्तु त्रुटितसकलसफलदानशक्तयो वंध्यभावापत्त्या असत्कल्पा एव जायंत इति, एवं चानुबंधच्छेदे क्लेशव्यवच्छेदात् सिद्धमविकलमोक्षफलत्वमेतज्ज्ञानस्येति ॥ ६१ ॥ अनुबंधस्यैव क्लेशमूलत्वात्तद्वर्जनमुपदिशति ।

**वज्जेयव्वो एसो अण्णह धम्मोवि सबलओ होइ । एयस्स पभावेणं अणंतसंसारिआ बहवे ॥ ६२ ॥**

---

९० नष्टे च छाद्मस्थिके ज्ञाने ॥

वर्जयितव्य एषः शुभप्रकृत्यनुबंधः, स्वकारणीभूतासत्प्रवृत्तिं निंदागर्हादिना साधुश्रावकसमाचारसमन्वितैः, अन्यथा, अशुभानुबंधवर्जनाभावे, धर्मोपि शबलकः अतिचारपंकमालिन्यकल्मषरूपतामापन्नः, भवति, महति दोषानुबंधे हि मूलगुणादिभंगरूपे विधीयमाने धर्मः स्वरूपमेव न लभतेऽल्पातिचारानुबंधे च भवन्नपि धर्मः शबलस्वरूप एव संभवतीति तात्पर्यम्, अधर्मस्तावत्तत्वतो भवत्येवेत्यपिशब्दार्थः, तथा एतस्य अशुभानुबंधस्य, प्रभावेण अप्रतिहतशक्तिकत्वेन, बहवोऽनंतसंसारिणः प्राप्तदर्शनाश्चतुर्दशपूर्वधरादयोपि इति दृश्यम्, श्रूयते हि प्राप्तदर्शनादीनामपि प्रतिपतितानां पुनस्तद्गुणलाभव्यवधानेऽनंतः कालः समये, तदुक्तम् । "कालमणंतं च सुए अद्धापरिअट्टओ अ देसूणो । आसायणबहुलाणं उक्कोसं अंतरं होइत्ति[९१] ॥" स चाशुभानुबंधमाहात्म्यं विना नोपपद्यते, न ह्यवश्यं वेद्यमशुभानुबंधमंतरेण, प्रकृतगुणभंगे पुनर्लब्धौ कियत्कालव्यवधाने कश्चिदन्यो हेतुरस्ति, ग्रंथिभेदात् प्रागप्यसकृदनंतसंसारार्जनेऽस्यैव हेतुत्वात्, तदाह । "गंठीओ आरओ वि हु असईबंधो ण अण्णहा होइ ॥ ताए सो वि हु एवं णेओ असुहाणुबंधोत्ति[९२] ॥" ननु शुद्धाज्ञायोगेऽपि चतुर्दशपूर्वधरादीनामशुभानुबंधाव्यवच्छेदान्नियतिपरिपाकमात्रसाध्ये कस्तद्वर्जनप्रयास इत्याशंक्याह ।

**एसो आणाजत्ता णासइ रोगो जहोसहपयत्ता । तप्पबलत्ते वि इमो जुत्तो अब्भासहेउत्ति ॥ ६३ ॥**

एषोऽशुभानुबंधः, आज्ञायत्नात् भगवदाज्ञाया नैरंतर्यादरसेवनात्, नश्यति, दृष्टांतमाह यथा रोग औषधप्रयत्नात्, न खल्वौषधं स्वरूपेणैव रोगव्यवहारच्छेदकरं किंतु हीनाधिकमात्रापरिहारतदुचितान्नपानादिप्रयत्नसहकृतम्, तथाज्ञायो-

९१ कालमनन्तं च श्रुते अर्धपरावर्त्तश्च देशोनः । आशातनाबहुलानां उत्कर्षमन्तरं भवतीति ॥

९२ ग्रंथित आरतोऽपि खलु असकृद्बन्धो नान्यथा । भवति तदपि सोऽपि खल्वेवं ज्ञेयः अशुभानुबन्ध इति ॥

गोपि स्वरूपमात्रान्नाशुभानुबंधविच्छेदकारी किं त्वनायतनवर्जनसदायतनसेवनापूर्वज्ञानग्रहणगुरुविनयाभ्युत्थानभक्तियशोवादवैयावृत्त्यतपःसंयमनिरंतरव्रतानुस्मरणादिप्रयत्नसहकृत एव, अत एव सर्वत्र भगवताऽप्रमाद एव पुरस्कृतः, "तच्चित्ते तम्मणे तल्लेस्से[९३]" इत्यादिनाऽत्युपयुक्तस्यैव भावावश्यकाभिधानादनुपयुक्तस्य चास्कलितादिगुणोपेतसूत्रोच्चारणेऽपि द्रव्यावश्यकाप्रच्यवात्, यदिचाद्याप्यशुभानुबंधो न व्यवच्छिन्नस्तदाज्ञायत्नोऽपि न लब्ध एवेत्यनुमीयते, नहि कारणं स्वकार्यमनुत्पादयत् स्वरूपमेव लभते, निश्चयतस्तस्य कुर्वद्रूपत्वात्, नन्वेवं प्राचीनाज्ञापालनस्य निष्फलत्वमापद्येतेत्यत आह । तत्प्रबलत्वेपि अशुभानुबंधस्य निकाचितत्वेनोपक्रमणायोग्यत्वेप्यागंतुकप्रमादयोगेनातिवृद्धत्वेपि वा आज्ञायत्नोऽभ्यासहेतुः औषधयत्न इव कुतोपि प्रमादात् क्रियोपचारे जातेऽनुभूते च तत्फले वेदनासहतल्लक्षणे पुनस्तत्प्राप्तिहेतुरिति, युक्त आश्रयणीयः, तदिदमुक्तम्, "खाओवसमिगलाभे दढजत्तकयं सुहं अणुट्ठाणं। परिवडिअं पि य हुज्जा पुणो त्ति तब्भाववुड्ढिकरं[९४]"॥ अत्र स्वोत्तरसजातीयाज्ञायोगे आज्ञायोगो हेतुः प्रतिबंधकाभावश्च सहकारीत्यादि विवेचितमन्यत्र ॥ ६३ ॥ औषधतुल्यत्वादेवाज्ञायोगस्य कालाकालौ विभावनीयावित्याह ।

**एत्तो अ एत्थ णेयं कालाकालेहि सहलविहलत्तं। घणमिच्छत्तमकालो कालोऽपुणबंधगाईओ ॥६४॥**

इतश्चौषधतुल्यत्वात्, अत्राज्ञायत्ने, कालाकालाभ्यां सफलविफलत्वं ज्ञेयम्, यथा ह्यकालप्रयोगेऽभिनवज्वरादावौषध

---

९३ तच्चित्तस्तन्मनास्तल्लेश्यः ॥

९४ क्षायोपशमिकलाभे दृढयत्नकृतं शुभमनुष्ठानम् । परिपतितमपि च भवेत् पुनरपि तद्भाववृद्धिकरम् ॥

प्रदानं तद्व्याध्युपशमं प्रत्यकिंचित्करत्वान्निःफलं समधिकबाधाविधायितया विपरीतफलं वा भवति, कालप्रयोगे चानीदृशत्वात् सफलमेव, तथा संसाररोगग्रस्तेष्वप्याज्ञाप्रदानमकाले निःफलं विपरीतफलं वा, काले तु फलवदेवेति । तत्र को नामाऽकालः कश्च काल इत्याह । घनं महामेघावलुप्तसकलनक्षत्रादिप्रभाप्रसरभाद्रपदाद्यमावास्यामध्यभागसमुद्भूतांधकारवन्निबिडम्, मिथ्यात्वं तत्त्वविपर्यासलक्षणमुपचारात्तत्कालश्चरमपुद्गलपरावर्त्तव्यतिरिक्तशेषपुद्गलपरावर्त्तलक्षणः, अकालो भगवदाज्ञौषधप्रयोगे चरमपुद्गलपरावर्त्तलक्षणस्तु तथाभव्यत्वपरिपाकतो बीजाधानादिषु स्यादपि कालः, अत एव दीक्षाविधानपंचाशके यथाप्रवृत्तकरणेनापचितदीर्घकर्मस्थितिकतया विशुद्ध्यमानस्यैव दीक्षाधिकारित्वमुक्तम्, " चरमंमि चेव भणिया एसा खलु पोग्गलाण परिअट्टे । सुद्धसहावस्स तहा विसुज्झमाणस्स जीवस्स[९५] " ॥ इति वचनेन, अत एवाह । कालस्त्वपुनर्बंधकादिकः अपुनर्बंधकादिकाललक्षणः, तत्रापुनर्बंधकः " पावं न तिव्वभावा कुणइ[९६] " इत्यादिलक्षणः, आदिशब्दात्, मार्गाभिमुख्यमार्गपतितौ गृह्येते, तत्र सार्धश्चेतसोऽवक्रगमनं भुजंगमनलिकायामतुल्यः, स्वरसवाही क्षयोपशमविशेषो हेतुस्वरूपफलशुद्धाऽभिमुखेत्यर्थस्तत्र पतितः प्रविष्टो भव्यविशेषो मार्गपतित इत्युच्यते, तदादिभवापन्नश्च मार्गाभिमुख इति, एतौ च चरमयथाप्रवृत्तकरणभागभाजावेव, यद्यप्यत्र त्रयोप्येकरूपा एव लभ्यंते, तथापि चैत्यवंदनपंचाशकवृत्तौ अभयदेवसूरिभिर्भाववंदनाधिकारितायामपुनर्बंधकवदेतावनधिकृतौ सकृद्बंधकादिवत् पृथक्कृतौ चेत्यस्माभिरपि व्यावर्त्तमानावेतौ विवक्षाविषयीकृत्य " गंठिमया " इत्यादिनाऽप्रधानावुक्ताविति यथाशास्त्रं परिभावनीयं सुधीभिः ॥ ६४ ॥ अयं च व्यवहारतः का-

९५ चरमे चैव भणिता एषा खलु पुद्गलानां परावर्त्ते । शुद्धस्वभानस्य तथा विशुद्ध्यमानस्य जीवस्य ॥
९६ पापं न तिव्रभावात् करोति ॥

ल उत्कोऽथ निश्चयतस्तमाह ।

**णिच्छयओ पुण कालो णेओ एअस्स गंठिभेअम्मि । पोग्गलपरिअट्टद्धं जमूणमेयम्मि संसारो ॥६५॥**

निश्चयतो निश्चयनयमतेन, पुनः एतस्य आज्ञायोगस्य, कालो ग्रंथिभेदे अपूर्वकरणानिवृत्तिकरणाभ्यां ग्रंथिभेदसमय एव, कथमित्याह । यत् यस्मात् तस्मिन् ग्रंथिभेदे, ऊनं देशोनम्, पुद्गलपरावर्त्तार्द्धं संसारः उत्कृष्टोप्येतावानेव नाधिक इत्यर्थः, तथा चात्राज्ञौषधविधानं कर्मरोगस्यादीर्घस्थितिकत्वप्रभावेन विधिना सदानुपाल्यमानं गुणाय भवति अन्यथापि सदभ्यासहेतुतया तथैव प्रतिबंधस्यापि तत्त्वतः फलकालोपनायकत्वात्, तथा च पठ्यते "लब्ध्वा मुहूर्त्तमपि ये परिवर्जयंति सम्यक्त्वरत्नमनवद्यफलप्रदायि ॥ यास्यंति तेऽपि न चिरं भववारिराशौ तद्बिभ्रतां चिरतरं किमिहास्ति वाच्यम् ॥ १ ॥" इति । अपुनर्बंधकादीनां चानाभोगबहुलत्वेन सूक्ष्मबोधानाधायकत्वान्न तथेति पर्यवस्थितम् ॥ ६५ ॥ परः प्रश्नयति ।

**एवमकालपओगे कह गेवेज्जगसुहं णु सुअसिद्धं । णणु तं जोगप्पभवं ण उ परिणामेण को दोसो ॥६६॥**

एवमकालप्रयोगस्य गुणाहेतुत्वे, अकालप्रयोगे तथाभव्यत्वापरिपाकलक्षणेऽकाले आज्ञायोगोपक्रमलक्षणे, कथं ग्रैवेयकसुखं तु इति वितर्के श्रुतसिद्धं दूरं भव्यानामभव्यानां चेति द्रष्टव्यम्, श्रूयते च श्रुते "तित्थंकराइपूअं दट्ठूणण्णेण वा वि कज्जेण । सुअसामाइअलाभो होज्ज अभव्वस्स गंठिम्मि[९७] ॥" ततश्च । "जे दंसणवावण्णा लिंगग्गहणं करेंति

---

९७ तीर्थंकरादिपूजां दृष्ट्वाऽन्येन वापि कार्येण । श्रुतसामायिकलाभो भवेदभव्यस्य ग्रन्थौ ॥

सामण्णे । तेसिं चिय उववाओ उक्कोसो जाव गेविज्जा९८ ॥ " इति, अत्रोत्तरं विधीयते । नन्विति परपक्षाक्षमायाम्, तत्
ग्रैवेयकसुखम्, दूरभव्यादीनां योगप्रभवं क्रियौषधयोगमात्रजनितम्, न तु परिणामेन आयतिकालशुभानुबंधेन, यथाहि सद्दोष-
धर्मकालप्रयोगात् क्षणमात्रं स्वसंबंधसामर्थ्यादसाध्यव्याधौ सौख्यमुपनयति तदनंतरं च समधिकव्याधिप्रकोपाय संपद्यते,
एवमधिकृताज्ञायोगौषधप्रयोगोऽप्यपक्वभव्यत्वानां सत्वानां ग्रैवेयकादिसुखसिद्धिमात्रमाधाय पश्चात् पर्यायेण नरकादिदुर्गति-
प्रवेशफलः संपद्यत इति, को दोषः प्रकृते, न कश्चिदित्यर्थः, यदि हि परिणामतः सुखं मोक्षलक्षणतः स्यात्तदा स्यादपि
व्यभिचारलक्षणो दोष इदं त्वापातमात्रसुखं न फलं किंत्वानुषंगिकं कृषेरिव पलालमिति भावः ॥ ६६ ॥ वस्तुतो नेदं सु-
खमपीति द्रढयति ॥

**ण य तं पि अंतरंगं अविद्धतंबे सुवण्णवण्णोव । विसवारिअस्स जह वा घणचंदणकामिणीसंगो ॥ ६७ ॥**

न च तदपि दूरभव्यादीनामाज्ञायोगजनितं ग्रैवेयकादिसुखमपि, अंतरंगं अभ्यंतरपरिणामप्राप्तम्, अंतर्दारुणमिथ्या-
त्वकालानलज्वलितचित्ततया बहिरेव तेषामौषधपरतंत्रस्येव भोगात् सुखस्योत्पत्तेः, तत्र दृष्टांतमाह । अविद्धे सिद्धपार-
दादिनाऽकृत[illegible]व्यवेधे, ताम्रे केनचिदौषधयोगादिना बहिर्जनितः सुवर्णवर्ण इव सुवर्णसदृशवर्ण इव, तदीयजीवद्रव्यताम्रस्य
शुद्धाज्ञानैरंतर्यादरसिद्धपारदेनाविद्धमध्यत्वादाज्ञाभ्यासमात्रेण च बहिरेव वेधाद्बहिरवच्छेदेनैव सुखोत्पत्तेरंतरवच्छेदेन तद-
योगात्, बहिरिंद्रियसुखपरिणत्यांतस्तृष्णाया एवाधानात् । दृष्टांतांतरमाह यथा वा विषवारितस्य हलाहलव्याप्तस्य, घनं ब-
हुलम्, चंदनं कामिनी च युवती, तयोः संगः सर्वांगीणसंबंधः, कार्ये कारणोपचारात् तज्जन्यसुखमित्यर्थः, यथाहि तस्य

९८ ये दर्शनव्यापन्ना लिंगग्रहणं कुर्वन्ति श्रामण्ये । तेषामेवोपपात उत्कर्षो यावद् ग्रैवेयकम् ॥

तदव्यक्तीभूतं व्यक्तविषवेदनाभिभूतत्वात्तत्त्वतोऽसुखमेव, तथाहि मिथ्यादृष्टेर्मिथ्यात्वविषजनिततृष्णावेदनाभिभूतत्वाच्चक्रवर्त्यादिपदवीमाप्तावपि तत्त्वतोऽसुखमेवेत्यर्थः ॥ ६७ ॥ दृष्टांतांतरमाह ।

**जह वा दहस्स सारयरविकिरणकयं जलस्स उण्हत्तं। अंधो जहा ण पासइ तह न कुदिट्ठी सुहं लहइ॥६८**

यथा वा ह्रदस्य शारदरविकिरणकृतं शरत्कालीनकठोरतरणिकिरणतापाहितम्, जलस्योष्णत्वं बहिरेव हि तदुपलभ्यते मध्ये पुनरतिशीतलभाव एव गंभीरत्वादेवं हि मिथ्यादृष्टेरपि वैषयिकं बहिरेव सुखं अलब्धमध्यपारमिथ्यात्वयोगाच्चांतःपरिणत्या दुःखमेव । दृष्टांतांतरमाह । यथांधो न पश्यति तथा कुदृष्टिर्मिथ्यादृष्टिः सुखं न लभते यादृशो ह्यंधपुरुषस्य प्रासादशय्यासनवसनवनितादिभोगोऽनुपलब्धतत्त्वरूपस्य दिदृक्षाऽपूर्त्त्याभोगप्रायः तथा मिथ्यादृष्टेरपि राज्यादिसुखभोगोपि मिथ्यात्वदोषकृतलिप्साऽपूर्त्त्याऽभोगप्राय एवेति भावः, नन्वेवमिच्छापूर्त्त्या मिथ्यादृष्टेरिच्छाविच्छेदजन्यरतिरूपसुखाभावे प्रतिपाद्यमाने सम्यग्दृष्टेरपि न कथमयं स्यात्तस्यापि लोभाव्यवच्छेदादिति चेत्, न, तस्य तदव्यवच्छेदेऽप्यनंतानुबंधिपरिणामव्यवच्छेदात्तृष्णाप्राबल्यदशायामपि सूक्ष्मतया शमसुखावस्थानात् सर्वथा तदभावायोगात्, न च कादाचित्कोऽरतिपरिणामोप्यस्य मिथ्यादृष्टितुल्यो नोकषायाणां कषायानुयायित्वात्, अपि च ज्ञानमूर्त्तिरात्मैवेष्टविषयस्पर्शं प्राप्य सुखतया परिणमते मिथ्यादृष्टिश्च ज्ञानविपर्ययात्मेति सुखविपर्ययमेव परिणमेत् तदाहुः । "कत्थइ न नाणमेअस्स भावओ तम्मि असइभोगो वि । अंधलयभोगतुल्लो पुव्वायरिआ तहा पाहु[९९] ॥ सदसदविसेसणाओ भवहेऊ जहिच्छिओवलंभाओ । नाण-

---

[९९] कथ्यते न ज्ञानमेतस्य भावतस्तस्मिन्नसकृद्भोगोऽपि । अन्धभोगतुल्यः पूर्वाचार्यास्तथा प्राहुः ॥

फलाभावाओ मिच्छद्दिट्ठिस्स अन्नाणमिति१०० ॥" अथ दुष्टावधारणत्वात्तज्ज्ञानस्य विपरीतत्वेपि तत्सुखस्यातथात्वं तु कथं विपरीतत्वमिति चेत्, न, सुवर्णघटापेक्षया मृन्मयघट इव कूटदलपरिणामस्वरूपस्यैव वैपरीत्यस्य संभवात् ॥ ६८ ॥ उक्तार्थपरिज्ञानार्थमेव सम्यग्दृष्टिसुखस्वरूपं निरूपयति ।



**साभाविअं खलु सुहं आयसभावस्स दंसणेऽपुव्वं । अणहीणमपडिवक्खं सम्मद्दिट्ठिस्स पसमवओ ॥६९**

स्वाभाविकं अविकृताभ्यंतरपरिणतिप्रादुर्भूतम्, खलु निश्चये सुखं आत्मस्वभावस्य दर्शने निखिलपरद्रव्यव्यावृत्तस्वस्वरूपस्य विगलितवेद्यांतरानुभवे, अपूर्वं प्रागप्राप्तजातीयम्, सदा शैवलपटलाच्छन्नहृदजलचारिणो मीनस्य कदाचिच्छिद्रिलये राकाशशांकदर्शनजनितसुखतुल्यम्, तद्धि तन्मात्रप्रतिबंधविश्रांतचित्ततयाऽत्युत्कटपरिणतिकत्वेनेतरसुखातिशायि, तथा अनधीनं अपरायत्तम्, निरंतरस्वपरिणतिधारापतितत्वादित्थमपीतरकारणस्पृहोत्सुक्याभावादितरसुखातिशायित्वमव्याहतम्, तथा अप्रतिपक्षं दुःखोपनिपातेऽपि स्वभावभावनाबलेनांतरव्याहतत्वादित्थमप्यन्यातिशायित्वं स्पष्टमेव, कस्येत्याह सम्यग्दृष्टेः प्रशमवतोऽनंतानुबंधिविलयप्रादुर्भूतप्रशमगुणभाजः ॥ ६९ ॥ स्वाभाविकसुखस्य बाह्यकारणानपेक्षायां दृष्टांतमाह ।

**तिमिरहरा जइ दिट्ठी जणस्स दीवेण णत्थि कायव्वं । तह सोक्खं सयमाया विसया किं तत्थ कुव्वंति॥७०**

तिमिरहरा स्वत एवांधकारनिकुरंबप्रसरेप्यलुप्तशक्तिका यदि दृष्टिर्जनस्य तदा दीपेन नास्ति कर्त्तव्यं प्रयोजनं तिमिरनाशमात्रप्रयोजनत्वात्तस्य, तथा स्वयमेवात्मा सौख्यं सुखपरिणतो यदि सम्यग्दर्शनप्रभवप्रशमपरिस्कृतत्वात्तदा विषयाः

१०० सदसदविशेषणात् भवहेतुयादृच्छिकोपलम्भात् । ज्ञानफलाभावान्मिथ्यादृष्टेरज्ञानमिति ॥

किं तत्र आत्मनि कुर्वीति, तत्कार्यस्य स्वत एव जातत्वात्, इयं च प्रवचनसारसंबंधिनी गाथा प्रकृतोपयोगिनीति चात्र लिखिता ॥ ७० ॥ एवमस्याभ्यंतरसुखे मिथ्यात्वक्षयोपशमादिजन्यज्ञानपरिणामरूपे मानसे प्रवर्त्तमाने कायिकादिकं बाह्यं सुखं कथं स्यादित्याह ।

**अंतरधारालग्गे सुहम्मि बज्झं पि सुक्खमणुवडइ । जह नीरं खीरम्मि णिच्छयओ भिन्नरूवं तु ॥७१॥**

अंतरधारालग्ने मानसपरिणतिसंततिपतिते, सुखे बाह्यमपि स्रक्चंदनांगनासंगादिजनितं वहिरविच्छिन्नमपि, सौख्यमनुपतति एकसंतानगततया ऐक्यपरिणामं बिभर्त्ति, दृष्टांतमाह यथा क्षीरे नीरं निश्चयतः परमार्थग्राहिनयमतेन, भिन्नरूपं तु भिन्नस्वभावमेव, एकाश्रययोरपि रूपरसयोरिव बाह्यांतरसुखपरिणामयोर्विलक्षणत्वात् सादृश्यमात्रेणैकत्वव्यवहारात्, कथमुभयोरेकदावस्थानमिति चेत्, बहिरंतरवच्छेदभेदादनुभवसिद्धं चैतदिति विवेचितमिदमन्यत्र ॥ ७१ ॥ इत्थं च विलक्षणमिदमाभ्यंतरं सुखं नास्ति मिथ्यादृशां तत्संपर्काभावाच्च बाह्यमपि न तादृशमिति निगमयन्नाह ।

**ण य एयं अण्णेसिं बज्झं पि न हंदि तेण तत्तुल्लं । उत्तमसंगविसेसा तणं हि कणगं सुरगिरिंमि ॥ ७२॥**

न चैतत् आभ्यंतरं सुखम्, अन्येषां मिथ्यादृशाम्, तथाक्षयोपशमाभावात्, तेन आभ्यंतरसुखाभावेन, हंदीत्युपदर्शने बाह्यमपि न तत्तुल्यं न सम्यग्दृष्टिबाह्यसुखतुल्यम्, अविशिष्टे विशिष्टसंगजनितवैशिष्ट्ये दृष्टांतमाह । तृणं हि सुरगिरावुत्तमसंगविशेषात् कनकमिति व्यपदिश्यते, एवं बाह्यसुखमपि विशिष्टांतरसुखसंवेधादेव विशिष्येत नचैवं मिथ्यादृष्टावस्तीति कथं तत्सुखं विशिष्यताम्, युक्तं चैतदित्थमेव तद्धेतुपुण्यप्रकृतिभेदोपपत्तेः, तदेवमकालप्रयोगाद्भवदपि मिथ्यादृशां ग्रैवेयकादिसुखं न तत्त्वतः सुखमित्युपपन्नम् ॥ ७२ ॥ अथोपसंहरन्नाह ।

**णाऊण इमं सम्मं आणाजोगे पवट्टए मइमं । तिव्वाभिग्गहधारी रक्खंतो ते सुपरिसुद्धे ॥ ७३ ॥**

ज्ञात्वा इदमविध्यकालाभ्यां प्रयोगे महादोषः आज्ञायोगे सम्यग्विधिना काले च प्रवर्त्तते प्रतिक्षणमप्रमादलक्षणेन प्रकर्षेण वर्त्तते मतिमान् धर्मानुप्रेक्षी, अप्रमादार्थमेव तीव्रकोपवेदोदयादिकमात्मदोषं विज्ञाय क्षेत्रकालाद्यौचित्येन तन्निग्रहसमर्थवीर्ययोगे तीव्राभिग्रहधारी क्षमाशरीराप्रतिकर्मत्वाद्युत्कटाभिग्रहधरणशीलः, न क्षमं हि मुमुक्षूणां क्षणमपि निरभिग्रहाणामवस्थातुं न चाभिग्रहाग्रहणमात्रत एव फलदायिनो भवंति किं तु परिपालनयेत्यत आह रक्षयन् तान् गृहीताभिग्रहान्, सुपरिशुद्धान् सर्वातिचारपरिहारेणातिनिर्मलान् ॥ ७३ ॥ नन्वभिग्रहपालनेऽपि बाह्यविषयासिद्धौ कथं फलप्राप्तिः स्यादित्यत आह । ७४गा०

**विसयम्मि अपत्तेवि हु णियसत्तिप्फोरणेण फलसिद्धी । सेट्ठिदुगस्साहरणं भावेयव्वं इहं सम्मं ॥७४॥**

विषये इष्टार्थे, अप्राप्तेऽपि हि प्रतिबंधहेतोरनुपतनेऽपि हि, निजशक्तिस्फोरणात् निजपराक्रमस्य नैरंतर्येण प्रवर्त्तनात्, फलसिद्धिः विपुलनिर्जरालाभः, शक्त्यनिगूहनसहकृतभावस्यैव तत्त्वतः फलहेतुत्वादिष्टाप्राप्तावप्यदीनमनस्कतया शुभपरिणामानुबंधाविच्छेदात्, इह प्रकृतविषये, श्रेष्ठिद्विकस्य जीर्णाभिनवश्रेष्ठियुगलस्य, आहरणं निदर्शनम्, सम्यग्भावितव्यम्, तथाहि इह किलैकदा भगवान् श्रीमहावीरश्छद्मस्थतया विहरन् वैशाल्यां पुरि वर्षासु तस्थौ कामदेवायतने, ततश्च तं प्रतिमास्थितं मंदरमिव निःप्रकंपं निरंतरं लोचनगोचरीकुर्वतो जीर्णश्रेष्ठिनो भक्तिरतीव प्रादुर्भूता, अन्यदा चतुर्मासकलक्षणस्य विकृष्टतपसः पारणकदिने मनोरथः प्रवृत्तोऽस्य महाभागस्य, यदि भगवानद्य प्रतिलाभयति मां तदा जनुरखिलमपि सफलं गणयामीति, एवं प्रवर्द्धमानशुभपरिणामो गृहद्वारावलोकनादिविनयपरो यावदसावास्ते तावद्भगवानप्रतिबद्धशिरोमणिरन्यत्रा-

भिनवश्रेष्ठिगृहे प्रविष्टः, दापिता च तेन स्वमाहात्म्यौचित्येन तस्मै भिक्षा, कृता च तद्गृहे संनिहितैर्जृंभकदेवैरर्हत्पारणकोचिता वसुधारा वृष्टिः, ततोऽसौ लोके कृतपुण्यक इति महतीं प्रशंसां प्राप, अन्यदा पार्श्वापत्यस्य केवलिनः कस्यचिदागमे तत्पुरो बहुलकुतूहलाकृष्टचेतसा लोकेन पृष्टम्, कतमोऽत्र पुरे कृतपुण्यो भगवन्निति, भगवता चाभिदधे जीर्णश्रेष्ठीति, अत्र हि जीर्णश्रेष्ठिन इच्छारूपोऽभिग्रहः प्रवृत्त इच्छाप्रवृत्तिस्थैर्यसिद्धिभेदात् तदा तस्य चतुर्द्धा परिगीतत्वात्, तदाह । "एत्थ उ मणोरहो वि य अभिग्गहो होइ णवरि विन्नेओ । जइ पविसइ ता भिक्खं देई अहमिमस्स चिंतणओ[१] ॥" अयमपि चानवद्यः पारणकभेरीशब्दश्रवणकालं यावत्प्रवृद्धः सन्निष्ठाप्राप्तावपि पारंपर्येण मोक्षफलतया संवृत्तः । इतरस्य च माहात्म्यौचित्येन दत्तदानस्याप्यभ्युत्थानादेरभावात्, यादृच्छिकवसुधारादिफल एव संवृत्तः परिणाम इति ॥ ७४ ॥ अभिग्रहानेवाभिष्टुवन्नाह ।

**एएहिंतो पावं लोगे वहुअं वि पडिहयं होइ । गरलं गुरुअविआरं जह कयमंताइपडियारं ॥ ७५ ॥**

एतेभ्यः सम्यक्पालिताभिग्रहेभ्यः, लोके भव्यलोके, बहुकमपि प्रभूतमपि, पापं यमुनाराजस्य ऋषिहत्यादिकर्मजनितमिव दुरदृष्टम्, प्रतिहतं भवति फलप्रदानाप्रह्वं भवति, दृष्टांतमाह, यथा गुरुकविकारं मरणादिप्रबलविक्रियाकारणम्, गरलं सर्पादिविषम्, कृतो मंत्रादीनां गारुडशास्त्रप्रसिद्धजांगुलीजापादीनां प्रतीकारो यत्र तत्तथा, अप्रतिकृतं हि विषं मारयेदेव एवमप्रतिकृतं पापमपि नरकादिदुःखफलं प्रदर्शयेदेवाभिग्रहादिना प्रतिकृतं तु न तथेति ॥ ७५ ॥ एतदेव भावयति ।

---

१ अत्र तु मनोरथोऽपि च अभिग्रहो भवति नवरं विज्ञेयः । यदि प्रविशति ततो भिक्षां दास्येऽहमस्य चिन्तनतः ॥

**तव्वंधठिई जाया कसायओ सा अवेइ सुहजोगे। सो पुण एत्थं गुरुओ आणासहगारिअत्तेण ॥ ७६॥**



तस्य पापकर्मणः बंधस्थितिः बंधाद्यवस्थानकालो जघन्यमध्यमोत्कृष्टभेदभिन्नः, कषायात् यथोचितकाषायिकाध्यवसायात्, जाता, अतः सा, शुभयोगेऽभिग्रहादिरूपे साधुजनयोग्यनिःकषायाऽध्यवसायमये प्रवर्त्तमाने, अपैति नश्यति, तैलवर्त्तिक्षयादिव दीपः,तदिदमाह । "कम्मं जोगणिमित्तं बज्झइ बंधट्ठिई कसायवसा । सुहजोगम्मी अकसायभावओ वेइतं खिप्पं[२] ॥" द्वयोर्भावयोस्तुल्यत्वेनैकेनापरकार्यविनाशः स्यादित्यत आह । स पुनः अभिग्रहादिशुभयोगः, अत्र प्रकृतकर्मनाशे, गुरुको बलीयान्, आज्ञासहकारिकत्वेन स्वसहायीभूताज्ञायुक्तत्वेन वह्निरिवाभिमुखतृणवनदाहेऽनुकूलपवनसहकृतत्वेनेति ध्येयम् । वस्तुतः कर्मजनितपरिणामरूपो दोषः स्वभावत एव दुर्बलः स्वपरिणामरूपो जीवस्य शुभयोगस्तु स्वभावत एव बलीयान्, अल्पस्त्वयं कर्मोदयबहुलत्वान्न स्वाभाविक एव, अत एवात्र नाशकत्वं आज्ञायोगसहकृतत्वं च तदव्यभिचरितत्वलक्षणमिति नानुपपत्तिरिति द्रष्टव्यम् ॥ ७६ ॥ कीदृशमिदं स्वरूपमुपलभेतेत्याह ।

**इय पासइ सज्जक्खो सम्मद्दिट्ठी उ जोगबुद्धीए। अंधो णेव कुदिट्ठी अभिन्नगंठी य जच्चंधो ॥ ७७ ॥**

इति पूर्वोक्तमाज्ञासहकृतशुभयोगस्य गुरुकत्वम्, पश्यति सज्जाक्षो भावतो निरुपहतलोचनः, सम्यग्दृष्टिस्तु सम्यग्दृष्टिरेव, योगबुद्ध्या धर्मवासनापरिष्कृतमत्या, न पुनरंधः पश्चान्नष्टदृष्टिजनतुल्यः, कुदृष्टिः सम्यक्त्वभ्रंशानंतरं मिथ्यात्वमुपगतः, न च जात्यंधो जन्मप्रभृत्येव नयनव्यापारविकलजनतुल्यः, अभिन्नग्रंथिः कदाचनाप्यव्यावृत्तमिथ्यात्वतिमिरपटलो जीवः । इदं तु ध्येयं सम्यग्दृष्टिराज्ञामुत्सर्गापवादादिभेदेन सम्यग्जानानोपि श्रेणिकादेरिव प्रतिबंधसंभवाद्भजनया

२ कर्म योगनिमित्तं बध्यते बन्धस्थिती कषायवशात् । शुभयोगेऽकषायभावतो वेदितं क्षिप्रम् ॥

प्रतिपद्यत इति ॥ ७७ ॥ नन्वयमुपदेशः कं प्रति फलवान् कं प्रति वा नेत्याशंक्याह ।

**एसुवएसो फलवं गुणठाणारंभतिव्वयाजोगे । न ठिएसु जहा दंडो चक्कम्मि सयं भमंतंमि ॥ ७८ ॥**

अयमभिग्रहधरणादिप्रकारेण सम्यगाज्ञायोगप्रवृत्तिविषयः, उपदेशः, फलवान् श्रोत्रपेक्षया फलोपहितः, गुणस्थानकानां सम्यग्दृष्ट्यादिरूपाणामारंभस्य प्रथमप्रवृत्तिरूपस्य तीव्रतायाश्च तथाविधक्लिष्टकर्मोदयात् प्रारब्धपातानां सोपक्रमकर्मणामुपरितनाध्यवसायस्थानारोहरूपाया योगे जनने, न नैव, स्थितेषु सर्वात्मना समधिष्ठितगुणस्थानकेषु, तत्र स्वव्यापारासिद्धेः, उपदेशस्य च स्वजन्यद्रव्याज्ञाक्रियापूर्वकगुणस्थानारंभस्थैर्यान्यतरव्यापारसंबंधेनैव सम्यग्दर्शनादिहेतुत्वात् । अत्र दृष्टांतमाह । यथा दंडः स्वयं भ्राम्यति चक्रे स हि घटजनने प्राथमिकचक्रभ्रमिद्वारा मंदीभूतायां तस्यामुत्कटतदाधानद्वारा-वा सफलः स्यात् नत्वन्यथा, तदाह, " सहकारिकारणं खलु एसो दंडोव्व चक्कभमणस्स । तम्मि ह तह संपयट्टे णिरत्थगो सो जह तहेसो३ ॥" तथा, " गुणठाणगपरिणामे संते उवएसमंतरेणावि । णो तव्वाघायपरो नियमेणं होइ जीवोत्ति४ ॥" युक्तं चैतत्तथाभव्यत्वपरिपाकतो गुणस्थानपरिणामप्रवृत्तौ तदत्यंताराधनावशेन तदपायाभावात्तत्परिपाकश्चैकः कालविशेषादपरश्चोपदेशात् फलपरिपाकवत्, तस्य द्वैविध्येन व्यवस्थितत्वात्, अत एव " तन्निसर्गादधिगमाद्वा " इत्याद्युक्तमिति ॥ ७८ ॥ नन्वेवमुपदेशं विनापि सम्यग्दर्शनादिकार्यसिद्धेस्तस्य तत्र हेतुत्वं न स्याद्व्यभिचारादित्याशंक्याह ।

**ण य एवं वभियारो कज्जविसेसा जहेव दंडस्स । दारघडियरूवेणं अहवाहिगयत्थहेउत्ता ॥ ७९ ॥**

---

३ सहकारिकारणं खलु एष दण्ड इव चक्रभ्रमणस्य । तस्मिँस्तथा संप्रवृत्ते निरर्थकः स यथा तथैषः ॥

४ गुणस्थानकपरिणामे सत्युपदेशमन्तरेणापि । नो तद्व्याघातपरः नियमेन भवति जीव इति ॥

न च एवं उपदेशं विनापि गुणस्थानप्रवृत्तौ, व्यभिचारः,कार्यविशेषात् कार्यगतिपरिणतिभेदात्, यथैव दंडस्य दंडोपि हि घटत्वावच्छिन्ने न हेतुर्व्यभिचारादिति तत्प्रयोज्यः परिणतिभेद एव घटे कल्पनीय एवमत्रापि । नन्वीदृशपरिणतिभेदानाकलने दंडे घटहेतुत्वग्रहो न स्यादिति चेत्, न, व्यभिचारग्रहस्य घटत्वावच्छेदेन कार्यताग्रहप्रतिपक्षत्वेपि तत्सामानाधिकरण्येन तद्ग्रहाविरोधात्, अन्यथा वह्नौ तृणादीनां हेतुत्वग्रहानुपपत्तेः, दंडत्वं चक्रभ्रामकवाय्वादिसाधारणमिति न व्यभिचार इति तु न रमणीयम्, व्यवहारसाक्षिकस्य दंडत्वस्य वाय्वादौ प्रत्यक्षबाधात्, पृथिवीत्वादिना सांकर्यात्तादृशजात्यसिद्धेश्च, अथवा द्वारघटितरूपेण, अधिकृतार्थहेतुत्वात् भ्रमिजनकत्वेन दंडस्येव गुणस्थानारंभप्रतिपातप्रतिबंधान्यतरजनकत्वेनोपदेशस्य स्वकार्यहेतुत्वे व्यभिचाराभावात्, न चात्राम्यं प्रतीत्याद्यन्यथासिद्धिः, फलानुगुणमन्यं प्रतीत्यादिविवक्षाया आवश्यकत्वादिति ध्येयम् ॥ ७९ ॥ अत्र परमतमाशंक्य निराकुर्वन्नाह ।

**नणु एवं सुत्तत्थग्गहणुवएसो विरुज्झए सुत्ते। भन्नइ ण सो विरुज्झइ जमपत्तविसेसफलविसओ ॥८०**

नन्विति प्रश्ने, एवमवस्थितपरिणामेषूपदेशस्य निःफलत्वे, सूत्रे सिद्धांते, सूत्रार्थग्रहणोपदेशो यथौचित्येन नित्यं सूत्रार्थपौरुषीविधानात्मा, विरुद्ध्यते, द्विविधा हि श्रुतग्राहिणः कठोरप्रज्ञास्तदितरे च, तत्र ये कठोरप्रज्ञास्ते प्रथमपौरुष्यां सूत्राध्ययनं कृत्वा द्वितीयपौरुष्याम् "सुतत्थं खलु पढमो[५]" इत्यादिनानुयोगक्रमेण तस्यार्थमाकर्णयंति, ये तु न तथारूपास्ते पौरुषीद्वयेऽपि सूत्रमेव पठंति, कालांतरे संपन्नप्रज्ञाप्रकर्षाश्च ते पौरुषीद्वयेपि सूत्रार्थग्रहणाय यत्नमाद्रियंत इति हि सूत्रीय उपदेशः, न चायमवस्थितपरिणामेषूपदेशस्य निःफलत्वे कथमपि फलवानिति, भण्यते अत्रोत्तरं दीयते, न स प्र-

५ सूत्रार्थः खलु प्रथमः ॥

कृतोपदेशः, विरुद्ध्यते, यद् यस्मात्, अप्राप्तविशेषफलविषयः, सिद्धे हि प्रतिपाद्ये सम्यग्दर्शनादौ स्वरसतस्तत्प्रवृत्तिमतः प्रति तदुपदेशो न सफलः स्यात् अप्रवृत्तप्रवर्त्तनात्मकत्वात्तस्य, असिद्धे तु केवलज्ञानप्राप्तिहेतावपूर्वज्ञानाभ्यासे प्रतिपाद्ये कथमिव तदुपदेशो निःफलः स्यात्तत एव तथाप्रवृत्त्युपपत्तेः, तदिदमाह । "जइ एवं किं भणिया णिच्चं सुत्तत्थपोरुसीए उ । तट्ठाणंतरविसया ते होंति न तेण दोसोयं[६] ॥ अपुव्वनाणग्गहणे णिच्चब्भासेण केवलुप्पत्ती । भणिआ सुअंमि तह्मा एवं चिय एयमवसेयं[७]॥" ॥ ८० ॥ ननूपदेशादुक्तव्यापाराभावेऽपि निवृत्तिसंभवादेव न निःफलत्वं भविष्यतीत्याशंक्याह ।

**गुणठाणावावारे एत्तो विरओ अविरओ णियमा । जह दहणो अदहंतो सत्तीए दाहगो चेव ॥ ८१ ॥**

गुणस्थानाव्यापारे सम्यग्दर्शनादिगुणस्थानाप्रवृत्तौ, इत उपदेशात्, यथा कथंचिद्विरतोपि प्राणातिपातादिभ्यो निवृत्तोपि, नियमादेकांततोऽनिवृत्त एव, हेतुतः स्वरूपतः फलतश्च हिंसादिस्वरूपज्ञानं तन्निवृत्तिरुचिरूपं दर्शनं च विना कुतोपि कारणाद्दोषनिवृत्तावपि तच्छत्त्यनिवृत्त्या तत्त्वतस्तदनिवृत्तेः, अत्र दृष्टांतमाह । यथा दहनोऽग्निर्दाहकशक्तिव्याघाताभावे कुतोपि वैगुण्याददहन्नपि शत्त्या दाहक एव, तदिदमाह । "जाणइ उप्पण्णरुई जइ ता दोसा णियत्तई सम्मं । इहरा अपवित्तीइ वि अणियत्तो चेव भावेणं[८] ॥" ८१ ॥ अथ कथं तत्त्वतो निवृत्तिरित्याह ।

**तह्मा वयपरिणामे पवट्टए नाणदंसणसमग्गो । उवउत्तो परिणामे अप्पबहुत्तं वियालंतो ॥ ८२ ॥**

---

६ यद्येवं किं भणिता नित्यं सूत्रार्थपौरुष्यास्तु । तत्स्थानान्तरविषयास्ते भवन्ति न तेन दोषोऽयम् ॥

७ अपूर्वज्ञानग्रहणे नित्याभ्यासेन केवलोत्पत्तिः । भणिता श्रुते तस्मादेवमेवैतदवसेयम् ॥

८ जानात्युत्पन्नरुचिर्यदि तस्माद्दोषा निवर्त्तन्ते सम्यक् । इतरथाप्रवृत्तावपि अनिवृत्तश्चैव भावेन ॥

तस्मादज्ञात्वाऽश्रद्धाय च निवृत्तस्य तत्त्वतोऽनिवृत्तत्वात्, व्रतपरिणामे आभ्यंतरव्रताध्यवसाये सति, प्रवर्त्तते, ज्ञानदर्शनाभ्यां समग्रः संपूर्णः, तथा उपयुक्तो दत्तावधानः, परिणामे आयतिकालानुष्ठेयेऽर्थे, अल्पबहुत्वं गुणदोषगतं गुरुलाघवम्, विचारयन् शास्त्रानुसारिण्या सूक्ष्मप्रज्ञया प्रतिसंदधत्, इत्थं विचारवंत एव हि तपोनुष्ठानादिषु सम्यक्प्रवृत्त्या विशालं फलं लभंते, अनीदृशास्तु लोकोत्तरपथावतारिणोऽपि अव्यावृत्तविपर्यासास्तथा प्रवर्त्तंते यथा स्वपरेषां दिग्मूढनिर्यामका इवाकल्याणहेतवो भवंतीति, अयं चायतिकल्याणफलानुबंधी विचारोऽन्वयव्यतिरेकाभ्यां व्रतपरिणामनियतयोगजादृष्टसाध्य एवेति निश्चीयते ॥ ८२ ॥ अल्पबहुत्वविचारमेव दिग्मात्रेण दर्शयति ।

**पुव्विं दुच्चिन्नाणं कम्माणं अक्खएण णो मुक्खो। तेण खमइ उवसग्गे पडिआरं वा कुणइ विहिणा॥८३**

पूर्वं भवांतरे, दुश्चीर्णानां निविडाध्यवसायतो निकाचनावस्थां नीतानाम्, कर्मणां ज्ञानावरणादीनाम्, अक्षयेणानिर्जरणेन, नो नैव, मोक्षः परमपुरुषार्थलाभलक्षणः संपद्यते यतः, तेन कारणेन, उपसर्गानुपस्थितव्याध्यादिरूपान्, क्षमतेऽदीनमनस्कतयानुभवति, वाऽथवा, प्रतिकारं विधिना " फासुअएसणिएहिं फासुअओहुद्देसिएहि कीएहिं । पूइए मिस्सएहिं आहाकम्मेण जयणाए[१] ॥ " इत्यादिकल्पादिग्रंथोक्तग्लानचिकित्सासूत्रानुसारिणा, कुरुते न तु गुरुलाघवालोचनविकलस्वविकल्पमात्रेण, अयं भावः व्याधिविप्रयोगप्रणिधानरूपार्त्तध्यानाभावे सम्यगधिसोढव्य एव व्याधिर्मुमुक्षुणा तस्य बुभुक्षितान्नलाभतुल्यत्वात्, तथा च पठ्यते । " कंडूय भत्तखद्धा तिव्वा वियणा य अत्थि कुच्छीसु । कासं सासं च जरं अहियासइ सत्तवा-

१ प्रासुकैषणीयैः प्रासुकौघोद्देशिकैः क्रीतैः । पूत्या मिश्रकैराधाकर्मणा यतनया ॥

ससए१०॥ ” आर्त्तध्यानप्रवृत्तौ संयमयोगहानौ वा विधिना प्रतिकारमपि कुर्यात् दुर्ध्याननिषेधसद्ध्यानादराप्रमादप्रधानत्वाच्चारित्रपरिणामस्य, तदाह । “ अट्टज्झाणाभावे सम्मं अहियासियव्वओ वाही । तब्भावम्मि वि विहिणा पडियारपवत्तणं णेयम्[११] ” ॥ ८३ ॥ नन्वेवमुत्सर्गतः प्रतिषिद्धायाः चिकित्साया आदरणे कथमविकलफललाभः स्यादित्यत आह ।

**पुट्ठालंबणसेवी उवेइ मुक्खं स माइठाणं तु । फासंतो णो धम्मे भावेण ठिओ अधन्नोत्ति ॥ ८४ ॥**

स पुष्टालंबनसेवी ज्ञानवैयावृत्त्यादिसमर्थालंबनेनापवादपथप्रवृत्तिमान्, उपैति मोक्षं आज्ञाशुद्धपरिणामानुबंधाविच्छेदात् यतमानस्य काचित्क्या विराधनाया अप्यकिंचित्करत्वात्, यदवाचि निशीथभाष्ये । “काहं अच्छित्तिं अदुवा अधीहं तवोवहाणेसु य उज्जमिस्सं । गणं च नीईय व सारइस्सं सालंबसेवी समुवेइ मुक्खं[१२]॥” अथ योऽपुष्टालंबनमुद्दिश्य प्रतीकारं कुर्यात्ततः किं निर्जरा स्यान्न वेत्यत्राह । मातृस्थानं मायादोषम्, तु स्पृशन् जीवः, भावेन परमार्थेन, धर्मे न स्थितः अधन्यः, कोटित्यागेन काकिणीग्रहणप्रवृत्त इव निर्जरालाभत्यागेन पूजाख्यात्यादिस्पृहापरतयात्मद्रोहपर इति हेतोस्तात्त्विकव्रतपरिणामवतो हि नैवं विपरीतफलप्रवृत्तिकत्वं भवति, तथास्वाभाव्यात्, तदिदमाह । “ सव्वत्थ माइठाणं न पयट्टति भावतो उ धम्मंमि ।

---

१० कंडूकं भक्तक्षुधां तीव्रां वेदनां चाक्षिकुक्षिषु । कासं श्वासं च ज्वरमध्यासयेत्सप्तवर्षशतम् ॥

११ आर्त्तध्यानाभावे सम्यगध्यासितव्या व्याधिः । तद्भावे तु विधिना प्रतिकारप्रवर्त्तनं ज्ञेयम् ॥

१२ करिष्यामि अच्छित्तिं अथवाऽधीष्ये तपउपधानेषु चोद्यंस्ये । गणं च नीत्या सारयिष्यामि सालंबसेवी समुपैति मोक्षम् ॥

जाणंतो अप्पाणं न जाउ जीवो इहं दुहइ[१३] ॥ कोडिच्चागा काकिणीगहणं पावाण ण उण धन्नाण । धन्नो अ चरणजुत्तोत्ति धम्मसारो सया होइ[१४] " ॥ ८४ ॥ एतदेव भावयति

**गुणठाणगपरिणामे संते पाएण बुद्धिमं होई । तप्फलमवेक्ख अन्ने नियमेण उ तारिसं बिंति ॥ ८५॥**

गुणस्थानपरिणामे जीवदयादिगुणप्रकर्षपरिणामे, सति तत्त्वतो विद्यमाने, प्रायेण बुद्धिमान् युक्तायुक्तविवेचनचतुरशेमुषीपरिगतः, भवति जीवः, अन्ये त्वाचार्याः, तत्फलं बुद्धिमत्त्वफलं स्वर्गापवर्गादिप्राप्तिलक्षणम्, अपेक्ष्य नियमेनैकांतेन तादृशं बुद्धिमंतम्, ब्रुवते गुणस्थानपरिणामवंतं जीवमिति दृश्यम्, संपन्ननिर्व्रणव्रतपरिणामाः प्राणिनो हि जिनभणितमिदमिति श्रद्धानाः क्वचिदर्थेनाभोगबहुलतया प्रज्ञापकदोषाद्वितथश्रद्धानवंतोपि न सम्यक्त्वादिगुणभंगभाजो जायन्ते । यथोक्तम् । " सम्मद्दिट्ठी जीवो उवइठ्ठं पवयणं तु सद्दहइ । सद्दहइ असब्भावं अयाणमाणो गुरुनिओगा[१५] " ॥ ८५ ॥ अत्रैव हेतुमाह ।

**अंधो असायरहिओ पुराणुसारी जहा सयं होई । एवं मग्गणुसारी मुणी अणाभोगपत्तोवि ॥ ८६ ॥**

असातरहितोऽसद्वेद्यकर्मोदयविमुक्तः, अंधो नयनव्यापारविकलः, यथा स्वयमात्मना, पुरानुसारी मलिम्लुचादिभयपरिहारेण निरुपद्रवनगरमार्गगामी, भवति तदीयशुभादृष्टस्य तथाप्रवृत्तिजननस्वाभाव्यात्, एवं मुनिर्दुर्गतिपातोपद्रवयो-

---

१३ सर्वत्र मातृस्थानं न प्रवर्त्तते भावतस्तु धर्मे । जानन्नात्मानं न यातु जीव इह द्रुह्यति ॥

१४ कोटित्यागात् काकिणीग्रहणं पापानां न पुनर्धन्यानाम् ॥ धन्यश्च चरणयुक्त इति धर्मसारः सदा भवति ॥

१५ सम्यग्दृष्टिर्जीव उपदिष्टं प्रवचनं तु श्रद्दधाति । श्रद्दधात्यसद्भावमजानन्गुरुनियोगात् ॥

ग्यताविकलचारित्रावरणकर्मक्षयोपशमवान्, अनाभोगप्राप्तोऽपि क्वचिदर्थेनाभोगभागपि, मार्गानुसारी निर्वाणपथानुकूलप्रवृत्ति-र्भवति ॥ ८६ ॥ मुनिभावोचितप्रवृत्त्यंतरमेवाह ।

**मोणंमि णियं सत्तिं ण निगूहइ गाढकट्ठपत्तोऽवि। दव्वादिया ण पायं वज्झाऽभावे वि भावहरा ॥८७॥**

मौने मुनिभावे, तत्त्वतो विद्यमाने न निजां शक्तिं समितिगुप्त्यादिविषयप्रयत्नरूपाम्, निगूहत्याच्छादयति। गाढमत्यं-तदुःसहकष्टं प्राणप्रहाणादिरूपं प्राप्तोपि, सत्पुरुषशिरोमणिः खल्वयं न च सत्पुरुषाणामापद्यपि निजप्रतिज्ञाभंग उचित इति द्रव्यादिप्रातिकूल्ये यतीनामेषणाशुद्ध्यादावध्ययनादौ च शक्तिविच्छेदात् कथं यतित्वाप्रच्यवः स्यादित्याशंक्याह। द्रव्या-दयश्च प्रायो बाहुल्येन, बाह्याभावेऽपि कायिकादिबहिर्व्यापारव्याघातेऽपि, भावहरा यतनापरिणामोपघातका न भवन्ति, प्रायो ग्रहणं मंदक्षयोपशमवति व्यभिचारवारणाय ॥ ८७ ॥ एतदेव निदर्शनेन भावयति

**जह सम्ममुट्ठिआणं समरे कंडाइणा भडाईणं। भावो न परावत्तइ एमेव महाणुभावस्स ॥ ८८ ॥**

यथा सम्यक् स्वौचित्यानतिलंघनेन, उत्थितानां उन्मीलिताध्यवसायानाम्, भटादीनां सुभटादीनाम्, समरे संग्रामे, कांडादिना शरीरलग्नबाणादिना, भावः प्रतिज्ञातव्यवसायः, न परावर्त्तते नान्यथा भवति प्रत्युत स्वाम्याज्ञापालनपरायण-त्वेन रतकेलिकुपितकांतकर्णोत्पलताडनादिवत् प्रमोदायैव भवति, एवमेव महानुभावस्य वीतरागाज्ञापालनेत्यंतरसिकस्य सा-धोर्द्रव्यादिवैषम्येपि न भावः परावर्त्तते किंतु प्रवर्द्धत इति द्रष्टव्यम्, सुभटदृष्टांतेन द्रव्यवैषम्ये भावाविच्छित्तिर्निदर्शिता, आदिना सौराष्ट्रादिदेशोत्पन्नानामपि धीराणां मगधादिदेशगमनेऽपि धैर्याविचलनवत् सुभिक्ष इव दुर्भिक्षेऽपि दानशूराणां दान-

व्यसनाक्षोभवत् बुभुक्षादिव्यसनेऽपि सिंहादीनां तृणाद्यग्रासवत् क्षेत्रादिवैषम्येऽपि भावाविच्छित्तिर्भावनीया ॥ ८८ ॥ एतदेव निदर्शनांतरेण द्रढयति ।

**मालइगुणणुण्णो महुअरस्स तप्पक्खवायहीणत्तं । पडिबंधेऽवि ण कइआ एमेव मुणिस्स सुहजोगे॥८९**

मालतीगुणस्य मालतीपरिमलचारिमानुभवैकमग्नचेतसः, मधुकरस्य भ्रमरस्य, प्रतिबंधेपि कुतोऽपि हेतोस्तदप्राप्तावपि, तत्र मालत्यां यः पक्षपातो बहुमाननैरंतर्यात्मा तद्धीनत्वं तद्विकलत्वं कदाचिदपि न भवति, एवमेव मुनेश्चरणपरिणामवतः, शुभयोगे स्वाध्यायध्यानविनयवैयावृत्त्यमानादिरूपे द्रव्यादिवैषम्यरूपे प्रतिबंधेऽपि पक्षपातहीनत्वं न भवति, यथाशक्त्यनुष्ठानेन मातृस्थानानां सेवनेन च तत्रैव चेतसः प्रतिबंधात् ॥ ८९ ॥ नन्वेवं शुभयोगेच्छाया अनपायेऽपि तत्र प्रवृत्त्यभावात् कथं फलसिद्धिरिच्छा हि प्रवृत्तावेवोपयुज्यते प्रवृत्तिश्च फलजनन इत्याशंक्याह ।

**अपयट्टो वि पयट्टो भावेणं एस जेण तस्सत्ती । अक्खलिआ निविडाओ कम्मखओवसमजोगाओ॥९०**

अप्रवृत्तोऽपि प्रतिबंधात् द्रव्यक्रियायामव्यापृतोऽपि, भावेन परमार्थेन, प्रवृत्त एष शुभभाववान्, येन कारणेन, तच्छक्तिः सत्प्रवृत्तिशक्तिः, अस्कलिता अव्याहता, निविडात् वज्राश्मवद्दुर्भेदात्, कर्मक्षयोपशमयोगात्, सत्प्रवृत्तिमतिपंथिचारित्रमोहनीयकर्मक्षयोपशमसंबंधात्, इत्थं चात्र शक्ये शक्त्यस्फोरणविनाकृतः शुभभाव एव स्वगतनिर्ज्जरालाभहेतुरबाह्यत्वाच्चैतत्फलस्य बाह्यप्रवृत्त्यभावेऽपि न क्षतिरिति फलितम् ॥ ९० ॥ इदानीमुदीरितं मुनिवृत्तं सांप्रतकालेऽपि योजयन्नाह ।

**एवं खु दुस्समाए सामिया गुत्ता य संजमुज्जुत्ता । पन्नवणिज्जासग्गहरहिया साहू महासत्ता ॥९१॥**

एवमुक्तप्रकारेण, खु इति निश्चये, दुःषमायां पंचमारकलक्षणकालेऽपि गम्यः, तत्रापि सर्वतः प्रवृत्तनिरंकुशासमंजसाचारायां वक्ष्यमाणलक्षणाः साधवो ज्ञातव्याः, इति वाक्यार्थसंबंधः, समिता ईर्यादिसमितिपरायणाः, गुप्ताः संलीनमनोवाक्कायाः, संयमे पंचाश्रवविरमणादिरूपे सप्तदशभेदे, उद्युक्ता उत्तरोत्तरानुष्ठानचिकीर्षानुबद्धप्रवृत्तिमंतः, प्रज्ञापनीयाः कुतोप्यनाभोगात् सामाचारीतः स्कलनेऽपि संविज्ञैर्गीतार्थैश्च प्रज्ञापयितुं शक्यास्ते च तेऽसन्नसुंदरो ग्रहः स्वविकल्पात्तथाविधागीतार्थप्रज्ञापकोपदेशाद्वा विपर्यस्तरूपतया शास्त्रार्थस्यावधारणं तेन रहिताः, तथा महासत्वा भगवदाज्ञातो दैवैरपि चालयितुमशक्याः ॥ ९१ ॥ उक्तगुणानामुत्पत्तिबीजमाविष्कुर्वन्नाह ।

**णियमा णत्थि चरित्तं कइया वि हु नाणदंसणविहूणं । तम्हा तम्मि ण संते असग्गहाईण अवगासो ॥ ९२**

नियमात् एकांततः, नास्ति चारित्रम्, कदापि हि दुःषमसुषमायां दुःषमायां वा, ज्ञानदर्शनाभ्यां विहीनं रहितम्, तस्मात्तस्मिन् चारित्रे सति, असद्ग्रहादीनां दोषाणाम्, नावकाशः, ज्ञानदर्शनसामर्थ्यैव तद्बीजमिथ्यात्वोच्छेदादिति भावः । अत्रासद्ग्रहस्य प्रथममभिधानात्तस्य मुख्यदोषत्वम्, तत्परित्यागे चाखिलगुणलाभः सूच्यते ॥ ९२ ॥ ननु माभूवन् चारित्रिणोऽसद्ग्रहादयश्चारित्रघातकाः परिणामाः परं मोक्षः सर्वक्रियोपरमादिति सर्वक्रियानिरोधे साधयितुमारब्धे किमर्थं स्वाध्यायादिषु क्रियाविशेषेषु यत्नः कर्त्तव्यतयोपदिष्ट इत्याशंक्याह ।

**सज्झायाइणिओगा चित्तणिरोहेण हंदि एएसिं । कल्लाणभायणत्तं पइदिणमुचियत्थचिंताए ॥ ९३ ॥**

हंदीत्युपदर्शने, एतेषां साधूनाम्, स्वाध्यायादिनियोगात् पापश्रुतावज्ञाप्रधानजिनागमाध्ययनादिविशिष्टप्रयत्नात्, चित्तस्य मनसो निरोधेनेतरविषयव्यावृत्त्या तदेकाग्रतालक्षणेन, प्रतिदिनं प्रतिवासरम्, ज्ञानवृद्धौ, उचितार्थानां तत्तद्व्या-

द्विसामग्र्यनुरूपोत्सर्गापवादादिरूपाणाम्, चिंतया गुरुलाघवानुपातिनोपयोगेन, कल्याणभाजनत्वमागमिष्यद्भद्रत्वं भवति, शास्त्रार्थानुसंधानसुनिश्चितपरिणतिकप्रवृत्तेरेव श्रेयोमूलत्वात्, तथा च स्वाध्यायादिक्रियया ऽसत्क्रियानिवृत्तिः, तस्यां च काष्ठामाप्तायां निर्विकल्पपरिणामाभिमुख्ये, वह्नेर्दाह्यं विनाश्यानुविनाशवत् स्वयमेव स्वनाशे मोक्षोऽप्यर्थादुपपत्स्यत इति न कश्चिद्विरोध इति फलितम् ॥ ९३ ॥ तदेवं दुःषमायामपि गुरुपारतंत्र्येण ये स्वाध्यायादिप्रधानयोगप्रवृत्तास्तेषां यतित्वम-व्याहतम्, ये तु विपरीतास्तानवगणयन्नाह ।

**केइ असग्गहगहिया अमुणंता एयमत्तदोसेण । उज्झियपहाणजोगा बज्झे जोगे ठिया तुच्छे ॥ ९४ ॥**

केचित्, असद्ग्रहगृहीता मिथ्याभिनिवेशविसंस्थुलीकृतात्मशक्तयः, एतत् उचितार्थचिंतया कल्याणभाजनत्वम्, अ-मुणंतत्ति अजानानाः, आत्मदोषेण स्वार्जितेन मिथ्यात्वमोहादिकठिनकर्मविपाकेन, उज्झितस्त्यक्तः प्रधानयोगो विपुलतरनि-र्जरानिबंधनगुरुपारतंत्र्याधीनस्वाध्यायाद्याराधनात्मा यैस्ते, बाह्ये बहिर्दृष्टिमात्ररम्ये, यथावत् परमगुरुवचनोपयोगशून्यतया शरीरव्यापारमात्ररूपे, तुच्छेत्यल्पफलके, योगे अनुष्ठाने, स्थिताः स्वबुद्धिकल्पनया प्रवृत्ताः, ते हि परित्यक्तनर्मदातीरा मृ-गतृष्णायां जलभ्रमवंतः काकबाला इव केषां न शोचनीया इति भावः ॥ ९४ ॥ इत्थं प्रवृत्तास्ते किं कुर्वंतीत्याह ।

**मन्नंता अन्नाणा अप्पाणं गुरुचरित्तजोगत्थं । मत्ता इव गयसत्ता पए पए हंत निवडंति ॥ ९५ ॥**

अज्ञानास्तत्त्वोपयोगशून्याः, आत्मानं बाह्यव्यापारप्रवृत्तं स्वम्, गुरुचरित्रयोगस्थं दुर्द्धरचारित्रानुष्ठानस्थितम्, म-न्यमानाः, मत्ता इव वारुणीपानविगलितचेतना इव, गतसत्त्वा निवृत्तधैर्याः, पदे पदे स्थाने स्थाने, हंतेति खेदे, निपतंति प्रस्कलंति, तथाहि मत्ताः पदे पदे गात्रबंधशिथिलीभावात् पतंति, एवमेतेपि केनचिद्विदग्धेन गंभीरसूत्रार्थं पृष्टाः सर्वं गुण- 

मात्मन्यारोपयितुकामास्तदनुपलंभे तत्समाधानाशक्ताः पदे पदे पतंतीति ॥ ९५॥ एतेषामज्ञानितामेव यथास्थितामुपदर्शयति।

**जं हीणा तुल्लत्तं वहंति एए महाणुभावाणं। उस्सुत्तं भासंता वितिया सा बालया तेसिं ॥ ९६ ॥**

यद् यस्माद्धीना आभ्यंतरशुद्धयोगरहिताः, महानुभावानां बाह्याभ्यंतरयोगे समुचितप्रवृत्तीनामागमानुसारिणां महर्षीणाम्, तुल्यत्वं वहंत्येते, उत्सूत्रं स्वाभिप्रायिकाचारसमाधानाय सूत्रविरुद्धम्, भाषमाणाः सा तेषां द्वितीया बालता, एका सूत्रविरुद्धाचरणरूपा द्वितीया च महापुरुषावगणनरूपेति। तथा चागमः। "शीलमंता उवसंता संखाए रीयमाणा असीलं अणुवयमाणस्स वितिया मंदस्स बालया[१६]" ॥ इति ॥ ९६ ॥ ननु कष्टानुष्ठायिनां किमर्थमेतेषां महानुभावस्पर्धानियता गुणवद्गर्हा स्यात् येन द्वितीयबालतावकाश इत्याशंक्याह।

**लोगो हि बज्झदिट्ठी पायं तत्तट्ठनाणपरिहीणो। तेसिं संगहहेउं तेसिं आजीविआ गरहा ॥ ९७ ॥**

लोको मध्यमप्रकृतिर्लोकः, हि निश्चितम्, बाह्यदृष्टिर्बाह्यव्यापारमात्रप्रेक्षी, तदुक्तम्, "बालः पश्यति लिंगं मध्यमबुद्धिर्विचारयति वृत्तम्। आगमतत्त्वं तु बुधः परीक्षते सर्वयत्नेन" इति। प्रायो बाहुल्येन, तत्त्वार्थज्ञानपरिहीनः आगमशुद्धोत्सर्गापवादादिप्रवृत्तिपरीक्षाक्षमसूक्ष्मप्रेक्षारहितः, तेषां संग्रहहेतोः स्वायत्तीकरणार्थम्, तेषां तुच्छयोगानुष्ठायिनाम्, गर्हा स्वोत्कर्षार्थकेतरगुणवन्निंदा, जीविका जीवनवृत्तिरित्थमेव मुग्धमतीनां स्वस्थानव्यामोहोपपत्तेः ॥ ९७ ॥ लोकसंग्रहार्थमितरगर्हयेवोपदेशेनाप्येतेषां महादोषत्वमित्याह।

---

१६ शीलवन्त उपशान्ताः संख्यया गच्छन्तः। अशीलानुव्रजमानस्य द्वितीया मन्दस्य बालता ॥

 

**अवि संकिज्जयाइच्चाइसुत्तभणिअं विहिं अयाणंता। वक्खाणंता अत्थं णिस्संका ते महापावा ॥१८॥**

अपि पुनः, संकिज्जयाइत्यादिसूत्रभणितं विधिं अजानानास्तथाविधगुरुनियोगाभावात्, अर्थं सूत्रार्थम्, व्याख्यानयंतः स्वाभिप्रायानुसरणेनोपदिशंतः, निःशंकाः सूत्राशातनाभीरवस्तेऽज्ञानिनः, महापापाः पापेभ्योऽपि पापाः नाममात्रग्रहणमपि तेषां पापायेति भावः। व्याख्यानविधिसूत्रं चेदं सूत्रकृतांगे चतुर्दशाध्ययने व्यवस्थितम्, "*संकिज्जयासंकियभावभिक्खू विभज्जवायं च वियागरिज्जा। भासादुअं धम्मसमुट्ठितेहिं वियागरेज्जा समतासुपण्णे" ॥ २२ ॥ भिक्षुः साधुर्व्याख्यानं कुर्वन्नर्वाग्दर्शित्वादर्थनिर्णयं प्रत्यशंकितभावोपि शंकेतौद्धत्यं परिहरन्नहमेवास्यार्थस्य वेत्ता नापरः कश्चिदित्येवं न गर्वं कुर्वीत, तथा विभज्यवादः स्याद्वादस्तं सर्वत्रास्कलितं वदेत्, तमपि भाषाद्वितयेन ब्रूयादित्याह। भाषाद्विकमाद्यचरमलक्षणं धर्मे सम्यक्संयमानुष्ठानेनोत्थिताः समुतित्थास्तैः सह विहरन् समतया रागद्वेषरहिततया शोभनप्रज्ञः, "अणुगच्छमाणे वितहंभिजाणे तहा तहा साहू अ कक्कसेणं। न कत्थई भास विहिंसएज्जा निरुद्धगं वावि न दीहएज्जा" ॥ २३॥ इत्थं तदुक्तमर्थमनुगच्छन्ननुसंदधत् कश्चिन्मंदमेधावितया वितथमन्यथाभूतमभिजानीयात् तं च तथा तथाऽनेन प्रकारेण साधुर्मूर्खस्त्वमसीत्यादिना कर्कशेन वचनेन न निर्भर्त्सयेत्, न वा तस्य भाषां दोषदुष्टामपि विहन्यादपशब्दाद्युद्घाटनतः, तथा निरुद्धं स्तोकमर्थं दीर्घवाक्यैरर्कविटपिकाष्टिकान्यायेन न कथयेत्, निरुद्धं वा स्तोककालीनं व्याख्यानं व्याकरणतर्कादिप्रवेशनद्वारेण प्रशक्तानुप्रशक्त्या न दीर्घयेन्न दीर्घकालिकं कुर्यात्। "समालवेज्जा पडिपुन्नभासी निसामिया समियाअट्ठदंसी। आणाइ सुद्धं वयणंभिउंजे अभिसंधए पाववियेग भिक्खू" ॥२४॥ यत्पुनरतिविषमत्वादल्पाक्षरैः सम्यग् नावबुद्ध्यते तत्सम्यक्पर्या-

* इत आरभ्य षड् गाथा ग्रन्थकृतैव स्पष्टीकृता इति नानूद्यन्ते ॥

यशब्दकथनात्तात्पर्योन्नयनाद्वा लपेद्भाषेत, न च प्रागुक्तदिशा सर्वत्राल्पाक्षरैरेवोक्त्वा कृतार्थो भवेदपि तु श्रोतारमपेक्ष्य प्रतिपूर्णभाषी स्यान्निरवशेषनयादिगंभीरार्थवादी भवेत्, तथा च गुरोः सकाशाद् यथावदर्थं निशम्य सम्यगर्थदर्शी सन् आज्ञया सर्वज्ञप्रणीतागमानुसारेण शुद्धं पूर्वापराविरुद्धं निरवद्यं वचनमभियुंजीत, उत्सर्गापवादयोः स्वपरसमययोश्च यथा स्वं वचनमभिवदेदित्यर्थः । इत्थं भूतश्च भिक्षुः पापविवेकं कांक्षमाणो निर्दोषं वचनमभिसंधयेत् । "अहाबुइआइं सुसिक्खएज्जा जएज्जया णाइवेलं वइज्जा । से दिट्ठिमं दिट्ठि न लूसइज्जा से जाणइ भासिउं तं समाहिं" ॥२५॥ यथोक्तानि तीर्थकृदादिभिः सुष्ठु शिक्षेत ग्रहणासेवनाशिक्षाभ्यां तथा सदा तयोर्देशनायां यतेत, सदा यतमानोपि कर्त्तव्यकालवेलामुल्लंघ्य नातिवेलं वदेत्, परं परस्पराबाधया सर्वाः क्रियाः कुर्यादित्यर्थः, स एवंविधः सम्यग्दृष्टिमान् सम्यग्दर्शनं न लूषयेन्न दूषयेत्, पुरुषविशेषं ज्ञात्वा तथा वक्तव्यं यथा तस्य सम्यक्त्वं स्थिरीभवति, न पुनः शंकोत्पादनतो दूष्यत इति, यश्चैवंविधः स जानात्यवबुध्यते भाषितुं तं तीर्थकरोक्तं समाधिं सम्यग्दर्शनज्ञानचारित्राख्यं इतरश्च भाषणायोग्य एव इति । "अलूसए नो पच्छन्नभासी नो सुत्तमन्नं च करिज्ज ताई । सत्थारभत्ती अणुवीइ वायं सुअं च सम्मं पडिवन्नएज्जा" ॥२६॥ अदूषकोऽपसिद्धांतव्याख्यानेन सर्वज्ञोक्तमदूषयन् न प्रच्छन्नभाषी भवेत् सार्वजनीनं सिद्धांतार्थं प्रच्छन्नभाषणेन न गोपयेत्, यदि वा प्रच्छन्नमर्थपरिणताय न भाषेत न च सूत्रमन्यत् स्वमतिविकल्पनतः स्वपरत्रायी कुर्वीत, शास्तरि या भक्तिस्तामनुविचिंत्य न कदाचिदागमबाधा स्यादित्येवं पर्यालोच्य वादं वदेत् श्रुतं चाचार्यादिभ्यः सकाशात् सम्यक् तदाराधनामनुवर्त्तमानोऽन्येभ्य ऋणमोक्षं प्रतिपद्यमानः प्रतिपादयेत्, "से सुद्धसुत्ते उवहाणवं च धम्मं च जे विंदति तत्थ तत्थ । आदेज्जवक्के कुसले वियत्ते से अरिहइ भासिउं तं समाहिं" ॥२७॥ स शुद्धसूत्रोऽवदातप्रवचनः, उपधानं यद् यस्य सूत्रस्याभिहितं तपश्चरणं तद्वान्, धर्मं च यो विंदति लभते,

तत्र तत्राज्ञाग्राह्यहेतुग्राह्याद्यर्थानां स्वस्वस्थाने, आदेयवाक्यो ग्राह्यवचनः कुशलो निपुणः सदनुष्ठानादौ, व्यक्तः परिस्फुटो नासमीक्ष्यकारी, सोऽर्हति तं समाधिं भाषितुमिति, न चायं विधिरगीतार्थैर्गुरुविनियोगरहितैः कष्टानुष्ठायिभिरपि कर्त्तुं शक्यत इति विफलैव तेषामुपदेशचेष्टेति भावः ॥ ९८ ॥ उक्तसूत्र एव प्रश्नप्रतिवचने माह ।

**नणु इह विभज्जवाओ आणत्तो ण य निरुद्धपत्थारो । एयं कहमविरुद्धं भन्नइ सोआरमहिगिच्च ॥ ९९ ॥**

नन्विह संकिज्जया इत्यादिसूत्रे । विभज्यवादः स्याद्वादः आज्ञप्तः सर्वत्र भाषितुमनुज्ञातः, तथा निरुद्धप्रस्तारः स्तोकार्थविस्तरश्च, नानुज्ञातः, एतद्द्वयं कथमविरुद्धं स्याद्वादप्रकाशने विस्तरावश्यंभावात्, भण्यते प्रत्युत्तरं विधीयते । श्रोतारं श्रोतृविशेषम्, अधिकृत्याविरुद्धमेतत्, निखिलनयचतुरं प्रपंचितज्ञं प्रतिपत्तारमुद्दिश्य विस्तरेण स्याद्वादप्रतिपादनात्, एकतरनयप्रियं च तमुद्दिश्य स्याद्वादप्रतिपत्तियोग्यतामाधातुं स्तोकप्रतिपादनात्तदानीमपि स्याद्वादप्रतिपादनयोग्यताया अनपायात्, तथा चाह सम्मतिकारः । " पुरिसज्जायं तु पडुच्च जाणओ पन्नवेज्ज अण्णयरं । परिकम्मणाणिमित्तं दाहेही सो विसेसंपि[१७]" ॥ ९९ ॥ एवं श्रोतृभेदेन स्याद्वादप्रतिपादने भजनापि भवेत्तत्परिज्ञानं विना तु सम्यक्त्वमपि न व्यवतिष्ठत इत्याह ।

**सदसदविसेसणाओ विभज्जवायं विणा ण सम्मत्तं । जं पुण आणारुइणो तं निउणा बिंति दव्वेणं ॥ १०० ॥**

सदसदविशेषणात् स्वपक्षपरपक्षयोर्विधिनिषेधयोः कर्त्तुमशक्यत्वात्, विभज्यवादं विना स्याद्वादपरिज्ञानं विना, नास्ति सम्यक्त्वं तथाभूतार्थज्ञानरुचिरूपत्वात्तस्याऽतथाभूतार्थज्ञानस्य च तत्त्वतोऽवग्रहादिरूपतयाऽनेकांतविषयस्यापि तदा-

१७ पुरुषजातं तु प्रतीत्य ज्ञापकः प्रज्ञापयेदन्यतरम् । परिकर्मनिमित्तं दर्शयिष्यति स विशेषमपि ॥

वरणदोषेणानेकांतविषयकत्वेनानुल्लिखितस्य तथा रोचयितुमशक्यत्वात्, नन्वेवं तथाविधागीतार्थस्य संक्षेपरुचिसम्यक्त्वमुच्छिद्येतेत्यत आह । यत्पुनराज्ञारुचेः प्रियगीतार्थाज्ञस्य मार्गानुसारिणः सम्यक्त्वम्, तन्निपुणाः सिद्धसेनदिवाकरप्रभृतयः, द्रव्येण ब्रुवते, स्याद्वादप्रतिपत्तियोग्यतायास्तज्जन्यनिर्जराजनककर्मक्षयोपशमरूपायास्तेष्वखंडितत्वात्, विपंचितं चेदं स्याद्वादकल्पलतायामिति नेह प्रतन्यते ॥ १०० ॥ विभज्यवादस्य सम्यक्त्वबीजत्वमेव सूत्रसंमतया द्रढयति ।

**अवि य अणायारसुए विभज्जवाओ विसेसिउं सम्मं । जं वुत्तोणायारो पत्तेयं दोहि ठाणेहिं ॥ १०१ ॥**

अपि चानाचारश्रुतेऽनाचारश्रुताभिधाने सूत्रकृताध्ययने, विभज्यवादः स्याद्वादः, सम्यग् याथात्म्येन, विशेषितः सम्यग्दर्शनप्राणत्वेन पुरस्कृतः, यद् यस्मात्, प्रत्येकमेकत्र धर्मिणि, स्यात्कारांकितेतरधर्मानुल्लेखेन, द्वाभ्यां स्थानाभ्यामभिधीयमानाभ्यां ज्ञायमानाभ्यां वाऽनाचारो दर्शनाचार उक्तस्तत्र,तथाहि । "*अणादीयं परिन्नाय अणवयग्गेइ वा पुणो । सासयमसासयं वावि इइ दिट्ठिं ण धारए ॥२॥" अनादिकमप्रथमोत्पत्तिकमनवदग्रमपर्यवसानमिति वा परिज्ञाय एकनयदृष्ट्यावधार्य शाश्वतं सांख्याभिप्रायेणाप्रच्युतानुत्पन्नस्थिरैकस्वभावं सर्वं स्वदर्शने वा सामान्यांशमवलंब्य सर्वमिदं शाश्वतमित्येवंभूतां दृष्टिं न धारयेत्, तथा विशेषपक्षमाश्रित्य वर्त्तमाननारकाः समुच्छेत्स्यंतीत्येतच्च सूत्रमंगीकृत्य यत् सत्तत्सर्वमनित्यमित्येवंभूतबौद्धदर्शनाभिप्रायेण च सर्वमशाश्वतमित्येवंभूतां च दृष्टिं न धारयेत् । क एवं दोष इत्याह । "एतेहिं दोहिं ठाणेहिं ववहारो ण विज्जइ । एतेहिं दोहिं ठाणेहिं अणायारं तु जाणए ॥३॥" सर्वं नित्यमेवानित्यमेव वा एताभ्यां द्वाभ्यां स्थानाभ्यामभ्युपगम्यमानाभ्यामनयोर्वा पक्षयोर्व्यवहारो लोकस्यैहिकामुष्मिकयोः कार्ययोः प्रवृत्तिनिवृत्तिलक्षणयोर्न विद्यते, एकांतनित्यत्वे घटा-

---

* इमाः सूत्रकृताङ्गद्वितीयश्रुतस्कन्धपञ्चमाध्ययनीया दश गाथा ग्रन्थकृतैव विवेचिता इति नानूद्यन्ते ॥

द्यर्थं कुंभकारादेर्मोक्षाद्यर्थं तपस्विप्रभृतीनां च प्रवृत्त्यनुपपत्तेः, एकांतानित्यत्वेऽपि लोकानामनागतभोगार्थं धनधान्यादिसं-
ग्रहार्थं मुमुक्षूणां च मोक्षार्थं प्रवृत्त्यनुपपत्तेरेव, नित्यानित्यत्वयोः प्रतिनियताश्रयत्ववादेऽप्येकत्र मृदादौ स्थासकुशूलघटाद्यने-
ककार्यार्थप्रवृत्तेरेकस्यानेकपरिणामित्वविरोधात्, अत एतयोः स्थानयोरेकांतत्वेनाश्रीयमाणयोरनाचारं मौनींद्रागमबाह्यत्वरूपं
जानीयात्, तुशब्दो विशेषणार्थः, कथंचिन्नित्यानित्ये वस्तुनि व्यवहारो युज्यत इत्येतद्विशिनष्टि, एकांशमादाय नयव्यव-
हारस्योभयमादाय च प्रमाणव्यवहारस्योपपत्तेः, न चैवमपि स्यान्नित्यमेव स्यादनित्यमेवेति च प्राप्तं तत्राप्येवकारार्थाव-
धारणबलाद् येनाकारेण नित्यत्वं तेन नित्यत्वमेवेत्येकांतोपपत्तिरिति शंकनीयम्, अनित्यत्वासंवलितस्य नित्यत्वव्यवच्छेद-
स्याप्रसिद्धेः, तत्संवलितस्य च तस्य सत्त्वे किंचिदपेक्षया एकांतसंवलितानेकांतानपायात्, तथा चाह सम्मतिकारः । "भ-
यणावि हु भइयव्वा जह भयणा भयइ सव्वदव्वाइं । एवं भयणानियमो वि होइ समयाविराहणया[१८] ॥" न चैकावच्छेदेन
नित्यत्वादिकमेवेत्येवमेकांतप्राप्तिः, गुंजाफले कृष्णत्वरक्तत्वयोरिव नित्यत्वानित्यत्वयोः खंडशोऽनवस्थानात्, गुडशुंठीद्रव्ययो-
रिवैकगोलकीकृतयोस्तयोरेकलोलीभावेनैवावस्थानात् । एतेन द्रव्यार्थत्वादौ नित्यत्वाद्यवच्छेदकत्वमेवेत्येवमेकांतापत्तिरपि
निरस्ता, पररूपादिना तत्र तदभावाच्चेत्यन्यत्र विस्तरः । "समुच्छिज्जिहिंति सत्थारो सव्वे पाणा अणेलिसा । गंठीगा वा भवि-
स्संति सासयंति व णो वदे ॥४॥" सम्यग्निरवशेषतयोच्छेत्स्यंति सामस्त्येनोत्प्राबल्येन सेत्स्यंति सिद्धिं यास्यंति वा, शास्तारः
सर्वज्ञाः, सर्वे निरवशेषाः सिद्धिगमनयोग्या भव्यास्ततश्चोत्सन्नभव्यं जगत् स्यादित्येवं नो वदेत्, तथा सर्वे प्राणिनोऽनी-
दृशाः परस्परं विलक्षणा एव न कथंचित्तेषां सादृश्यमस्तीत्येवमप्येकांतेन नो वदेत्, यदि वा सर्वेषां भव्यानां सिद्धिसद्भावे-

---

१८ भजनापि खलु भक्तव्या यथा भजना भज्यते सर्वद्रव्याणि । एवं भजनानियमोऽपि भवति समयाविराधनया ॥

ऽवशिष्टाः संसारेऽनीदृशा अभव्या एव भवेयुरित्येवं नो वदेत्, तथा ग्रंथिकाः कर्मग्रंथवंत एव सर्वे भविष्यंतीत्येवं नो वदेत्, यदि वा ग्रंथिभेदं कर्तुमसमर्था भविष्यंतीत्येवं नो वदेत्, तथा शाश्वताः सदाकालं स्थायिनः शास्तार इत्येवं नो वदेत्, यतः "एएहिं० ॥५॥" एतयोर्द्वयोः स्थानयोर्व्यवहारो न विद्यते। तथाहि यत्तावदुक्तम् । सर्वे शास्तारः क्षयं यास्यंतीत्येतदयुक्तम्, क्षयनिबंधनकर्मणोऽभावेन सिद्धानां क्षयाभावाद्भवस्थकेवलिनामपि प्रवाहापेक्षया क्षयाऽयोगात्, यदप्युक्तं सर्वभव्यानां सिद्धिगमने उत्सन्नभव्यं जगत् स्यादिति, तदपि न, भव्यराशे राद्धांते भविष्यत्कालसमयवदानंत्योक्तेस्तन्निर्लोपासंभवात्, न च सर्वेषां भव्यानां सेत्स्यमानताभिधानात्तदापत्तिः, "भवति स नामातीतः प्राप्तो यो नाम वर्त्तमानत्वम् । एष्यंश्च नाम स भवति, यः प्राप्स्यति वर्त्तमानत्वम्" इति वचनात्, अनागतसमयानां लप्स्यमानवर्त्तमानतावत्तदुपपत्तेः, तथा नापि शाश्वता एव शास्तारः भवस्थानां सिद्धिगमनात् प्रवाहापेक्षया च शाश्वतत्वमतः कथंचित् शाश्वताः कथंचिदशाश्वता इति। तथा नानीदृशत्वमपि सर्वेषां घटते, जात्यादिना तथात्वेप्यसंख्येयप्रदेशत्वादिनाऽतथात्वात्, तथोल्लसितसद्वीर्यतया केचिद्भिन्नग्रंथयोऽपरे च न तथेत्यत्राप्येकांतो न कांतः, शाश्वतत्वमपि नैकांतेन कथंचिदुच्छेदादिति,एतयोः स्थानयोरेवमनाचारं जानीयात् । "जे केइ खुद्दगा पाणा अहवा संति महालया । सरिसं तेहिं वेरंति अ सरिसं तिय णो वदे ॥६॥" ये केचन क्षुद्रा एकेंद्रियादयोऽल्पकाया वा प्राणिनो अथवा महालया महाकायास्तेषां व्यापादने सदृशं वज्रं कर्म वैरं वा विरोधलक्षणं समानतुल्यप्रदेशत्वादित्येवं न वदेत्, तथा विसदृशं तदिंद्रियज्ञानकानां विसदृशत्वादित्यपि न वदेत्, यतः "एएहिं० ॥७॥" आभ्यां द्वाभ्यां स्थानाभ्यां व्यवहारो न विद्यते, यतो न वध्यानुरोधी कर्मबंधविशेषोऽस्ति अपि तु वधकस्य तीव्रभावो मंदभावो ज्ञानभावोऽज्ञानभावो महावीर्यत्वमल्पवीर्यत्वं च तत्र तंत्रमिति, तदनयोः स्थानयोः प्रवृत्तस्यानाचारं विजानीयात्, भावसव्यपेक्षस्यैव कर्मबंधविशेषस्याभ्युपगमौचित्यात्, नहि वैद्यस्यागमसव्यपेक्षस्य सम्यक्क्रियां कुर्वत आतुरविपत्तावपि वैरानुषंगः, सर्पबुद्ध्या रज्जुमपि घ्नतो भावदोषात् कर्मबंधश्चेति

। " अहाकम्माइं भुजंति अण्णमण्णे सकम्मुणा । उवलित्ते वियाणिज्जा अणुवलित्तेत्ति वा पुणो ॥८॥" साधुप्रधानकारणमाधायाश्रित्य कर्माण्याधाकर्माणि ये भुंजते तानन्योन्यं परस्परं स्वकीयेन कर्मणा उपलिप्तान् विजानीयादित्येवं न वदेत्, तथाऽनुपलिप्तानिति वा न वदेत्, श्रुतानुपदेशोपदेशाभ्यां तत्र कर्मबंधाबंधोपपत्तेः, आधाकर्मिकभोगे स्यात् कर्मबंधः स्यान्नेति वक्तुं युक्तत्वात् । यतः "एएहिं०॥९॥" आभ्यां द्वाभ्यां स्थानाभ्यां व्यवहारो न विद्यतेऽत्यंतापद्दशायां तदग्रहणे ईर्याद्यशुद्ध्यार्त्तध्यानप्रवृत्तौ च बहुदोषप्रसंगात्, अन्यथा तद्भोगे षट्कायोपमर्दपापानिवृत्तेः, अत आभ्यामेव स्थानाभ्यामेकांततो गृहीताभ्यामनाचारं विजानीयात् । "जमिदं उरालमाहारं कम्मगं च तमेव य । सव्वत्थ वीरिअं अत्थि णत्थि सव्वत्थ वीरिअं॥१०॥" यदिदमौदारिकं तथाहारकमुपलक्षणाद्वैक्रियं च तथा कार्मणमुपलक्षणात्तैजसं च तदेव यदेवौदारिकादि तदेव कार्मणादीत्येवं सहचारदर्शनेन संज्ञां न निवेशयेत्, नाप्येषामात्यंतिको भेद इति संज्ञादिभेदाद्भिन्नदेशकालानुपलब्धेश्च, तथा सर्वत्र घटपटादावपरस्य वीर्यं शक्तिरस्ति व्यक्तस्य प्रधानकार्यत्वादित्येवं संज्ञां न निवेशयेत्, न वा "सर्वे भावाः स्वभावेन स्वस्वभावव्यवस्थिता इति" प्रतिनियतशक्तित्वान्न सर्वत्र सर्वस्य वीर्यमस्तीत्यपि संज्ञां निवेशयेत्, सर्वथा सतोऽसतो वा कार्यस्यानुत्पत्तेर्द्रव्यार्थतया सर्वस्यैकशक्तिमतोऽपि पर्यायार्थतया स्वमात्रमग्नशक्तित्वेनोत्पादादन्यथा नियतोपादानप्रवृत्त्यनुपपत्तेः, अत एवाह । "एएहिं० ॥११॥" स्पष्टः, इत्थं चात्र प्रत्येकपक्षाभिधाने सर्वत्रानाचार एव दिङ्मात्रेण दर्शित इति सर्वत्र स्याद्वादश्रद्धयैव सम्यक्त्वं व्यवस्थितम् ॥ १०१ ॥ विभज्यवादमेवाभिष्टौति ।

**एसो पवयणसारो सव्वं इच्चत्थमेव गणिपिडगं । एअंमि अविणाए विहलं चरणं जओ भणियं ॥१०२**

एषः विभज्यवादः, प्रवचनसारः एतद्बोधनेनैव प्रवचनस्य फलवत्त्वात् । "एगे आया" इत्यादेरपि तंत्रपरिकर्मितमत्या

एकत्वानेकत्वादिसप्तभंगीपरिकरितबोधस्यैवोत्पत्तेः, एकनयावधारणे मिथ्यादृष्टिवचनाविशेषप्रसंगात्, न केवलं प्रवचनकार्यमेवायं अपि तु तत्कारणमपीत्याह । सर्वं निरवशेषम्, इत्यर्थकमेव उपदिष्टविभज्यवादार्थकमेव, गणिपिटकं द्वादशाङ्गीरूपम्, अर्थं हि भगवाननुपदिशति सूत्रं च ततो गणधरा ग्रथ्नंति स च त्रिपदीरूपः स्याद्वादमूर्त्तिरिति सिद्धं गणिपिटकस्य स्याद्वादहेतुकत्वम्, यत एवं ततः एतस्मिन्नविज्ञाते अपरिच्छिन्ने, विफलं असारम्, चरणं चारित्रम्, स्याद्वादरुचिरूपसम्यग्दर्शनशुद्धिशून्यत्वात्, यतो भणितं सम्मतौ श्रीसिद्धसेनदिवाकरपादैः ॥ १०२ ॥

**चरणकरणप्पहाणा ससमयपरसमयमुक्कवावारा । चरणकरणस्स सारं णिच्छयसुद्धं ण याणंति ॥१०३**

चरणं "वयसमणधम्मेत्यादि" गाथोक्तसप्ततिभेदम्, करणमपि "पिंडविसोहीसमिईत्यादि" गाथोक्तसप्ततिभेदम्, ताभ्यां प्रधानास्तत्र नैरंतर्यादरवंत इत्यर्थः, स्वसमयपरसमययोर्मुक्तोऽनादृतो व्यापारः स्याद्वादपरिकर्मितधिया विवेचनात्मा यैस्ते तथा, चरणकरणानुष्ठानेनैव कृतार्था वयं किमस्माकं तर्ककर्कशेन वादरसिकरमणीयेन स्याद्वादेन प्रयोजनमित्येवं ज्ञानाभ्यासादृव्यावृत्ता इत्यर्थः, चरणकरणस्य चरणकरणानुष्ठानस्य, सारं स्वजन्यफलोत्कर्षाङ्गम्, निश्चयशुद्धं परमार्थदृष्ट्याऽवदातम्, न तु बाह्यक्रियावल्लोकदृष्ट्यैवापाततो रमणीयमित्यर्थः, न जानंति न विचारयंति, तदावरणकर्मदोषात्, एवं च तेषामल्पफलमेव चरणकरणानुष्ठानमित्यर्थः ॥ १०३ ॥ सूत्रसंमतत्वमप्यस्यार्थस्यावेदयन्नाह ।

**भणियं च भगवयावि य आयारंगे इमं विसेसाओ । जं सम्मं तं मोणं जं मोणं तं च सम्मंति ॥१०४॥**

भणितं च भगवतापि सुधर्मस्वामिनापि, एतदनुपदोक्तम्, आचारांगे, विशिष्यान्योन्यव्याप्यव्यापकभावमवधार्य, यत् सम्यक् भावप्रधाननिर्देशात् सम्यक्त्वम्, तन्मौनं मुनिभावः, यच्च मौनं तत्सम्यक्त्वमिति " जं संम्मंति पासहा तं मोणंति

पासहा । जं मोणंति पासहा तं संम्मंति पासहा[१९]॥" इति हि सूत्रं व्यवस्थितम्, अत्र हि द्वयोस्तादात्म्येन व्याप्यव्यापकभावदर्शनं विधीयते, तच्च द्वयोस्तुल्यवदाराधनप्रवृत्तये "दंसणचरित्तपक्खो समणे परलोगकांखिंमि[२०]" इति वचनात्, एतच्च स्याद्वादप्रतिपत्तिरुचिरूपस्य सम्यक्त्वपदार्थत्वे स्याद्वादधीरुचितात्मैकप्रतिबंधरूपस्य च मौनपदार्थत्वे घटते, तत्त्वरुचिपरपरिणतिनिवृत्त्योरित्थमेव तुल्यवदादरोपपत्तेः, अन्यथा तु नेत्थं प्रयोजनसिद्धिर्न वा व्यभिचारोद्धार इति विभावनीयम्, एतदज्ञानवृतां चापतंत्राणामुपदेशो विडंबनैवेत्याह ।

**एयमिह अयाणंता उवएसरया भमंतगीयत्था । नडनट्टंव जणावि य तेसिं चरियं च पिच्छंति ॥१०५॥**

एतं विभज्यवादम्, इह जगति, अजानंतो गुरुपारतंत्र्याभावेनापरिच्छिंदंतः, उपदेशरता अगीतार्था भ्रमंति इतस्ततः पर्यटंति योग्यतयाऽनागतभवजाले वा संसरंति, न तूपदेशात्तेषां कश्चिल्लाभलेशोपि, जना अपि नटनाट्यमिव तेषां चरितं प्रेक्षंते कुतूहलेनैव ते न तु प्रेक्षापूर्वकारिणोऽन्यथा तत्प्रेक्षणप्रवृत्त्यनुपपत्तेरिति भावः ॥ १०५ ॥ ननु माभूत्तेषामुपदेशो हिताय शुद्धोंछादिग्रहणयत्नस्तु हितकारी स्यादित्याशंक्याह ।

**सुद्धुंछाईसु जत्तो गुरुकुलचागाइणा ण हियहेऊ । हंदि भुयाहिं महोअहितरणं जह पोअभंगेणं ॥१०६॥**

शुद्धो द्विचत्वारिंशद्दोषरहित उंछो भिक्षावृत्तिरूपः, आदिशब्दादभिग्रहादिपरिग्रहस्तेषु यत्न आदरः, गुरुकु-

१९ यत्सम्यक्त्वमिति पश्यत तन्मौनमिति पश्यत । यन्मौनमिति पश्यत तत्सम्यक्त्वमिति पश्यत ॥
२० दर्शनचारित्रपक्षः श्रमणे परलोककांक्षिणि ॥

लत्यागादिना ज्येष्ठादिविनयवैयावृत्त्यादिपरिहारग्रहः, न हितहेतुर्न स्वहितार्थकारी, हंदीत्युपदर्शने, यथा पोतभंगेन यानपात्रविनाशेन, भुजाभ्यां महोदधितरणम्, यथाहि कश्चिदतिसाहसिकोऽनालोचितकारी भुजाभ्यामेव बलवतां तरणं श्रेयो नत्वबलावत्पोतावलंबनेनेति लोकवचनश्रवणोदितधृष्टभावः पोतं भंक्त्वा भुजाभ्यामेव समुद्रं तरन्नतिश्रांततया तत्रैव निमज्जति, एवं सम्यगपरिणतो मुनिरपि कश्चिद्गुरुकुलवासेन तथाविधा भिक्षाविशुद्धिरिति लोकवचनं शृण्वन् " आयत्तया महागुणकालो विसमो सपक्खिओ दोसो आइतिगभंगकेणवि गहणं भणियं पकप्पंमीति " पंचकल्पभाष्यवचनमश्रद्दधानः शुद्धोंछाद्यर्थं गुरुकुलवासत्यागेन विहारमवलंबमानो बहुलदोषमग्नतयाऽतिसाहसिकः संसार एव परिभ्रमतीति ॥ १०६ ॥ यथैवमेतेषां यथावसरमितरकृत्यपरित्यागादधिकगुणलाभाननुबंधिनोऽनुष्ठानस्याविधिप्रधानत्वाच्छुद्धोंछादिग्रहणेनापि न हितं तथा न केवलमुपवासेनापि तत्स्यादित्याह ।

**उववासो वि य एक्को ण सुंदरो इयरकज्जचाएणं । णेमित्तिओ जमेसो णिच्चं एक्कासणं भणियं ॥१०७**

उपवासोऽपि एकः केवलः, न सुंदरो न स्वोचितफलदायी, इतरकार्यत्यागेन विनयवैयावृत्त्याद्यपरकार्यावसीदनेन, काले कृतं हि सर्वं फलवद्भवेत् न चेतरकार्यकरणवेलायां तद्विरोध्युपवासकाल इति, एतदेवाह । यद् यस्मादेष उपवासः, नैमित्तिकः तथाविधनिमित्तोपनिपातसंभविकर्त्तव्यताकः पर्वादिष्वेव तद्विधानात्, तत्र पर्वाणि चतुर्दश्यादीनि, यथोक्तम्, व्यवहारभाष्ये । "चउत्थछट्ठट्ठमकरणे अट्ठमिपक्खचउमासवरिसेसु । लहुओ गुरुओ लहुआ गुरुगा य कमेण बोधव्वा[२१] ॥"

---

२१ चतुर्थषष्ठाष्टमाकरणे अष्टमीपाक्षिकचतुर्मासवर्षेषु । लघुको गुरुको लघुका गुरुकाश्च क्रमेण बोद्धव्याः ॥

आदिना "आयंके उवसग्गे तितिक्खयाबंभचेरगुत्तीसु । पाणिदयातवहेउं सरीरोवोच्छेअणठाए[२२] ॥" इति गाथोक्तानि कारणानि ग्राह्याणि, एकाशनं प्रतिदिनमेकवारभोजनम्, नित्यं सार्वदिनकं भणितम्, "अहोनिच्चं तवोकम्मं सव्वबुद्धेहिं वन्निअं। जा य लज्जासमावित्ती एगभत्तं च भोअणं[२३] ॥" इति सूत्रोपदेशात्, तदिदमुक्तमुपदेशपदे "उववासो वि हु एकासणस्स चायाणसुंदरोपायं । णिच्चमिणं उववासो णेमित्तिगओ जओ भणिओ[२४]॥" "अहोणिच्चं तवोकम्माइ सुत्तओ हंदि एवमेयंति। पडिवज्जेयव्वं खलु पव्वाइसु तव्विहाणाओ[२५] ॥" अत्र हि उक्तकारणविरहेणैकभक्तमपेक्ष्योपवासे क्रियमाणे सूत्रपौरुष्यादयः शेषसाधुसमाचारा बहुतरनिर्जराफला सीदंतीति परिभाव्योक्तं नैमित्तिक उपवासो नित्यं त्वेकभक्तमिति ।ननु नित्यत्वे एकाशनस्योपवासादेस्तपोविशेषपारणके द्विरशनादेश्चावसरे तदकरणे प्रत्यवायापत्तिरिति चेन्न, तदानीं तदनधिकारादेवाधिकाराकालीनस्य च नित्याकरणस्य प्रत्यवायाहेतुत्वात्, अत एवात्यंतबालादेरशक्तस्य तदकरणेऽपि न प्रत्यवाय इति विभावनीयम् ॥ १०७ ॥ अथैकभक्ते उपवासवन्नैमित्तिकत्वमाशंक्य समाधत्ते ।

**ननु कारणियं भणिअं जईण असणं जहोववासो त्ति । कह णिच्चमेगभत्तं भन्नइ णिच्चंपि तव्भावा ॥**

नन्वित्याक्षेपे, कारणिकं भणितं यतीनामशनं यथोपवासस्तितिक्षादिभिः कारणैरनशनस्येवाशनस्यापि वेदनादिका-

---

२२ आतंके उपसर्गे तितिक्षताब्रह्मचर्यगुप्तिषु । प्राणिदयातपोहेतोः शरीरव्युच्छेदनार्थाय ॥

२३ अहो नित्यंतपः कर्म सर्वबुद्धैर्वर्णितम् । या च लज्जा समावृत्तिरेकभक्तं च भोजनम् ॥

२४ उपवासोऽपि खलु एकाशनस्य चादानसुंदरोपायः । नित्यमयमुपवासो नैमित्तिको यतो भणितः॥

२५ अहो नित्यं तपःकर्मादि सूत्रतो हन्दि एवमेतदिति । प्रतिपत्तव्यं खलु पर्वादिषु तद्विधानात् ॥

रणैरेव स्थानांगे विधानात्, तथा च तदभिलापः। "छहिं ठाणेहिं समणे णिग्गंथे आहारमाहारेमाणे नाइक्कमइ तं० वेअणवेयावच्चे-रियट्ठाए अ संयमट्ठाए तह पाणवत्तिआए छट्ठं पुण धम्मचिंताए त्ति२६॥" इति हेतोर्निमित्तेन कर्त्तव्यतया नैमित्तिकत्वौचित्यात् कथं नित्यमेकभक्तमुक्तम् । भण्यते अत्रोत्तरं दीयते । नित्यमपि सर्वकालमपि, तद्भावादशनकरणानां वेदनोपशामनवैयावृत्त्यादीनां सद्भावान्नित्यमेकभक्तम्, अयं भावः "अहोनिच्चं" इत्यादिसूत्रादेकभक्तस्य नित्यत्वे सिद्धे 'छहिं ठाणेहिं' इत्यादिसूत्रस्याशनाधिकारविधायकत्वमेवोन्नीयते, नातिक्रामत्याज्ञामित्यतोऽनधिकृतत्वनिषेधस्यैव लाभात्, नित्यमधिकारवता क्रियमाणस्य च नित्यत्वाविरोध इति न कश्चिद्दोष इति । न च तथापि वैयावृत्त्यादिकर्मांतरांगत्वेनास्वतंत्रत्वान्न नित्यकर्मत्वमस्येति शंकनीयम्, वैयावृत्त्यादिकं प्रत्यनियतोपकारकस्याप्यस्य तपःकर्मत्वेन स्वतंत्रफलकस्य स्वतंत्रतयैव विधानात् । तथापि फलवत्त्वेनास्य नित्यत्वक्षतिरिति चेन्न, फलवत्त्वेपि नित्यत्वाविरोधात्, "यदकरणे प्रत्यवायस्तस्यैव नित्यत्वात्" इति दिक् ॥१०८॥

यत एवमुक्तप्रघट्टेनाविचारितानुष्ठाने दोषबाहुल्यमुपलभ्यते ततो गुणावहमर्थमुपदिशति ।

**तम्हा गुरुलहुभावं णाउं णिव्वेअओ पवट्टिज्जा । सज्झायाइसु सम्मं तत्तो तिव्वा हवइ सद्धा ॥ १०९ ॥**

तस्मात्, अन्यथा दोषदर्शनात्, गुरुलघुभावं गुणदोषविषयम्, ज्ञात्वा शास्त्रनीत्या विमृश्य, निर्वेदतस्तात्त्विकसंसारनैर्गुण्यावधारणात्, स्वाध्यायादिषु सूत्रपौरुषीकरणादिसाधुसमाचारेषु, सम्यक् क्षणमप्यप्रमादेन, प्रवर्त्तेत स्वाध्यायादेः प्रधानयोगत्वात् यतस्ततः स्वाध्यायादौ सम्यक्प्रवृत्तेरतिगाढप्रतिबंधप्रधानबोधोपपत्तेः, तीव्रा अतिशयवती, श्रद्धा भवति ॥

---

२६ षड्भिः स्थानैः श्रमणो निर्ग्रन्थ आहारमाहरन् नातिक्रमति तद्यथा वेदनवैयावृत्त्येर्यार्थाय च संयमार्थाय तथा प्राणवृत्त्या षष्ठं पुनर्धर्मचिन्तायै इति ॥

**णाए अण्णायाओ अणंतगुणिआ पवट्टए एसा। तीए किरिआतिसओ ततो विसिट्ठो खओवसमो॥**

यतः ज्ञाते वस्तुनि, अज्ञाताद्वस्तुनः सकाशात्, अनंतगुणिता श्रद्धा प्रवर्द्धते, दृश्यते ह्येकस्मिन्नेव रत्नेऽपरिनिश्चितदारिद्र्योपशमादिमाहात्म्यानां शिक्षातो गुरूपदेशाद्वा तन्निश्चयवतां चानंतगुणः श्रद्धाविशेषस्तद्वदिहापि भावनीयम्, तया तीव्रश्रद्धया, क्रियातिशयो भवति, विज्ञातगुणरत्नश्रद्धया तत्पालनपूजनस्तवनादिभावप्राबल्यात्तत्परिपालनाद्यत्यंतादरवत् साधूनामपि ज्ञातगुणक्रियाश्रद्धया तत्पालनादिविषयात्यंतादरोपपत्तेः, ततो विशिष्टः सानुबंधः, क्षयोपशमो ज्ञानावरणादिकर्मक्षयोपशमो भवति, सम्यक्चिकित्साप्रयोगादिव तथाविधरोगनिग्रह इति ॥ ११० ॥

**तत्तो पुणो ण बंधइ पायमणायारकारणं पावं। एवं विसुज्झमाणो जीवो परमं पयं लहइ ॥ १११ ॥**

ततः सानुबंधक्षयोपशमात्पुनर्द्वितीयवारम्, न बध्नाति, प्रायो बाहुल्येन, अनाचारकारणं नरकादिपातनिमित्तम्, पापं क्लिष्टकर्म, सत्क्रियातः प्राक्कर्मनिर्जरावदभिनवकर्मानागमस्याप्युपपत्तेः, प्रायोग्रहणं निकाचिताशुभकर्मणां केषांचित् स्कंदकाचार्यादिनामिवानाचारकारणाशुभकर्मबंधेन व्यभिचारवारणार्थम्, ततः क्लिष्टकर्मबंधाभावात्, विशुद्ध्यमानः प्रतिदिनमात्मस्वरूपनिवेशावदातायमानमना, जीवः परमपदं चतुर्वर्गाभ्यर्हितं सिद्धिस्थानं लभते ॥ १११ ॥ तदेवं स्वाध्यायाभ्यासादिना विशिष्टक्षयोपशमो मोक्षबीजं संपद्यत इति सिद्धम्, एतच्च परमतेनापि संवादयन्नाह ।

**भणिओ अकरणनियमो सक्किरियाए अओ परेहिंपि। णय परभणिअमजुत्तं जमभिन्नं अत्थओ दिट्ठं॥**

अत उक्तस्य युक्तत्वात्, परैरपि पातंजल्यादिभिरपि, सत्क्रियया भावशुद्धयोगेन, अकरणनियम एकांतपापा- 

प्रवृत्तिरूपः, भणितः पातंजलादिशास्त्रे प्रतिष्ठापितः, तीर्थांतरीयोक्तत्वादयमप्रामाणिकः स्यादित्याशंकां निरसितुमाह । न च परभणितमयुक्तं अयुक्तमनृतमेव, यदर्थत उपलक्षणाच्छब्दार्थाभ्यां च, अभिन्नं जिनवचनाविरोधि, दृष्टम्, परसमये हि द्विधा वाक्यान्युपलभ्यंते कानिचिदर्थत एवाभिन्नानि । "अप्पा णई वेअरणी अप्पा मे कूडसामली । अप्पा कामदुहा धेणू अप्पा मे णंदणं वणं[२७] ॥" इत्यादिवाक्यैर्यथा भारतोक्तानि " इंद्रियाण्येव तत्सर्वं यत् स्वर्गनरकावुभौ । निगृहीतविसृष्टानि स्वर्गाय नरकाय च ॥१॥ आपदां प्रथितः पंथा इंद्रियाणामसंयमः । तज्जयः संपदामग्रे येनेष्टं तेन गम्यताम् ॥२॥" इत्यादीनि । कानिचिच्छब्दतोऽर्थतश्च, यथा "पंचैतानि पवित्राणि सर्वेषां धर्मचारिणाम् । अहिंसा सत्यमस्तेयं त्यागो मैथुनवर्जनम् ॥ १ ॥" इत्यादीनि, न चैतेष्वप्रामाण्यं युक्तम्, अर्थाबाधात्, न चांधपरंपरापतितत्वेनैतदप्रामाण्यम्, सर्वस्यैव सुंदरार्थस्य दृष्टिवादमूलत्वेनातथात्वात्, वक्तृविश्वासेनाविकल्पतथाकारस्यायोग्यत्वेपि विकल्प्यतथाकारेऽनौचित्याभावादित्थं विकल्पेनैव सम्यग्दृष्टिपरिगृहीतत्वात्, सम्यक्श्रुतत्वोपपत्तेश्च, परप्रणीतत्वेन तदभ्युपगमादेकांतभयं चाज्ञानविजृंभितमेव, तदाहुः श्रीहरिभद्रसूरयः "जं अत्थओ अभिन्नं अण्णत्थासद्दओ वि तह चेव । तंमि पओसो मोहो विसेसओ जिणमय त्रियाण[२८] ॥ सव्वप्पवायमूलं दुवालसंगं जओ समक्खायं । रयणागरतुल्लं खलु तो सव्वं सुंदरं तंमि[२९]" ॥ ११२ ॥ अथायमकरणनियमः कुत्र भवति कुत्र चातिरिच्यत इत्याह ।

---

२७ आत्मा नदी वैतरणी आत्मा मे कूटशाल्मलिः । आत्मा कामदुघा धेनुः आत्मा मे नंदनं वनम् ॥

२८ यदर्थतोऽभिन्नं अन्यथाशब्दतोऽपि तथा चैव । तस्मिन् प्रद्वेषो मोहो विशेषतो जिनमतं विजानीहि ॥

२९ सर्वप्रवादमूलं द्वादशांगं यतः समाख्यातम् । रत्नाकरतुल्यं खलु तस्मात्सर्वं सुंदरं तस्मिन् ॥

**देसविरइगुणठाणे पढमो एसो उ गंठिभेअंमि । रोगिकिसत्तणतुल्लो सुसंजयाणं विसिट्ठयरो ॥११३॥** 

एषोऽकरणनियमः नियताब्रह्मसेवादिनिवृत्तिरूपः, प्रथम आदिमः, ग्रंथिभेदे मोहग्रंथिनिदारणे, देशविरतिगुणस्थाने भवति, भिन्नग्रंथिकेन पुनरपि व्यावर्त्तितपापाकरणात्, कीदृश इत्याह । रोगिकृशत्वतुल्यः, द्विविधं हि शरीरे कार्श्यमुत्पद्यते, एकं नीरोगस्यापि दुर्भिक्षादिषु तथाविधभोजनाभावात्, अपरं च पूर्यमाणभोजनसंभवेपि राजयक्ष्मरोगग्रासात्, तत्र प्रथमस्य समुचितभोजनलाभेऽविकलस्तदुपचयः स्यादेव, द्वितीयस्य तु तैस्तैरुपचयकारणैरुपचर्यमाणस्यापि प्रतिदिनं हानिः, एवं सामान्यक्षयोपशमप्रयोज्यं पापाकरणं सामग्रीलाभात् पुनरपि प्रतियोग्युन्मज्जनादपचययोग्य एव, ग्रंथिभेदकालीनविशिष्टक्षयोपशमप्रयोज्यस्तु पापाकरणनियमो द्वितीयकार्श्यवत्प्रतिसमयमुपचययोग्य एव तदत्यंतनिवृत्त्या यावत् सर्वक्लेशविकलो मुक्तिलाभ इति विभावनीयम्, तदिदमुक्तम्, “पावे अकरणनियमो पायं परतन्निवित्तिकरणाओ । णेओ अ गंठिभेदे भुज्जो तयकरणरूवो उ[३०] ॥” नन्वेवं चतुर्थगुणस्थान एवास्य प्राथम्यमुपपद्यते तत्रैव गुणश्रेणीप्रारंभेण प्राक्तनदशापेक्षया पुनः पापाकरणं प्रारंभात्, युक्तं चैतत् ‘सम्मद्दिट्ठी जीवो’ इत्यादितंत्रसिद्धत्वादिति चेत्, सत्यम्, तदा मिथ्यात्वाश्रवनिवृत्तावप्यब्रह्माद्याश्रवानिवृत्त्या विरतिरूपस्य पापाकरणस्यायोगात्, अन्यथा चतुर्थपंचमगुणस्थानसांकर्यापातात्, न च विरत्यावरकानंतानुबंधिनिवृत्तौ तदा तदापत्तिः शंकनीया, वैयावृत्त्यादिरूपाल्पतद्भेदोपपत्तावपि पंचमादिगुणस्थानघटकतदनुपपत्तेरिति विभावनीयम् । सुसंयतानां शास्त्राभ्यासभस्मपरामर्शविशदीभूतहृदयानां भावसाधूनाम्, यावज्जीवं समस्तपापोपरमात् विशिष्टतरो देशविरतिगुणस्थानस्थलीयाकरणनियमापेक्षयाऽधिकतरोऽकरणनियमः, भावोत्कर्षेणैव तदुत्कर्षात्, तदिदमाह ।

---

३० पापेऽकरणनियमः प्रायः परतन्निवृत्तिकरणात् । ज्ञेयश्च ग्रंथिभेदे भूयस्तदकरणरूपस्तु ॥

" देसविरइगुणठाणे अ करणणियमस्स एव सब्भावो । सव्वविरइगुणठाणे विसिट्ठतरओ इमो होइ ।। जं सो पहाणतरओ आसयभेओ तओ अएसो त्ति३१ ।। ११३ ।। यत एवमाशयप्रकर्षादेतत्प्रकर्षः ।

**एत्तो अकरणनियमो खीणे कम्मंमि खवगसेढीए। एत्तो अ वीयरागो कुणइ ण किंची गरहणिज्जं।।११४**

इतश्चैत एव, क्षपकश्रेण्यां क्षीणे कर्मणि अकरणनियमस्तस्यां हि यत्कर्म यत्र क्षीणं तत्पुनर्न क्रियत इति कर्मस्तवादौ प्रसिद्धम्, एतच्च कर्मक्षयनिबंधनाशयप्रकर्षेणाकरणनियमप्रकर्षादुपपद्यते, क्षायोपशमिकक्षायिकयोस्तयोर्मिथोऽत्यंत विशेषात् । तदिदमाह । "एत्तो च्चिय सेढीए णेयो सव्वत्थवी एसो३२।।" यत एव कर्मक्षयात् कर्मप्रकृतीनां विशिष्टतरोऽकरण-नियमः क्षपकश्रेण्यामुपपन्नोऽत एव तज्जन्यगर्हितप्रवृत्तेरपि तत एव तथाऽकरणनियमाद्वीतरागः क्षीणमोहादिगुणस्थानवर्त्ती मुनिः, न नैव, करोति किंचिद्गर्हणीयम् जीवहिंसादि, देशोनपूर्वकोटीकालं जीवन्नपि गर्हणीयव्यापारबीजभूतकर्मक्षये गर्हणीयप्रवृत्तेरयोगात् । तदिदमाह "एत्तो अ वीयरागो ण किंचिवि करेइ गरहणिज्जं तु । ता तत्तगाइ खवणाइ कप्पओ एस विन्नेओ३३ ।।" "तह भावसंजयाणं सुच्चइ इह सुहपरंपरासिद्धी । सा वि हु भुज्जइ एवं ण अन्नहा चिंतणीयमिणं३४।। " " सय-

---

३१. देशविरतिगुणस्थाने च करणनियमस्यैव सद्भावः । सर्वविरतिगुणस्थाने विशिष्टतरोऽयं भवति ।। यस्मात्स प्रधानतरः आशयभेदस्तत आदेश इति ।।

३२ इतश्चैव श्रेण्यां ज्ञेयः सर्वत्राप्येषः ।।

३३ इतश्च वीतरागः न किंचिदपि करोति गर्हणीयन्तु । तस्मात्तत्रगायाः क्षपणायाः कल्प एष विज्ञेयः ।।

३४ तथा भावसंयतानां सूच्यत इह शुभपरंपरासिद्धिः । सापि खलु भुज्यत एवं नान्यथा चिंतनीयमिदम् ।।

गरहणिज्जवावारबीअभूअंमि हंदि कम्मंमि । खविए पुणो अ तस्साकरणंमी सुहपरंपरओ[35] ॥" अत्र हि क्षायिकाकरणनियमात् तद्गतिच्छेदसुखपरंपराद्वीतरागस्य गर्हिताऽप्रवृत्तिर्निदर्शितेति ॥११४॥ ननु यदि सदा गर्हणीयाऽप्रवृत्तिर्वीतरागस्याभ्युपगता तदा तस्य गमनागमनशब्दादिव्यापारो न युक्तस्तस्यां ततोऽन्योन्यपुद्गलप्रेरकत्वेनापि परप्राणव्यपरोपणानुकूलत्वेन हिंसांतर्भूततया गर्हणीयत्वाद्धिंसादयो दोषा एव हि गर्हणीया लोकानामित्याशंक्य समाधत्ते ।

**ण य तस्स गरहणिज्जो चेट्ठारंभोत्थि जोगमित्तेणं । जं अप्पमत्ताईणं सजोगिचरमाण णो हिंसा ॥११५॥**

न च तस्य वीतरागस्य, चेष्टारंभो गमनागमनशब्दादिव्यापारः, गर्हणीयोऽस्ति, यद् यस्माद्, योगमात्रेण रागद्वेषासहचरितेन केवलयोगेन, अप्रमत्तादीनां सयोगिचरमाणां जीवानाम्, नो नैव, हिंसा तेषां योगस्य कदाचित् प्राण्युपमर्दोपहितत्वेपि तत्त्वतो हिंसारूपत्वाभावात्, तत्त्वतो हिंसाया एव च गर्हणीयत्वादिति भावः, व्यक्तीभविष्यति चेदमुपरिष्टात् ॥ ११५ ॥ नन्विदं स्वमनीषिकामात्रविजृंभितं केन प्रमाणीक्रियतामित्याशंक्याह ।

**भणियं च कप्पभासे वत्थच्छेयाहिगारमुद्दिस्स । एयं सुविसेसेउं पडिवज्जेअव्वमियसम्मं ॥ ११६ ॥**

भणितं चैतदनुपदोक्तम्, कल्पभाष्ये वस्त्रच्छेदनविधानसमर्थनं हृदि निधाय सुविशेष्य सपूर्वपक्षोत्तरपक्षं वितत्य, इति हेतौ सम्यक्प्रतिपत्तव्यमदः, कल्पभाष्याभिलापश्चायम्, "*सद्दो नहिं मुत्थति छेदणा वा, धावंति ते दोवि उ जाव लोगो ।

---

३५ स्वकगर्हणीयव्यापारबीजभूते हन्दि कर्मणि । क्षपिते पुनश्च तस्याकरणे शुभपरम्परातः ॥

* एतासां कल्पभाष्यगाथानामननुवादनिबन्धनं पूर्ववद्ध्येयम् ॥ एवमग्रेपि भाव्यम् ॥

वत्थस्स देहस्स य जोविकंपो तत्तो विवाताविततरंति लोगं ॥" भो आचार्य तत्र वस्त्रे छिद्यमाने शब्दः संमूर्च्छतिच्छेदनका वा सूक्ष्मावयवा उड्डीयंते। एते च द्वयेपि विनिर्गता लोकांतं यावत् प्राप्नुवंति तथा तस्य देहस्य च यो विकंपश्चलनं ततोऽपि विनिर्गता वातादयः प्रसरंतः सकलमपि लोकमापूरयंति। "अहिछसी जंति ण ते उ दूरं संखोभिआ तेहवरे वयंति। उड्डं अहे यावि चउद्दिसिं पि पूरिंति लोगं तु खणेण सव्वं॥" अथाचार्य त्वं इच्छसि मन्यसे, ते वस्त्रच्छेदनसमुत्थाः शब्दपक्ष्मवातादिपुद्गलाः, न दूरं लोकांतं यांति, तर्हि, तैः संक्षोभिताश्चालिताः संतोऽपरे व्रजंति एवमपरापरपुद्गलप्रेरिताः पुद्गलाः प्रसरंतः क्षणेनोर्द्धमधस्तिर्यक् चतसृष्वपि दिक्षु सर्वमपि लोकमापूरयंति। यत एवमतः। "विन्नाय आरंभमिणं सदोसं तम्हा जहालद्धमहिट्ठिइज्जा। वुत्तं स एओ खलु जाव देही ण होइ सो अंतकरी तु ताव॥" इममनन्तरोक्तं सर्वलोकपूरणात्मकमारंभं सदोषं सूक्ष्मजीवविराधनया सावद्यं विज्ञाय तस्मात् कारणात् यथालब्धं वस्त्रमधितिष्ठेत् न छेदनादि कुर्यात् यत उक्तं भणितम्। व्याख्याप्रज्ञप्तौ, यावदयं देही जीवः, सैजः सकंपः चेष्टावानित्यर्थः तावदसौ कर्मणो भवस्य वा अंतकारी न भवति, तथाच तदालापकः। "जाव णं एस जीवे सया समिअं एअइ वेअइ चलइ फंदइ घुट्टइ खुभइ उदीरइ तं तं भावं परिणमइ ताव णं तस्स जीवस्स अंते अंतकिरिया ण भवति३६॥" अथेत्थं भणिष्यथ एवं तर्हि भिक्षादिनिमित्तमपि चेष्टा न विधेयेति, नैवं यतः। "जा यावि चिट्ठा इरिआइआओ संपस्सहेताहिं विणा ण देहो। संचिट्ठए नेव पछिज्जमाणे वत्थंमि संजायइ देहणासो॥" याश्चापि चेष्टा ईर्यादिकाः संपश्यत तत्रेरणमीर्याभिक्षासंज्ञाभूम्यादौ गमनं आदिशब्दाद्भोजनशयनादयो गृह्यंते, एताभिर्विना देहः पौद्गलिकत्वान्न संतिष्ठते न चि-

३६ यावत् एष जीवः सदा समितं एजते वेपते चलति स्पन्दते घुट्टते क्षुभ्नाति उदीरयति तं तं भावं परिणमते तावत् तस्य जीवस्य अन्ते अंतक्रिया न भवति॥

र्वहति, देहमंतरेण च संयमस्यापि व्यवच्छेदः प्राप्नोति वस्त्रे पुनरच्छिद्यमानेनैवं देहनाशः संजायतेऽतो न तच्छेदनीयम्, किंच, " जहा जहा अप्पतरो से जोगो तहा तहा अप्पतरो से बंधो । निरुद्धजोगिस्स च उ ण होइ अच्छिद्दपोतस्सव अंबुणाहे ॥ " यथा यथा से तस्य जीवस्याल्पतरो योगस्तथा तथा से तस्याल्पतरो बंधो भवति, यो वा निरुद्धयोगी शैलेश्यवस्थायां सर्वथा मनोवाक्कायव्यापारविरहितः तस्य कर्मबंधो न भवति, दृष्टांतमाह, अच्छिद्रपोतस्येवांबुनाथे, यथा किल निश्छिद्रप्रवहणं सलिलसंचयसंपूर्णेपि जलधौ वर्त्तमानं स्वल्पमपि जलं नाश्रवति, एवं निरुद्धयोगमपि जंतुः कर्मवर्गणापुद्गलैरंजनचूर्णपूर्णसमुद्गकवन्निरंतरं निचितेपि लोके वर्त्तमानः स्वल्पीयोऽपि कर्म नोपादत्तेऽतः कर्मबंधस्य योगान्वयव्यतिरेकानुविधायितया तत्परिजिहीर्षुणा वस्त्रच्छेदनादिव्यापारो न विधेयः, इत्थं परेण स्वपक्षे स्थापिते सति, सूरिराह "आरंभमिठो जइ आसवाय गुत्ती य सेआय तहा नु साहू । णो फंदवारेहि वछिज्जमाणं पतिण्णहाणी व अतोण्णहा ते ॥ " आरंभमिठोत्ति, मकारोऽलाक्षणिकः, हे नोदक यथारंभस्तवाश्रवाय कर्मोपादानायेष्टोऽभिमतः, गुप्तिश्च तत्परिहाररूपा श्रेयसे कर्मानुपादानायाऽभिप्रेता, तथा च सति हे साधो मास्पदं मा वा वस्त्रं छिद्यमानं वारय, किमुक्तं भवति यदि वस्त्रच्छेदनमारंभतया भवता कर्मबंधनिबंधनमभ्युपगम्यते, ततो येयं वस्त्रच्छेदनप्रतिषेधाय हस्तस्पंदनात्मिका चेष्टा क्रियते यो वा तत्प्रतिषेधको ध्वनिरुच्चार्यते तावप्यारंभतया भवता न कर्त्तव्यौ, अतो मदुक्तोपदेशादन्यथा चेत् करोषि, ततस्ते प्रतिज्ञाहानिः, स्ववचनविरोधलक्षणं दूषणमापद्यत इत्यर्थः, अथ ब्रवीथा योऽयं मया वस्त्रच्छेदनप्रतिषेधको ध्वनिरुच्चार्यते स आरंभप्रतिषेधकत्वान्निर्दोष इति, अत्रोच्यते । " अदोसवं ते जइ एस सद्दो अण्णो वि कम्हा ण भवे अदोसो । अहिच्छया तुज्झ सदोस एक्को एवं सती कस्स भवे न सिद्धी ॥ " यद्येष त्वदीयः शब्दोऽदोषवान् ततोऽन्योपि वस्त्रच्छेदनादिसमुत्थः शब्दः

कस्मादद्दोषो न भवेत्, तस्यापि प्रमाणातिरिक्तपरिभोगविभूषादिदोषपरिहारहेतुत्वात्, अथेच्छया स्वाभिप्रायेण तवैको वस्त्रच्छेदनशब्दः सदोषोऽपरस्तु निर्दोषः, एवं सति कस्य न स्वपक्षसिद्धिर्भवेत् , सर्वस्यापि चागाढवचनमात्रेण भवत इव स्वाभिप्रेतार्थसिद्धिर्भवेदिति भावः। ततश्चास्माभिरप्येवं वक्तुं शक्यम् , योऽयं वस्त्रच्छेदनसमुत्थः शब्दः स निर्दोषः शब्दत्वात् भवत्परिकल्पितनिर्दोषशब्दवदिति। किंच। " तं छिंदओ होज्ज सइं तु दोसो खोभाइयं चेव जओ करेइ। जे पेहतो होंति दिणे दिणे तु संपाउणं तेय णिवुज्झ ते वि॥" यतस्तदेव वस्त्रं छिद्यमानं पुद्गलानां क्षोभादि करोति अतस्तद्वस्त्रं छिंदतः सकृदेकवारं दोषो भवति, अच्छिद्यमाने तु वस्त्रे प्रमाणातिरिक्तं तत्प्रत्युपेक्षमाणस्य ये भूमिलोलनादयः अप्रत्युपेक्षणा दोषा दिने दिने भवन्ति, ये च तद्वस्त्रं संप्राप्नुण्वंतो विभूषादयो बहवो दोषास्तानपि विबुध्य, स्वाक्षिणी निमील्य सम्यङ्निरूपयेति भावः। आह यदि वस्त्रच्छेदने युष्मन्मतेनापि सकृद्दोषः संभवति ततः परिह्रियतामसौ गृहस्थैः स्वयोगेनैव यच्छिन्नं वस्त्रं तदेव गृह्यताम्, उच्यते। "घेत्तव्वगं भिन्नमहिच्छियं ते जा मग्गते हाणि सुतादि ताव। अप्पेस दोसो गुणभूतिजुत्तो प्पमाणमेवं तु जतो करेति॥" अथ न तवेष्टं मतं यथा चिरमपि गवेष्य भिन्नं ग्रहीतव्यम्, तत उच्यते यावत्तच्छिन्नं वस्त्रं मार्गयति तावत्तस्य श्रुतादौ सूत्रार्थपौरुष्यादौ हानिर्भवति। अपि च य एष वस्त्रच्छेदनलक्षणो दोषः स प्रत्युपेक्षणशुद्धिविभूषापरिहारप्रभृतीनां गुणानां भूत्या संपदा युक्तः बहुगुणकलित इति भावः। कुत इत्याह। यतः प्रमाणमेव वस्त्रस्य तदानीं साधवः कुर्वन्ति न पुनस्ततोऽधिकं किमपि सूत्रार्थव्याघातादिकं दूषणमस्तीति। अथ 'जायावि चेट्ठा इरियाइयाओ' इत्यादि परोक्तं परिहरन्नाह। "आहारणीहारविहीसु जोगो सव्वो अदोसाय जहा जतस्स। हियाय सस्संमिव सस्सियस्स भंडस्स एयं परिकम्मणं तु॥" यथा यतस्य प्रयत्नपरस्य साधोराहारनीहारादिविधिविषयः सर्वोपि योगो भवन्मतेनाप्यदोषाय भवति, तथा भांडस्योपकरणस्य परिकर्म-

णमपि छेदनादिकमेवमेव यतनया क्रियमाणं निर्दोषं द्रष्टव्यम्, दृष्टांतमाह ' हियाय सस्संमि व सस्सियस्सत्ति ' शस्येन चरति शास्यिकस्तस्य यथा तद्विषयं परिकर्मणम् नंदिणनादिकं हिताय भवति तथेदमपि भांडपरिकर्मणम्, तथाचोक्तम्, " यद्वत् शस्यहितार्थं शस्याकीर्णेपि विचरतः क्षेत्रे । या भवति शस्यपीडा यत्नवतः साल्पदोषाय ॥ तद्वज्जीवहितार्थं जीवाकीर्णेपि विचरतो लोके । या भवति जीवपीडा यत्नवतः साल्पदोषाय ॥" किञ्च । "अप्पेव सिद्धं तमजाणमाणो तं हिंसयं भाससि योगवंतं । दव्वेण भावेण य संविभत्ता चत्तारिभंगा खलु हिंसगत्ते ॥ " अपीत्यभ्युच्चये, अस्त्यन्यदपि वक्तव्यमिति भावः, यदेवं योगवंतं वस्त्रच्छेदनादिव्यापारवंतं जीवं हिंसकं त्वं भाषसे, तत् निश्चीयते सम्यक्सिद्धांतमजानान एवं प्रलपसि, नहि सिद्धांतयोगमात्रप्रत्ययादेव हिंसोपवर्ण्यतेऽप्रमत्तसंयतादीनां सयोगिकेवलिपर्यंतानां योगवतामपि तदभावात् । कथं तर्हि सा प्रवचने प्ररूप्यत इत्याह । द्रव्येण भावेन च संविभक्ताश्चत्वारो भंगाः खलु हिंसकत्वे भवन्ति, तथाहि द्रव्यतो नामैका हिंसा न भावतः, भावतो नामैका हिंसा न द्रव्यतः, एका द्रव्यतोपि भावतोपि, एका न द्रव्यतो नापि भावतः, अथैषामेव यथाक्रमं भावनां कुर्वन्नाह । "आहच्च हिंसा समिअस्स जाउ सा दव्वओ होइ ण भावतो उ । भावेण हिंसा तु असंजतस्स जेवावि सत्ते ण सदा वधेति ॥ " "संपत्ति तस्सेव जदा भविज्जा सा दव्वहिंसा खलु भावओ अ । अज्झत्थसुद्धस्स जहा ण होज्जा वधेण जोगो दुहतोव हिंसा ॥ " समितस्येर्यासमितावुपयुक्तस्य, याहत्य कदाचिदपि हिंसा भवेत्, सा द्रव्यतो हिंसा, इयं च प्रमादयोगाभावात्तत्त्वतोऽहिंसैव मंतव्या, "प्रमत्तयोगात् प्राणव्यपरोपणं हिंसेति" वचनात्, भावेन भावतो या हिंसा न तु द्रव्यतः साऽसंयतस्य प्राणातिपातादेरनिवृत्तस्य, उपलक्षणत्वात् संयतस्य वाऽनुपयुक्तगमनादि कुर्वतः,

यानपि सत्त्वानसौ सदैव न हंति तानप्याश्रित्य मंतव्या । "जे वाविज्जंती णियमा तेसिं चिय हिंसओ सो उ[37] ।" इति वचनात् । यदा तु तस्यैव प्राणव्यपरोपणसंप्राप्तिर्भवति तदा सा द्रव्यतो भावतश्च हिंसा प्रतिपत्तव्या, यः पुनरात्मना चेतःप्रणिधानेन शुद्ध उपयुक्तगमनागमनादिक्रियाकारीत्यर्थः, तस्य यदा वधेन प्राणव्यपरोपणेन सह योगः संबंधो न भवति, तदा द्विधापि द्रव्यतो भावतोऽपि च, हिंसा न भवतीति भावः । तदेवं भगवत्प्रणीतप्रवचने हिंसाविषयाश्चत्वारो भंगा उपवर्ण्यन्ते, अत्र चाद्यभंगे हिंसायां व्याप्रियमाणकाययोगेऽपि भावत उपयुक्ततया भगवद्भिरहिंसक एवोक्तः, ततो यदुक्तं भवता वस्त्रच्छेदनव्यापारं कुर्वतो हिंसा भवतीति तत्प्रवचनरहस्यानभिज्ञतासूचकमिति ॥११६ ॥ ननु यद्येवमप्रमत्तादीनां सयोगिकेवलिपर्यंतानां योगमात्रेण न हिंसा तदा गर्हणीयप्रवृत्तिप्रतिपक्षोऽकरणनियम एतेषु सर्वेष्वविशेषेणैवोच्यतां इत्थं चात्र क्षीणमोहादिरेव मुनिरुपदेशपदवृत्त्यादौ कथं शृंगग्राहिकया गृहीत इत्याशंकायामाह ।

**परिणिट्ठियवयणमिणं जं एसो होइ खीणमोहंमि । उवसमसेढीए पुण एसो परिनिट्ठिओ ण हवे ॥११७**

यदेषोऽकरणनियमः क्षीणमोहे प्राथम्येन प्रवर्त्तत इत्युच्यते, तत्परिनिष्ठितवचनं क्षपकश्रेण्यामारब्धोऽयम्, क्षीणमोहे स्वरूपतो निष्ठां यातीत्यर्थः, अर्वाक् तु विशुद्ध्यमानेन निरतिचारचारित्रेणैव क्षपकश्रेण्यारोहात् फलतस्तदुपपत्तावपि यावन्न स्थितकर्मांतरायक्षयस्तावन्नास्य स्वरूपतो निष्ठा, कात्स्न्येंन तादृशकर्माकरणायोगात्, कात्स्न्यर्स्यैव च निष्ठार्थत्वात्, यावच्च नेयं न तावद्गर्हणीयप्रवृत्तिकरणस्य योग्यतया निवृत्तिनिष्ठापीति द्रष्टव्यम्, फलतोऽप्यर्वाक्स्थानांतरे व्यभिचारान्नाकरणनियम इति व्यवच्छेद्यं दर्शयति । उपशमश्रेण्यां पुनरेषोऽकरणनियमः, परिनिष्ठितो न भवेत्, दशाविशेषे कार्या-

---

३७ ये व्यापाद्यन्ते नियमात्तेषामेव हिंसकः स तु ॥

भावेपि स्वरूपतः कर्मणामनुच्छेदात् पुनः प्रतिपाताबश्यकत्वात्, तदुक्तम्। 'उवसामपुवणीआ इत्यादि' ॥११७॥ ननु हिंसादेर्द्विधा परिणतिरेका द्रव्यतोऽपरा च भावतः, आद्या मोहनीयकर्मसत्ताजन्या, अपरा च तदुदयजन्या, तदुभयनिवृत्तिश्च मोहक्षय एवेति, क्षीणमोहस्य गर्हितमात्राप्रवृत्तिर्युक्तिमती नत्वन्यस्य, तस्य मोहसत्तया द्रव्यपरिणत्यप्रच्यवात्, अत एव तत्प्रच्यव एवाकरणनियमविशेषः क्षीणमोहस्येत्याशंकायामाह।

**दव्वपरिणामचाए ण विसेसो जं ण तंमि तदवचओ। सुद्धस्स उ संपत्ती अफला सुत्तंमि पण्णत्ता॥ ११८**

द्रव्यपरिणामत्यागे न विशेषः प्रस्तुताकरणनियमस्येति दृश्यम्, यद्यस्मात्, तस्मिन् द्रव्यपरिणामे सति, तदपचयोऽकरणनियमापकर्षः, नास्ति, कथमेतदित्यत आह। शुद्धस्य तु ईर्याद्युपयुक्तस्य तु, संपत्तिः प्राणव्यपरोपणोपधानरूपा, सूत्रेऽफला कर्मबंधफलाजननी, प्रज्ञप्ता, तथा च सूत्रम्, "उच्चालिअंमि पाए इरियासमियस्स संकमट्ठाए। वावज्जेज कुलिंगी मरेज्ज तं जोगमासज्ज३८॥ ण हु तस्स तण्णिमित्तो बंधो सुहुमो वि देसिओ समए। अणवज्जो उवओगेण सव्वभावेण सो जह्मा३९॥" न च यस्मिन् सति यदपकर्षो नास्ति तन्निवृत्तौ तदुत्कर्षो युज्यते, घटस्येव पटनिवृत्तौ, अपि च द्रव्यपरिणामत्यागोपि तस्य कथं श्रद्धेयः, हिंसादिसत्त्व एव रागादितीव्रमंदताज्ञाताज्ञातभावाधिकरणवीर्यनानात्वात् कर्मबंधाबंधनानात्वस्य तंत्रे प्रतिपादनात्, तथा च कल्पभाष्यम्। "तिव्वे मंदे णायमणाए भावाहिकरणविरिए अ। जह दीसति नाणत्तं तह

---

३८ उच्चालिते पादे ईर्यासमितस्य संक्रमार्थाय। व्यापाद्येत कुलिंगी म्रियेत तद्योगमासाद्य॥

३९ न खलु तस्य तन्निमित्तो बन्धः सूक्ष्मोऽपि देशितः समये। अनवद्य उपयोगेन सर्वभावेन स यस्मात्॥

जाणसु कम्मबंधे वि[४०] ॥" "तिव्वेहिं होइ तिव्वो रागादीएहि उवचओ कम्मे । मंदेहि होइ मंदो मज्झिमपरिणामओ मज्झो[४१] ॥" "जाणं करेइ एक्को हिंसमजाणमपरो अविरतो अ । तत्थ वि बंधविसेसो महंतरं देसिओ समए[४२] ॥" "विरतो पुण जो जाणं कुणइ अजाणं च अप्पमत्तो व । तत्थ वि अज्झत्थसमा संजायति णिज्जरा ण चओ[४३] ॥" "एगो खओवसमिए वट्टति भावे परो अ ओदइए । तत्थ वि बंधविसेसो संजायति भावणाणत्ता[४४] ॥" "एमेव ओवसमिए खओवसमिए तहेव खइए अ । बंधाबंधविसेसो ण तुल्लबंधा य जे बंधी[४५] ॥" "अहिगरणं पुव्वुत्तं चउव्विहं तं समासओ दुविहं । णिव्वत्तणयाए अ संजोगे चेव णेगविहं[४६] ॥" "एगो करेइ परसुं णिव्वत्तेइ णखच्छेदणं अवरो । कुंतकणगे य तिव्वे आरिय सूई अ अवरो उ[४७] ॥" "सूईसुंपि विसेसो कारणसूईसु सिव्वणीसुं च । संगामिय परिआणिअ एमेव य जा-

---

४० तीव्रो मन्दो ज्ञाताज्ञातयोर्भावाधिकरणवीर्येषु च । यथा दृश्यते नानात्वं तथा जानीहि कर्मबन्धेऽपि ॥
४१ तीव्रैर्भवति तीव्रो रागादिभिरुपचयः कर्मणि । मन्दैर्भवति मन्दो मध्यमपरिणामतो मध्यः ॥
४२ जानन्करोत्येको हिंसामजानन्नपरोऽविरतश्च । तत्रापि बन्धविशेषो महदन्तरो देशितः समये ॥
४३ विरतः पुनर्यो जानन् करोत्यजानंश्चाप्रमत्तो वा । तत्राप्यध्यात्मसमा संजायते निर्जरा न चयः ॥
४४ एकः क्षायोपमिके वर्तते भावे परश्चौदयिके । तत्रापि बन्धविशेषः सञ्जायते भावनानात्वात् ॥
४५ एवमेवौपशमिके क्षायोपशमिके तथैव क्षायिके च । बन्धाबन्धविशेषो न तुल्यबन्धकाश्च ये बन्धिनः ॥
४६ अधिकरणं पूर्वोक्तं चतुर्विधं (पूर्वं प्रथमोद्देशके यथा निर्वर्तना १ निक्षेपणा २ संयोजना ३ निसर्जना ४ भेदाच्चतुर्विधमुक्तं तथैव ज्ञातव्यं नवरं) तत्समासतो द्विविधम् । निर्वर्तनायां च संयोगे चैवानेकविधम् ॥
४७ एकः करोति परशुं निर्वर्तयति नखच्छेदनगपरः । कुन्तकणकौ च तीव्र आरिकां सूचींश्चापरस्तु ॥

णमाईसु[४८] ॥ " " कारगकरेंतगाणं अहिगरणं चेव तं तहा कुणई । जह परिणामविसेसो संजायति तेसु वत्थूसु[४९] ॥ " " संजोययते कूडं हलं पडं ओसहे य अण्णोण्णं । भोअणविहिं च अण्णो तत्थ वि नाणत्तगं बहुहा[५०] ॥ " " णिव्वत्तणा य संजोअणा य सगडाइएसु अ भवंति । आसज्जुत्तरकरणं णिव्वत्ती मूलकरणं तु[५१] ॥ " " देहबलं खलु विरियं बलसरिसो चेव होइ परिणामो । आसज्ज देहविरियं छट्ठाणगया तु सव्वत्तो[५२] ॥ " " अहवा बालाईयं तिविहं विरिअं समासओ होइ । बंधविसेसो तिण्हवि पंडिय बंधी अबंधी अ[५३] ॥ " " यथाहि घातकचित्तबलात् पूर्वदशायामधिकरणभावपरिणतमपि शरीरादिकं घातकचित्तविगमे न दोषाय तद्वद्द्रव्याश्रवपरिणामोपि तथा, न चेदेवं तदोपकरणादिना द्रव्यपरिग्रहोऽपि दोषाय भविष्यति । " तत्थ अरत्तदुठस्स साहूणो धम्मोवगरणं पढमो[५४] " इति वचनेन धर्मोपकरणस्यापि द्रव्यतः परिग्रहत्वनिर्णयात्, द्रव्यपरिग्रहपरिणतिर्न दोषाय द्रव्यहिंसापरिणतिस्तु दोषायेति तु स्वगृह एव निगद्यमानं शोभते, एतेन

४८ सूचीष्वपि विशेषः कारणसूचीषु सीवनीषु च । सांग्रामिकं पारियानिकमेवमेव च यानादिषु ॥
४९ कारककुर्वतोरधिकरणं चैव तत्तथा करोति । यथा परिणामविशेषस्संजायते तेषु वस्तुषु ॥
५० संयोजयति कूटं हलं पटं औषधानि चान्योन्यम् । भोजनविधिं च अन्यस्तत्रापि नानात्वकं बहुधा ॥
५१ निर्वर्तना च संयोजना च शकटादिकेषु च भवतः । आसाद्योत्तरकरणं निर्वृत्तिर्मूलकरणन्तु ॥
५२ देहबलं खलु वीर्यं बलसदृशश्चैव भवति परिणामः । आसाद्य देहवीर्यं षट्स्थानगतास्तु सर्वतः ॥
५३ अथवा बालादिकं त्रिविधं वीर्यं समासतो भवति । बन्धविशेषस्त्रयाणामपि पंडितो बन्ध्यबन्धी च ॥
५४ तत्रारक्तद्विष्टस्य साधोर्धर्मोपकरणं प्रथमः ॥

ततो घातकचित्ताक्षेपोऽपि निरस्तः, अथापवादं विना जानतो हिंसा दुष्टैव दृष्टा, हंत, तर्हि, सौम्य जानतोऽपवादं विना द्रव्यपरिग्रहोपि किं न तथा, अशक्यपरिहारः स इति चेत्, इतरत्रापि तुल्यमेतत्, नह्युपेत्य हिंसादौ प्रवृत्तिरितरस्यापि संभवति । अथ क्षीणान्तराय नाशक्यपरिहारसंभवो धर्मोपकरणधरणं तु व्यवहारसंग्रहार्थमिति चेत्, अस्तु तथा तथापि दोषनिवारणं कुतः, रागाद्यभावादिति चेत्, एवं गमनादिप्रवृत्तावपि पुद्गलाभिघातजपरप्राणव्यपरोपणे रागादिरहितस्य किं दूषणम्, योगानामशुद्धतापत्तिरिति चेत्, न, योगानामशुद्धतायाः शुद्धताया वा स्वरूपतोऽव्यवस्थितत्वाद्रागादिसाहित्यासाहित्याभ्यामेव तद्व्यवस्थितेः, अत एवापवादपदप्रत्ययाया विराधनाया अपि निर्जराहेतुत्वं तत्र तत्र व्यवस्थापितम्, व्यवहारतोऽशुद्धा अपि योगाः कथं भगवतां संभवंतीति चेत्, नन्वेवं व्यवहारतोऽशुद्धा नीहारादिविषयोऽपि तेषां त्यज्यंताम्, शास्त्रव्यवहारतः शुद्धा एव त इति चेत्, इतरेपि ततस्तथैवेति दिक् ॥ ११८ ॥ ननु यद्येवं द्रव्यहिंसादेर्न गर्हणीयत्वम्, तदा कः प्राग्गर्हणीयलेशोऽस्ति कथं च न किंचिदपि गर्हणीयं क्षीणमोहस्येत्याशंकायामाह ।

**सव्वे वि अ अइयारा संजलणाणं तु उदयओ हुंति । एयस्स होइ निट्ठा तयभावे वीयरागस्स ॥११९॥**

सर्वेपि चातिचाराः संज्वलनानामुदयाद्भवंति, चारित्रिणां हस्तिशरीरव्रणतुल्याश्चारित्रदेशभंगरूपाः, तदभावे वीतरागस्य, एतस्याकरणनियमस्य, निष्ठा भवति कदापि लेशतोऽपि गर्हणीयाकरणात्, अत एव केवली क्षीणचारित्रावरणत्वात् निरतिचारसंयमत्वादप्रतिषेधित्वाच्च न कदाचिदपि प्राणानामतिपातयिता भवतीत्यन्यत्रोक्तम्, संज्वलनोदयादिसंपाद्यायास्तत्र फलनिरपेक्षप्रवृत्तेरभावात् ॥ ११९ ॥ ननु तथापि द्रव्यहिंसायास्तत्त्वतो गर्हणीयत्वं माभूल्लोकगर्हणीयत्वं त्वस्त्वेवेति कथं लोकगर्हणीया प्रवृत्तिः क्षीणमोहस्योपपद्यत इत्याशंकायाम्, लोकः किमत्र शिष्टोऽशिष्टो वाभिमेत इति विकल्प्याद्य-

 विकल्पं मनसि कृत्याह । 

 सामाइअं चिय जओ उचियपवित्तिप्पहाणमक्खायं। तो तग्गुणस्स ण हवइ कइया वि हु गरहणिज्जत्तं॥ १२१ गा.

सामायिकमेव तात्त्विकम्, यतः उचितप्रवृत्तिप्रधानं विध्याराधनया गर्हणीयभंगविरोधिप्रयत्नमुख्यव्यापारम्, आख्यातं प्रतिपादितम्, "समभावा सामाईयं तणकंचणसत्तुमित्तविसयंमि । निरभिस्संगं चित्तं उचियपवित्तिप्पहाणं च[५५] ॥" इत्यादिना ग्रंथेन पंचाशकादौ, ततस्तद्गुणस्य सामायिकगुणवतः, न भवति कदाचिद्गर्हणीयत्वं शिष्टलोकस्येति दृश्यम् ॥ ॥ १२० ॥ कथमित्याह ।

जं खलु पच्चक्खायं तब्भंगो गरहणिज्जओ होइ। सो णत्थि तस्स अण्णं बज्झा पुण किं ण गरहंति॥ १२१

यत् खलु निश्चये, प्रत्याख्यातं तद्भंगो गर्हणीयको भवति शिष्टानाम्, स प्रत्याख्यातभंगः, तस्य क्षीणमोहस्य, नास्ति, भावाभंगेन द्रव्यादिभंगेऽरक्तद्विष्टस्य प्रत्याख्यानभंगेऽभ्युपगम्यमाने धर्मोपकरणधारिणश्चारित्रिणो द्रव्यादिचतुष्टयशुद्धपरिग्रहप्रत्याख्यानानुपपत्तिरिति वदतो दिगंबरस्य निराकरणानुपपत्तेः, निराकृतश्चायं द्रव्यादिप्रकारैर्मूर्छात्यागेन प्रत्याख्यानशुद्धिसमर्थनाद्विशेषावश्यकादौ, एवमिहापि द्रव्यादिप्रकारैः प्रमादयोगत्यागान्न प्रत्याख्यानभंगलेशोपीति किं न विचारयंति सुहृदः । अंत्यविकल्पे प्राह । बाह्याः पुनरशिष्टाः पुनः, तस्य क्षीणमोहस्य, अन्यत् किं न गर्हंति, अप्रयोजकं तद्गर्हणमिति भावः ॥ १२१ ॥ बाह्याः किमन्यद्गर्हंतीत्याह ।

---

५५ समभावात् सामायिकं तृणकांचनशत्रुमित्रविषये । निरभिष्वंगं चित्तं उचितप्रवृत्तिप्रधानं च ॥

**ण सयंभू स मणूसो इय अवमण्णंति माहणा देवं। इण्हिंपि ण कयकिज्जो दिअंबरा कवलभोइत्ति॥१२२**

स भवदभिमतो वीतरागः, न स्वयंभूर्नानादिसिद्धसर्वज्ञः, किंतु मनुष्यः, तथा चास्मदादीन्नातिशेत इति भावः, इत्येवं प्रकारेण, ब्राह्मणा नैयायिकादयः, देवं भगवंतम्, अवमन्यंतेऽवजानते, तथा कवलभोजी कवलाहारी भवदभिप्रेतः सर्वज्ञः, इदानीमपि अभिमन्यमानसर्वज्ञताकालेपि, न कृतकृत्यो न परिनिष्ठितार्थः, स्वकीयस्यैव क्षुदादिदुःखस्यानाशात् परकीयतन्नाशने सामर्थ्याभावादिति दिगंबरा देवमवमन्यंते, एवमन्येप्यन्यथावादिनः स्वस्वाभिप्रेतार्थानुपदेशिनं तमवमन्यन्त इति ॥ ॥ १२२ ॥ नन्वेवमशिष्टगर्हणेन किं भगवतः कलंकसंपर्कोपि भवति नेत्याह ।

**ण य एवं सो देवो कलंकिओ होइ दोसलेसेण । सूरो परामुसिज्जइ णाभिमुहुक्खित्तधुलीहिं ॥१२३॥**

न चैवं बाह्यानां गर्हणेन, स देवः कलंकितो भवति दोषलेशेन, अपिगम्यते, एतदेव प्रतिवस्तूपमया द्रढयति सूरः सूर्यः, न परामृश्यते चौरपारदारिकादिभिरभिमुखोत्क्षिप्ताभिर्धूलिभिः, यथा हि सूर्याभिमुखं प्रक्षिप्ता धूलिः स्वलोचनयोरेव व्यथायै भवति न तु सूर्यपराभवाय, एवं भगवतोपि कलंकदानं न भगवतो दोषाय किंतु स्वस्यैवानंतसंसारार्जनायेति भावः ॥ १२३ ॥ अत्र स्वस्याभिनिवेशशंकां परिहरन्नाह ।

**ण हु अत्थि अभिणिवेसो लेसेण वि अह्ममेत्थ विसयंमि । तहवि भणिमो ण तीरइ जं जिण-मयमन्नहा काउं ॥ १२४ ॥**

नह्यस्त्यभिनिवेशोऽसद्ग्रहलक्षणो लेशेनाप्यत्रार्थेऽस्माकम्, तथापि भणामो यज्जिनमतमन्यथा कर्त्तुं न शक्यते, जिनमतं

चात्रेत्थमेवास्माकं व्यवस्थितमाभाति बहुश्रुताः पुनरत्र प्रमाणम् ॥ १२४ ॥ अथैतदुपसंहरन्नाह ।



**एवं खीणे मोहे अकरणणियमस्स होइ परिनिट्ठा । एयस्स य अब्भासो उववज्जइ भावसाहूणं ॥ १२५ ॥**

एवमुक्तप्रकारेण, अकरणनियमस्य, परिनिष्ठा पूर्णता, क्षीणे मोहे सति, भवति, एतस्य चाभ्यासो भावसाधूनामुपपद्यते, आभ्यासिकभावानामभ्यासस्यैव पूर्णतोपायत्वात् ॥ १२५ ॥ दुःषमाकालेऽप्येतत्संभवमुपपादयति ।

**एयंमि वि कालंमी सिद्धिफलो एस भावसाहूणं । तारिसजोगे वि सया जयणाए वट्टमाणाणं ॥ १२६ ॥**

एतस्मिन्नपि काले प्रायः कलहडमरासमाधिकारिभिः स्वपक्षगतैः परपक्षगतैश्च जनैः सर्वतः संकीर्णे दुःषमालक्षणे, एषः अकरणनियमाभ्यासः, भावसाधूनां निर्व्याजयतीनां सम्भवति, सिद्धिफलः परंपरया मोक्षहेतुः, तादृशयोगेऽपि संहननाद्यभावेन कालानुरूपानुष्ठानेऽपि, सदा सर्वकालम्, यतनया प्रवर्त्तमानानाम् ॥ १२६ ॥ यतनाया एव लक्षणमाह ।

**सा पुण बहुतरयासप्पवित्तिविणिवित्तिसाहणी चेट्ठा । आणासुद्धा णेया वईमि नाणाइगुणबीअं ॥ १२७ ॥**

सा यतना, पुनः, बहुतरायाः सुबह्वोर्यतनाकालभाविन्याः असत्प्रवृत्तेः शास्त्रनिषिद्धाचरणरूपायास्तथाविधग्लानदुर्भिक्षकांताराद्यवस्थाबलसमायातायाः सकाशाद् या विनिवृत्तिरात्मनो निरोधस्तत्साधनी, चेष्टा परिमिताशुद्धभक्तपानाद्यासेवनरूपा, आज्ञाशुद्धा निशीथादिग्रंथोक्तविध्यनुसारिणी, ज्ञेया, यदि द्रव्यक्षेत्रकालवैधुर्यलक्षणायां ज्ञानादीनां गुणानां जीवादितत्त्वावगमसन्मार्गश्रद्धानसम्यक्क्रियासेवनरूपाणां ज्ञानदर्शनचारित्राणां बीजं प्रसवहेतुः, तदाह । "जीए बहुत्तरासप्पवित्तिविणिवत्तिलक्खणं वत्थुं । सिज्झइ चेट्ठाइ जओ सा जयणा णाइविवयंमि ॥" अत्र बहुतराऽसत्प्रवृत्तिविनिवृत्तिसाधक-

चेष्टात्वं यतनालक्षणमितरच्च प्रमाणकालफलनिरूपणम्, अथापवादयतनायामेतल्लक्षणसंभवेप्युत्सर्गयतनायामव्याप्तिस्तत्र स्वकालभाविन्या बहुतरायतनाया असत्त्वेन निवर्त्तयितुमशक्यत्वादिति चेन्न, तत्राप्यग्रिमासत्प्रवृत्तिविनिवृत्तेस्तत्कारणविघटनरूपायाः संभवात्, अपवादयतनायामप्यग्रिमानाचारबीजक्षुद्विशेषादिकारणविघटनोपपत्तेः, अपवादयतनाया एव वास्त्वेतल्लक्षणम् ॥१२७॥ ननु द्रव्याद्यापदि यतना ज्ञानादिगुणबीजमित्युक्ता न च छद्मस्थेन यतनाविषयद्रव्यादि ज्ञातुं शक्यमित्याशंकायामाह।

**ण य एअं दुण्णेयं जं एअं साणुबंधमिणमण्णं। जं सुअपरिकंम्मिअमईगीयत्थजणाणुमेयमिणं॥१२८**

नचैतद्दुर्ज्ञेयं यदेतद्विरुद्धद्रव्यादिकमपि सेव्यमानम्, सानुबंधमव्यवच्छिन्नगुणप्रवाहनिमित्तम्, इदं चान्यन्निरनुबंधमुच्छिन्नोत्तरोत्तरगुणप्रवाहफलमित्यर्थः, यद् यस्मात्, श्रुतपरिकर्मितमतेः श्रुताभ्यासोपतिष्ठमानैतद्व्याप्त्यादिविशिष्टलिंगकस्य गीतार्थजनस्यानुमेयमेतत् प्रकृतद्रव्याद्यासेवनस्य सानुबंधफलकत्वादि, यथाहि ज्योतिश्चारविशारदः सुभिक्षादिकं निपुणवैद्यश्च व्याधिविपाकादिकं शास्त्राज्जानाति, तथा गीतार्थोपि जानीयादेव शास्त्राद् यतनाविषयमित्यर्थः ॥ १२८ ॥

**जह एसणिज्जनाणे तिविहनिमित्तोवओगसुद्धीए। तह एयंपि ण दुल्लहमुवउत्ताणं सया सुत्ते ॥१२९॥**

अपि च एषणीयज्ञानं भक्तपानादिकल्प्यताज्ञानम्, यथा, त्रिविधनिमित्तात् कायिकवाचिकमानसलक्षणात् या उपयोगशुद्धिरुपयोगनिर्मलता तया, तथा एतदपि यतनाविषयविज्ञानम्, न दुर्लभं न दुष्प्रापम्, सदा निरंतरम्, सूत्रे जिनवचने, उपयुक्तानां यथावद्दत्तावधानानाम्, ननु सर्वत्र धर्मार्थिनो लोकस्य तदर्थपाकादिप्रवृत्तावनेषणीयबाहुल्येनैषणीयानेषणीयविवेकस्य दुःशकत्वात् कथमेषणीयज्ञानमत्र दृष्टांतत्वेनोपन्यस्तमिति चेत्, न, चरणवतो जीवस्य तस्य सुज्ञानत्वात्, कदाचित् स्कलनायामप्याशयविशुद्ध्या दोषाभावात्, अन्यथा चारित्रोच्छेदापत्तेः। तदुक्तम्। "सुत्ते तह पडिबंधा चरणवओ

न खलु दुल्लहं एयं । न वि छलणाइ वि दोसो एवं परिणामसुद्धीए५६ " ॥१२९॥ ननु विरुद्धद्रव्यादिकमेव यतनया सेव्यमानं यदि सानुबंधं संपद्यते तदा निषेधविधिविरोध इत्याशंकायामाह ।

**णेगंतेणाणुण्णा अत्थि णिसेहो वि कोवि विसयंमि। कप्पिअपडिसेवाए होइ णिसिद्धं पणुण्णायं॥१३०**

नैकांतेन सर्वस्य सर्वद्रव्याद्यवच्छेदेनैव, अनुज्ञा शुद्धभक्तपानादिग्रहणविधिः, विषये आचारविषये, नवा कोऽपि निषेधोप्यस्ति, यतः कल्पिकप्रतिसेवायां दुर्भिक्षादौ कृतयोगिनो गीतार्थस्य परिमिताशुद्धान्नादिग्रहणरूपायाम्, निषिद्धमप्यनुज्ञातं भवति, तदानीं तत्र तत्कृतिसाध्यत्वबलवदनिष्टाननुबंधित्वेष्टसाधनत्वाबाधात् ॥१३०॥ अथ कल्पिकप्रतिसेवायाः प्रतियोगिग्रहेण सुग्रहत्वाद्दर्पिककल्पिकप्रतिसेवयोर्लक्षणमाह ।

**रागद्दोसाणुगया तु दप्पिआ कप्पिआ तु तदभावे । आराहणा उ कप्पे विराहणा होइ दप्पेणं ॥१३१॥**

रागद्वेषाभ्यां स्वप्रवृत्तिमूलभूताभ्यामनुगता सहिता या प्रतिसेवना सा दर्पिका, या तु कल्पिका सा तदभावाद्रागद्वेषाभावात्, न च स्वार्त्तध्यानातिरेकादिनिरोधार्थमेव प्रलंबादिग्रहण इवाब्रह्मण्यपि कस्यचित्प्रवृत्तेरुपेयेच्छातुल्योपायेच्छापूर्वकत्वेन रागद्वेषानुगतत्वाभावादुभयसांकर्यमिति वाच्यम्, संयमजीवितायुपेयेच्छया प्राक् तत्र प्रवृत्तावप्यनंतरं विषयस्वाभाव्येन विषयेच्छाया उत्कटत्वादनुत्कटत्वाच्चोपेयेच्छायास्तत्र रागद्वेषानुगतत्वानपायात्, अत एव तत्र प्रायश्चित्तयोग्यता, तदाह "संजमजीवितहेउं कुसलेणालंबणेण वण्णेण्णं । भयमाणे तु अकिच्चं हाणीवुटीव पच्छित्ते ॥" यत्त्वत्रापि कुशलालंबनेन प्रवर्त्त-

५६ सूत्रे तथा प्रतिबन्धाचरणतो न खलु दुर्लभमेतत् । नापि च्छलनाद्यपि दोषः एवं परिणामशुद्ध्या ॥

मानस्य निर्दोषत्वं गीतार्थस्य गीयते तत्संयमजीविताद्युपेयेच्छानुगतत्वेनोत्कटदोषाभावमभिप्रेत्य न तु सर्वथा तत्र दोषाभावोऽस्ति, विषयस्वाभाव्यस्य बलवत्त्वात्, तदुक्तम्, "जइ सव्वसो अभावो रागादीणं हवेज्ज णिद्दोसो त्ति[५७]।" अत एवाह कल्पे त्वासेव्यमाने, आराधना ज्ञानादीनां भवति, दर्पेण तु तेषामेव विराधना भवति, अथ गीतार्थादिपदसत्त्वेऽकृत्यसेवापि कल्पिकैव, तदुक्तम्, "गीयत्थो जयणाए कडजोगी कारणंमि णिद्दोसो। एगेसिं गीयकडो अरत्त दुट्ठो अजयणाए॥" अस्या अर्थः गीतार्थो यतनयाऽल्पतरापराधस्थानप्रतिसेवारूपया कृतयोगी तपःकर्मणि कृताभ्यासः कारणे ज्ञानादौ सेवत एष प्रथमो भंगः, अत्र च प्रतिसेवमानः कल्पिकप्रतिसेवावानिति कृत्वा निर्दोषः गीतार्थो यतनया कृतयोगी निष्कारणे एष द्वितीयो भंगः, अत्र स दोषः, एवं चतुर्णां पदानां षोडशभंगाः कर्त्तव्याः, एकेषां पुनराचार्याणामिह पंचपदानि भवन्ति, गीतार्थः कृतयोगी अरक्तोऽद्विष्टो यतनया सेवत एव प्रथमो भंगः, गीतार्थः कृतयोगी अरक्तोऽद्विष्टोऽयतनया एष द्वितीयो भंगः, एवं पंचभिः पदैर्द्वात्रिंशद्भंगा भवन्ति, अत्रापि प्रथमभंगे कल्पिका प्रतिसेवा मंतव्येति, तथा च कथं कल्पिकायामाराधनैव, दर्पिकायां च-विराधनैवेति चेत्, सत्यम्, भाक्तोत्र कल्पिकत्वव्यपदेशो वस्तुतस्तु दर्पिकैवेयमिति समर्थितमेव, अस्तु वा आपेक्षिकदर्पिककल्पिकोभयस्वभावेयं मुख्यकल्पिकदर्पिकयोस्त्वाराधनाविराधनाफलत्वमविरुद्धम्॥ १३१॥ ननु यद्येवं मैथुने कल्पिकाया अभावस्तदोत्सर्गापवादयोः सर्वव्यापकत्वं न स्यादित्याशंकामिष्टापत्त्या परिहरन्नाह।

**कामं सव्वपदेसुं उस्सग्गववायधम्मया जुत्ता। मोत्तुं मेहुणभावं ण विणा सो रागदोसेहिं॥ १३२॥**

कामममनुमतमिदमस्माकम्, सर्वेष्वपि पदेषु मूलोत्तरगुणरूपेषु, उत्सर्गापवादधर्मता युक्ता उत्सर्गः प्रतिषेधोऽपवादोनु-

---

५७ यदि सर्वशोऽभावो रागादीनां भवेन्निर्दोष इति॥

ज्ञा तद्धर्मता तल्लक्षणता सर्वेषु पदेषु युज्यते, तथापि मुक्त्वा मैथुनभावमब्रह्मासेवनम्, तत्रोत्सर्गधर्मतैव घटते नापवादधर्मता, कथमित्याह । स मैथुनभावः, रागद्वेषाभ्यां विना न भवति अतो द्वितीयपदेप्यत्र नाप्रायश्चित्तीत्यस्त्ययं विशेष इति भावः ॥ ॥ १३२ ॥ ननु यद्यत्र प्रायश्चित्तालिंगितमपि द्वितीयपदमस्ति तदा कथं न सूत्रानुज्ञेत्यत आह ।

१३३गा

**णिद्दोसंमि अणुण्णा सुत्तणिबद्धा णिसेहसंविद्धा । इयपडिपुन्नच्छत्ता होइ पमाणत्तमविरुद्धं ॥ १३३ ॥**

निर्दोषे दोषाननुबंधिनि, अनुज्ञा विधिरूपा, सूत्रनिबद्धा सूत्रोक्ता भवति, तत्र विध्यर्थलेशस्याप्यबाधात्, अन्यत्र कुशलालंबनार्थकेपि यद्यपि फलापेक्षया न बलवदनिष्टमस्ति, तथापि भावपूर्वकक्रियात्वेनैव मोक्षहेतुत्वात्तत्रेष्टसाधनत्वायोगेन विध्यर्थबाधान्न सूत्रानुज्ञास्ति, अथ निर्दोषे वस्तुनि सूत्रनिबद्धानुज्ञा कीदृशी भवतीत्याह । निषेधसंविद्धा आर्थिकनिषेधसंवलितविधिबोधजननी, स्याद्वादव्युत्पत्त्या प्रलंबग्रहणादिनिषेधसूत्रात् कथंचित्प्रलंबग्रहणादेर्निषेधे प्रतीयमाने कथंचित्तद्ग्रहणविधेरप्यर्थतो ज्ञानात्, एवं निषेधेपि विधिसंवेधो भावनीयः, तदिदमाह भाष्यकारः " उस्सग्गेणं भणिआणि जाणि अववायओ अ ताणि भवे । कारणजाएण मुणी सव्वाणि वि जाणियव्वाणि[५८] ॥" "उस्सग्गेण णिसिद्धाइ जाइ दव्वाइ संथरे मुणिणो । कारणजाए जाए सव्वाणि वि ताणि कप्पंति[५९] ॥" साक्षात् सूत्रनिर्देशे हि परमार्थः षोढा व्यवतिष्ठते, उत्सर्गादपवादादुत्सर्गापवादादपवादोत्सर्गादुत्सर्गोत्सर्गादपवादापवादाच्चेत्ति, इत्थमेव यतनौपयिकप्रयोजनभेदसिद्धेः, तदुक्तम्, " उस्स-

५८ उत्सर्गेण भणितानि यान्यपवादतश्च तानि भवेयुः । कारणजातेन मुनिः सर्वाण्यपि ज्ञातव्यानि ॥

५९ उत्सर्गेण निषिद्धानि यानि द्रव्याणि मुनेः । कारणजाते जाते सर्वाण्यपि तानि कल्पन्ते ॥

ग्गसुअं किंची किंची अववाइयं हवे सुत्तं । तदुभयसुत्तं किंची सुत्तस्स गमा बहुविगप्पा६० ॥" गमाः किंचिद्विरुच्चारणीयानि पदानि तत्रोत्सर्गसूत्रम् "नो कप्पइ निग्गंथाण वा निग्गंथीण वा । आमे तालपलंबे अभिण्णे पडिगाहित्तए त्ति६१ ॥" प्रलंबग्रहणनिषेधकम्, अपवादसूत्रं तु अध्वावमौदर्यादिषु तद्विधायकम्, यथा, "कप्पइ निग्गंथाण वा निग्गंथीण वा । पक्के तालपलंबे भिन्ने अभिन्ने वा पडिगाहित्तए६२ ॥" उत्सर्गापवादसूत्रं तु निषेधैकवाक्यतापन्नविधिपरम्, यथा "नो कप्पइ निग्गंथाण वा निग्गंथीण वा अत्तमत्तस्समोअं आइत्तए वा आयमित्तए वा नन्नत्थ गाढेहिं रोगायंकेहिं ॥" अपवादोत्सर्गसूत्रं तु विध्येकवाक्यतापन्नविशेषनिषेधपरम्, यथा यत्पुनर्निर्ग्रंथीनां कल्पते पक्वं प्रलंबं तद्विधिभिन्नं नाविधिभिन्नमित्यर्थकम् । उत्सर्गोत्सर्गसूत्रं तु निषेधोत्तरनिषेधप्रधानम् । यथा "णो कप्पइ असणं० वा पढमाए पोरसीए पडिगाहित्ता पच्छिमं पोरसिं उवायणावित्तए से य आहच्च उवायणाविए सिया जो तं भुंजइ भुंजंतं वा साइज्जइ से आवज्जइ चाउम्मासियं परिहारट्ठाणं उग्घाइअं६३ ॥ " अपवादापवादसूत्रं तूत्सृष्टविध्युत्तरविधिप्रधानमिति, अर्थतस्तु सर्वत्र नियत एवेतरसंबंधः, अत एव परिपूर्णार्थप्रापकलक्षणं अर्थांशप्रापकत्वलक्षणलौकिकप्रामाण्यविलक्षणमलौकिकप्रामाण्यमुपपद्यत इत्याह । इत्युपदर्शितप्रकारेण,

---

६० उत्सर्गसूत्रं किंचित्किंचिदपवादिकं भवेत्सूत्रम् । तदुभयसूत्रं किंचित् सूत्रस्य गमा बहुविकल्पाः ॥

६१ नो कल्पते निर्ग्रन्थानां वा निर्ग्रन्थीनां वा । आम्रं तालप्रलंबं अभिन्नं प्रतिग्राहयितुं इति ॥

६२ कल्पते निर्ग्रन्थानां वा निर्ग्रन्थीनां वा । पक्वतालप्रलम्बं भिन्नमभिन्नं वा प्रतिग्राहयितुम् ॥

६३ नो कल्पतेऽशनं० वा प्रथमायां पौरुष्यां उपादानापो कः सा घस्तं भुंजेत् वा स्वादयेत् स आपद्यते चातुर्मासिकं परिहारस्थानमुद्धातिकम् ॥

परिपूर्णार्थत्वादुत्सर्गापवादोभयमूर्तिकसकलार्थप्रापकत्वात्, अविरुद्धं प्रमाणत्वं भवति अन्यथा त्वेकांतोपदेशकत्वेन भगवद्वचनस्येतरवचनादविशेष एव स्यात्, मिथ्यादृष्टिपरिगृहीतानां " न हिंस्यात् सर्वाभूतानि " इत्यादिवचनानामपीदृशत्वात्, तत्रापि प्रामाण्यं व्यवह्रियत एवेति चेद्, व्यवह्रियताम्, न तु निश्चीयते निश्चयनियामकस्याद्वादमुद्राभावादित्यवधेयम् ॥ ॥ १३३ ॥ तदेवं निर्दोषे सूत्रानुज्ञेति व्यवस्थितं तन्नियामकनिर्दोषत्वाभावस्थानमाह ।



**रागद्दोसाणुगयं नाणुट्ठाणं तु होइ णिद्दोसं । जयणाजुअंमि तंमि तु अप्पतरं होइ पच्छित्तं ॥१३४॥**

रागद्वेषानुगतमनुष्ठानमब्रह्माद्यासेवनारूपम्, तु न निर्दोषं भवति, अतो न तत्र सूत्रानुज्ञेति भावः । अत्राप्यपवादपदप्रवृत्तिबीजमाह । यतनायुते तस्मिन् सदोषानुष्ठाने, अल्पतरं तु प्रायश्चित्तं भवति, यथाऽपराधं प्रायश्चित्तप्रवृत्तेः ॥ १३४ ॥ इत्थं चैतन्निषेधवाक्यं प्रत्यपवादाभावेऽपि यतनापूर्वकैतदनुष्ठानगतमनाचारविलक्षणप्रायश्चित्तबीजमपवादत्वमनुपायमेवेत्युत्सर्गापवादयोः संख्यासाम्यं नानुपपन्नमित्याह ।

**जयणावेक्खाइ अओ उस्सग्गववायतुल्लसंखत्तं । उववज्जइ किच्चंमी पुव्वायारिया जहा पाहु ॥१३५॥**

यतनापेक्षया व्रतसापेक्षाल्पतरप्रतिसेवापेक्षया, अतो यतनापूर्वकसदोषानुष्ठानस्याप्यपवादत्वात्, उत्सर्गापवादयोः कृत्येऽनुष्ठाने तुल्यसंख्यत्वमन्यूनाधिकत्वम्, उपपद्यते तंत्रनीत्या घटते, यथा प्राहुः पूर्वाचार्याः संघदासगणिक्षमाश्रमणप्रभृतयः ॥ १३५ ॥

**उन्नयमवेक्ख इयरस्स पसिद्धी उन्नयस्स इयराओ । इय अन्नोन्नपसिद्धा उस्सग्गववायमो तुल्ला ॥१३६** ॥ ५६ ॥

उन्नतमुच्चं पर्वतादिकमपेक्ष्येतरस्य नीचस्य भूतलादेः प्रसिद्धिः बालादेर्जनस्य प्रतीतिः, तथोन्नतस्योक्तरूपस्येतरस्मात् निम्नात्, तदपेक्ष्येत्यर्थः, सावधिकभावानामवधिज्ञानव्यंग्यत्वात्, इत्येवमन्योन्यप्रसिद्धाः परस्परावध्यवधिमद्भावप्रयोज्यप्रतीतिकाः, उत्सर्गापवादास्तुल्याः समानप्रसिद्धिहेतवः, यत्रैवैकाभावः शंक्यते तत्रैवापरप्रतीतेरनुद्भवादित्यर्थः ॥१३६॥

**जावइया उस्सग्गा तावइआ चेव हुंति अववाया। जावइआ अववाया उस्सग्गा तत्तिया चेव॥१३७**

यावंत उत्सर्गास्तावंतोऽपवादा यावंतश्चापवादास्तावंत एवोत्सर्गाः, अस्त्यनयोरविशिष्टो मिथो व्याप्यव्यापकभावो ग्राहकतौल्यादिति भावः ॥ १३७ ॥

**दव्वादिएहि जुत्तस्सुस्सग्गो तदुचियं अणुट्ठाणं। रहिअस्स तमववाओ उचियंविअरस्स न उ तस्स॥१३८**

द्रव्यादिभिर्युक्तस्य सांधोरुत्सर्गो भण्यते, किमित्याह। यदुचितं परिपूर्णद्रव्यादियोग्यं परिपूर्णमेव शुद्धान्नपानगवेषणादिरूपमनुष्ठानम्, रहितस्य द्रव्यादिभिरेव, तदनुष्ठानमपवादो भण्यते,कीदृशमित्याह। उचितमेव पंचकादिपरिहाण्या तथाविधान्नपानाद्यासेवनारूपमुत्सर्गसापेक्षमेव, एतदेव स्पष्टयति इतरस्य द्रव्यादियुक्तव्यतिरिक्तस्यैव, न तु तस्य द्रव्यादियुक्तस्य, यत्तदनुष्ठानं संसाराभिनंदिताविजृंभितम्, अशक्तस्यैवोत्सर्गादपवादगतावधिकारात्, श्रांतस्येव स्वभावगमने तीक्ष्णक्रियाऽसमर्थस्य वा मृदुक्रियायामन्यथा श्रमादिव्याकुलत्वेन मरणवदार्त्तध्यानादिव्याकुलत्वेन संयमजीवितमरणापत्तेः, यस्तु शक्तोप्युत्सर्गात् पतति स मूढात्मा स्वार्थभ्रंश एव यतत इति, तदिदमुक्तम्, " धावंतो उच्चाओ मग्गणू किं न गच्छइ कम्मेणं। किं वा मउई किरिया न कीरए असहुओ तिक्खं[६४] " ॥ १३८ ॥

---

६४ धावन्नुच्चैर्मार्गज्ञो नु किं न गच्छति क्रमेण। किं वा मृद्वीं क्रियां न करोत्यसहकस्तिक्ष्णाम् ॥

**ण वि किंचि अणुण्णायं पडिसिद्धं वा वि जिणवरिंदेहिं । एसा तेसिं आणा कज्जे सच्चेण होअव्वं ॥१३९॥**



नापि किंचिदकल्पनीयमनुज्ञातं कारणे च समुत्पन्ने, नापि किंचित् प्रतिषिद्धम्, किंतु एषा तेषां तीर्थंकृतां निश्चयव्यवहारनयद्वयाश्रिता सम्यगाज्ञा मंतव्या, यदुत कार्ये ज्ञानाद्यालंबने, सत्त्वेन सद्भावसारेण साधुना, भवितव्यं न मातृस्थानतो यत्किंचिदालंबनीयमित्यर्थः, तात्त्विकज्ञानाद्यालंबनसिद्ध्यैव मोक्षपथसिद्धेर्बाह्यानुष्ठानस्यैकांतिकत्वादनात्यंतिकत्वाच्चेत्थमेव तस्य द्रव्यत्वसिद्धेः, अथवा सत्यं नाम संयमस्तेन कार्ये समुत्पन्ने भवितव्यं यथा यथा संयम उपसर्पति तथा तथा कर्त्तव्यं तदुत्सर्पणं च शक्त्यनिगूहनेनैव निर्वहतीति सर्वत्र यथाशक्ति यतितव्यमेवेति भावः । आह च बृहद्भाष्यकारः । "कज्जं नाणादीयं सव्वं पुण होइ संजमो णियमा । जह जह सोहेइ चिरा तह तह कायव्वयं होइ[६५]" ॥ १३९ ॥

**दोसा जेण निरुज्झंति जेण छिज्जंति पुव्वकम्माइं । सो सो मोक्खोवाओ रोगावत्थासु समणं व ॥१४०**

दोषा रागादयः, निरुध्यंते संतोप्यप्रवृत्तिमंतो जायंते, येनानुष्ठानविशेषेण, पूर्वकर्माणि प्राग्भवोपात्तज्ञानावरणादिकर्माणि च, येन क्षीयंते, स सोनुष्ठानविशेषो, मोक्षोपायो ज्ञातव्यः, रोगावस्थासु ज्वरादिरोगप्रकारेषु, शमनमिवोचितौषधप्रदानापथ्यपरिहाराद्यनुष्ठानमिव, यथा येन विधीयमानेन ज्वरादिरोगः क्षयमुपगच्छति, एवमुत्सर्गे उत्सर्गमपवादे चापवादं समाचरतो रागादयो निरुध्यंते पूर्वकर्माणि च क्षीयंते, अथवा यथा कस्यापि रोगिणोऽधिकृतपथ्यौषधादिकं प्रतिषिद्ध्यते कस्यापि पुनस्तदेवानुज्ञायते, एवमत्रापि यः समर्थस्तस्याकल्प्यं प्रतिषिद्ध्यते, समर्थस्य तु तदेवानुज्ञायते, यथोक्तम्,

६५ कार्यं ज्ञानादिकं सर्वं पुनर्भवति संयमो नियमात् । यथा यथा शोधयति चिरात् तथा तथा कर्त्तव्यकं भवति ॥

भिषग्वरशास्त्रे " उत्पद्यते हि सावस्था देशकालामयान् प्रति । यस्यामकार्यं कार्यं स्यात् कर्म कार्यं च वर्जयेत् ॥ " इति ॥ १४० ॥ तदेवमुत्सर्गापवादयोस्तुल्यसंख्यत्वं तदुपपादकमनियतविषयत्वतौल्यं च वृद्धवचनसम्मत्या समर्थितम्, इत्थं च यदुच्यते । मंदमतिभिरुत्सर्गापवादप्रचुरत्वे जिनवचनस्यान्यवचनतुल्यतापत्तिस्तत्रापि " न हिंस्यात् सर्वाभूतानि अग्नीषोमीयं पशुमालभेत " इत्यादिवचनानामुत्सर्गापवादभावेन विरोधपरिहारस्य सुवचत्वादिति तन्निरसितुमाह ।

**ण य एवं जिणवयणे तुल्लत्तं होइ अण्णवयणेणं । जं तं एगंतत्थं ण वि तं दिट्ठं सठाणत्थं ॥ १४१ ॥**

न च एवं जिनवचनेऽन्यवचनेन तुल्यत्वं भवति, यद् यस्मात्तदन्यवचनम्, एकांतार्थं न त्वितरेतरानुविद्धार्थकम्, तथा च पूर्णार्थाप्रापकत्वात् तत्राप्रामाण्यमेव, तथा नापि तद्दृष्टं स्वस्थानस्थम्, तथा चास्थानपतितत्वेन विरुद्धत्वाद्व्यवहारेणाप्यन्यवचनस्याप्रामाण्यमेवेत्यर्थः ॥ १४१ ॥ अथ किं उत्सर्गस्थानं किं चापवादस्थानं किंचैतदस्थानं यत्पतितत्वेनान्यवचनस्य विरुद्धत्वमित्याशंकायां भाष्यगाथामाह ।

**संथरओ सट्ठाणं उस्सग्गो असहुणो परट्ठाणं । इय सट्ठाण परं वा ण होइ वत्थू विणा किंचि ॥ १४२ ॥**

संस्तरतो निस्तरतः, उत्सर्गः स्वस्थानं अपवादः परस्थानम्, असहस्यासमर्थस्य यः संस्तरीतुं न शक्नोति तस्यापवादः स्वस्थानमुत्सर्गः परस्थानम्, इति एवममुना प्रकारेण, पुरुषलक्षणं वस्तु विना न किंचित्स्वस्थानं परस्थानं वा किंतु पुरुषो वस्तु संस्तरति न चेत्यतः पुरुषात् स्वस्थानं परस्थानं वा निष्पद्यते न चासंस्तरंतं पुरुषमधिकृत्यान्यवचने निषिद्धं पुनरपोद्यते किंतु यदृच्छयैव, इत्थं च यद्भावेन विहिते प्रवृत्तिरव्यवच्छिन्नतद्भावेनैव न निषिद्धे सा दृश्यते, किंतु तृष्णयैवातृष्णामूलनिषिद्धप्रवृत्तेरुत्सर्गासहिष्णुतानियतत्वात्, तथा च मोक्षबीजस्य जिनवचनस्यान्यवचनसदृशतोट्टंकनं महदज्ञान-

विजृंभितमेवेति भावः ॥ १४२ ॥ अथ बाधकापोद्यो नियम उत्सर्गो बाधकविधिश्चापवाद इति विशेषविधिदर्शनात् सामान्यनिषेधे संकोचकल्पनात् परवचनेप्युत्सर्गापवादभावे न विरोध इत्याशंकायामाह ।



**बज्झकिरियाविसेसे ण णिसेहो वा विहीव संभवइ । जं सो भावाणुगओ तयत्थमंगीकया जयणा॥१४३**

बाह्यक्रियाविशेषे शृंगग्राहिकया गृहीते, निषेधो विधिर्वा न संभवति, यद् यस्माद्भावानुगतौ भावैकजीवितः, स बाह्यक्रियाविशेषः, शुद्धभावसत्त्वे प्राणव्यपरोपणसंपत्तावपि हिंसानिषेधात्तदसत्त्वे च तदसंपत्तावपि हिंसानुपरमात्, तस्यैव मोक्षबीजत्वात् तदुपसंग्रहार्थायाश्च बाह्यक्रियायाः शृंगग्राहिकया गृहीतुमशक्यत्वात्, तदर्थं च यतनांगीकृता मुनिपुंगवैस्तस्याशुभभावपरिणामत्वात्, न चेयं शृंगग्राहिकया परमते संभवति, तथा सति बहुतरासत्प्रवृत्तेरेव दर्शनात् । अथ यथाविहिताचरणेन शास्त्रश्रद्धारूपो भावः परैरप्यनुगम्यत एवेति चेत्, अनुगम्यतां परमसद्ग्रहरूपोयं नतु योगानुभवगम्यो गुरुलघुभावपर्यालोचनप्राणो रत्नत्रयमय इति संसाराभिनंदिनामेवाश्रयणीयोयम् । एतेन काम्येपि विहिताचरणमग्नतया मनःशुद्धिभावोऽक्षत इत्यप्यपास्तम्, ईदृशेन गायत्रीजपादिनापि मनःशुद्धिसंभवे हिंसाबहुलकर्मानुष्ठानस्य सांख्यादिभिरपि निंदितत्वात्, अपि चैवं श्येनादावपि प्रवृत्तिप्रसंगः, न च तत्र स्वार्थत्वमग्नीषोमहिंसायां च क्रत्वर्थत्वमिति विशेषोस्तीति वाच्यम्, क्रत्वर्थत्वेपि स्वर्गार्थत्वेन स्वार्थत्वानपायादित्यधिकं लतायाम्, तस्मात् यतनाभावान्नोत्सर्गापवादकमनीयत्वं परवचने, तद्भावाच्चैदंपर्यशुद्धत्वं जिनवचनेऽनपायमिति व्यवस्थितम् ॥ १४३ ॥ अथैतदुपसंहरन्नाह ।

**कयमेत्थ पसंगेणं उस्सग्गववायरूवमिय णाउं । जह बहु कज्जं सिज्झइ तह जइयव्वं पयत्तेणं॥१४४॥**

कृतं पर्याप्तम्, अत्रोत्सर्गापवादचिंतायाम्, प्रसंगेन, इत्येवमुत्सर्गापवादरूपं ज्ञात्वा, यथा बहु अभ्यधिकम्, कार्यं संयमप्रयोजनम्, सिद्ध्यति तथा प्रयत्नेन सर्वादरेण, यतितव्यं बहुविस्तरोत्सर्गबहुविधापवादावबोधस्य संयमात्यादरमात्रप्रयोजनत्वात् ॥ १४४ ॥ यतनापि प्रमाणमूला श्रेयसी न तु विकल्पमात्रकृतेत्युपपादयति ।

**जयणा खलु आणाए आयरणावि अविरुद्धगा आणा । णासंविग्गायरणा जं असयालंबणकया सा॥**

यतना खलु निश्चयेन, आज्ञया निशीथादिसूत्रादेशेन भवति, न तु स्वाभिप्रायेण लोकाचारदर्शनेनैव वा, नन्वाचरणाप्याज्ञैव पंचसु व्यवहारेषु जिनस्यापि परिगणनात्, तथा च कथं नेयं यतनायां प्रमाणमित्यत्राह । आचरणाप्यविरुद्धैवाज्ञा न पुनरसंविग्नाचरणा, यद् यस्मात्, असदालंबनकृता सा, ते हि दुःषमाकालादिदोषावलंबनेन स्वकीयं प्रमादं मार्गतया व्यवस्थापयंति, नचैतद् युक्तम्, विषादेरिव दुःषमायां प्रमादस्याप्यनर्थकरणशक्त्यविघातात्, तदुक्तम् " मारेंति दुस्समाए विसादओ जह तहेव साहूणं । निक्कारणपडिसेवा सव्वत्थ विनासई चरणं[६६] ॥" अविरुद्धाचरणायाश्चेत्थं लक्षणमामनंति । " असढेण समाइन्नं जं कत्थइ केणई असावज्जं । न निवारियमन्नेहिं जं बहुमयमेअमायरिअं[६७] ॥ " असठेनामायाविना सता समाचीर्णमाचरितम्, यद्भाद्रपदशुक्लचतुर्थीपर्युषणापर्ववत्, कुत्रचित्काले क्षेत्रे वा केनचित्संविग्नगीतार्थत्वादिगुणभाजा कालिकाचार्यादिनाऽसावद्यं मूलोत्तरगुणाराधनाविरोधि तथा न नैव निवारितमन्यैश्च तथाविधैरेव गीतार्थैः अपि तु बहु यथा भवत्येवं मतं बहुमतमेतदाचरितम् ॥ १४५ ॥

---

६६ मारयन्ति दुःषमायां विषादयो यथा तथैव साधूनाम् । निष्कारणप्रतिसेवा सर्वथा विनाशयति चरणम् ॥

६७ अशठेन समाचीर्णं यत्कुत्रचित्केनचिदसावद्यम् । न निवारितमन्यैर्यद्बहुमतमेतदाचरितम् ॥

**दीसंति बहू मुंडा दूसमदोसवसओ सपक्खेवि । ते दूरे मोत्तवा आणासुद्धेसु पडिबंधा ॥ १४६ ॥**

एवंविधाज्ञासिद्धिः सांप्रतं यथा भवति तथाहि दृश्यंते, स्वपक्षेऽपि किं पुनः परपक्ष इत्यपिशब्दार्थः, बहवो मुंडाः श्रमणगुणमुक्तयोगिनो हया इवोद्दामा गजा इव निरंकुशाः शिरोमुंडाः, दुःषमादोषवशतः पंचमारकवैगुण्यबलात्, तदुक्तम्, "कलहकरा डमरकरा असमाहिकरा अणिव्वुइकरा य । होहंति भरहवासे बहुमुंडा अप्पसमणा य[६८] ॥" ते दूरेण मोक्तव्या विषवत् परिहर्त्तव्याः, तथा आज्ञाशुद्धेषु सम्यगधीतजिनागमाचारवशात् शुद्धिमागतेषु साधुषु श्रावकेषु वा, प्रतिबंधो बहुमानः कार्यः ॥ १४६ ॥ नन्वेवमन्येषु परिहर्त्तव्यत्वेन द्वेषसंभवे माध्यस्थ्यहानिरित्यत आह ।

**भवठिइनिरूवणेणं इयरेसुवि दोसवज्जणा जुत्ता । भावाणुवघाएणं वसिअव्वं कारणेवि तहिं ॥१४७॥**

भवस्थितिरियमेतेषां यतः कर्मगुरवोऽद्याप्यकल्याणिनो न जिनधर्माचरणं प्रति प्रह्वपरिणामा जायंत इति चिंतारूपेण, इतरेष्वपि जिनवचनप्रतिकूलानुष्ठानेष्वपि समुपस्थितदुर्गतिपातफलमोहाद्यशुभकर्मविपाकेषु लोकलोकोत्तरभेदभिन्नेषु जंतुषु, द्वेषस्य तद्दर्शनतत्कथाद्यसहत्वतद्गर्हणलक्षणस्य, वर्जना युक्ता श्रेयसी, तत्परिहारादौ तु न द्वेषः किंतु धर्मार्थित्वात् माध्यस्थ्यमेवेति भावनीयम्, ननु द्वेषवर्जना माध्यस्थ्यस्य सुशका प्रमत्तपाखंडिजनाकुलत्वात् प्रायो विहारक्षेत्राणामसंविग्नपरिहारस्तु दुःशक इत्यत्राह । कारणेऽपि दुर्भिक्षराजक्षोभाद्युपप्लववशेनान्यत्र स्थित्यभावरूपे सति, तहिंति तत्र यत्रासंविग्नास्तिष्ठंति, वसितव्यं भावानुपघातेन सम्यक् प्रज्ञानरूपस्य शुद्धसमाचाररूपस्य च भावस्य यथोपघातो न भवति तथा ॥

६८ कलहकरा डमरकरा असमाधिकरा अनिर्वृत्तिकराश्च । भविष्यन्ति भरतवर्षे बहुमुंडा अप(ल्प)श्रमणाश्च ॥

॥ १४७ ॥ ननु कारणेऽप्यसंविग्नसमीपेऽवस्थाने स्वपरोपघातप्रसंगः, गुणमत्सरिभिरसंविग्नैश्चौर्याद्यध्यारोपस्य कथंचिदुपलब्धस्य प्रमादाचरितस्य सुदूरविस्तारणस्य तथाविधकुलेष्वन्नपानव्यवच्छेदादेश्च करणात्, स्वतस्तेषां पापबंधस्य बोधिघातफलस्य संभवाच्च, न चैतद्दोषपरिहारार्थं वंदनादिना तदनुवर्त्तनापि युक्ता, तथा सति तद्गतयावत्प्रमादस्थानानुमतिप्रसंगादित्यत आह ।

**अणुवत्तनावि कज्जा अरत्तदुट्ठेण कारणे तेसिं । अगहिलगहिलनिवेणिव दव्वेणं वंदणाईहिं ॥१४८ ॥**

कारणे समुत्पन्ने, तेषामरक्तद्विष्टेन रागद्वेषयोरंतरालवर्तिना सता, अनुवर्त्तनापि अनुकूलभावसंपादकचेष्टापि, कार्या विधेया, कैरित्याह द्रव्येण न तु भावेन, वंदनादिभिरपवादविध्युक्तवाग्नमस्कारादिप्रकारैः, इत्थं च न तद्गतदोषानुमोदनम्, भाववंदनादिनैव तत्संभवात्, अत एव यत्र स्वल्पोपि दर्शनादिगुणसद्भावो दृश्यते तत्र तावत्यैव भक्त्या तद्वंदनादिना तद्गतदोषानुमतिः, तदुक्तम् “ दंसणनाणचरित्तं तवविणयं जत्थ जत्तियं पासे । जिणपन्नत्तं भत्तीइ पूअए तं तहिं भावं[६९] ॥ ” केनेवानुवर्त्तना कर्त्तव्येत्युपमानमाह । अग्रहिलस्तत्त्वतोऽविकलः सन् ग्रहिलो व्याजविकलभावमापन्नो यो नृपस्तेनेव, तथा ह्येतत् संबंधः, पृथ्वीपुरे नगरे पूर्णो नाम राजा राज्यं भुंक्ते, सुबुद्धिश्च तस्य सचिवः, तस्यान्यदा कालज्ञेन न्यवेदि, देव मासोपरि वृष्टिस्तादृशी भाविनी यदुदकपानाल्लोका ग्रहोन्मादवंतः संपत्स्यंते, ततः कियत्यपि काले गते सुवृष्टिर्भविष्यति ततश्च सर्वं सुंदरं संपत्स्यते इति, इदं च समाकर्ण्य लोकानां हिताय राज्ञा डिंडिमोद्घोषणा कारितोदकसंग्रहः कुरुध्वमिति, ततो लोकेनापि सर्वेण यथासामर्थ्यमुदकसंग्रहः कृतो जाता च मासोपरि नैमित्तिकनिरूपिता कुवृष्टिः, क्षीणं

---

६९ दर्शनज्ञानचरित्रं तपोविनयं यत्र यावन्तं पश्येत् । जिनप्रज्ञप्तं भक्त्या पूजयेत्तं तत्र भावम् ॥

च ततो लोकानां शुभादृष्टमिव संगृहीतं जलम्, प्रवृत्तश्च लोकः कुव्यापार इव नव्यनीरपाने, जातश्च ततः परमविषाद इवोन्मादः, ततः सामंतादीनामपि गृहीतजलक्षये नव्यनीरपानाल्लोकवदुन्मत्तीभूतानां न काचिच्चेष्टा राज्ञा सह मिलति, ततस्तैरेवं मंत्रणमकारि, यथाऽयं नृपोस्मासु सत्सु राज्यसुखभागी भवति अस्मन्मताननुवर्त्तकस्तु कियच्चिरं राज्यं करिष्यतीति गृहीत्वा बध्नीम एनम्, एवं मंत्रयमाणाश्च ते मंत्रिणा ज्ञाताश्चिंतितं च तेन नास्ति नृपस्य राज्यजीवितव्ययो रक्षणे एतदनुवर्त्तनमंतरेणान्य उपाय इति, एवं च राज्ञा सह मंत्रणं कृत्वा दर्शिता तेन कृत्रिमग्रहोन्मादचेष्टा, ततः सप्रजानां सामंतादीनामत्यंतं प्रमोदः समजनि, निर्वाहितश्च कालस्तथैव चेष्टमानेन पुराणमुदकं पिबता राज्ञा, ततः कालेन सुभिक्षमभूत्, सुवृत्तं च ततः सर्वतो भद्रमिति, अयमत्रोपनयः, राजस्थानीय आत्मा,, शास्त्रानुसारिणी बुद्धिश्च मंत्रिस्थानीया, तदेकचित्तेनात्मना कुग्रहरूपमुन्मादकजलं परित्यज्यात्मरक्षणार्थं यावच्छुभकालं तद्वदनुवर्त्तनापि कर्त्तव्येति । तदुक्तम् । " बहुकुग्गहंमि वि जणे तदभोगणुवत्तणाइ तह चेव । भावेण धम्मरज्जे जा सुहकालो सुवासंति[७०] " ॥ १४८ ॥ नन्वात्मरक्षणार्थमसंविग्नानुवर्त्तनायामसंयतविशेषप्रसंगस्तेऽपि ह्यात्मानं रक्षितुमन्यमनुवर्त्तंत एवेत्याशंकायामाह । 

**सा आयरक्खणट्ठं तं आणाजोगओ ण इयराविं । सो अ गुरुनिओगेणं भणंति तल्लक्खणं इणमो ॥**

सा संविग्नानुवर्त्तना, आत्मरक्षणार्थम्, तदात्मरक्षणम्, आज्ञायोगत आज्ञायोगमाश्रित्य, नत्वितरथापि विषयेच्छाद्यर्थमपि, तथा च न संयतासंयतसाम्यमिति भावः। आज्ञायोगोपि कथं व्यवतिष्ठत इत्याह स चाज्ञायोगः, गुरुनियोगेन गुरुपारतंत्र्येणान्यथा सम्यग् तदनवबोधप्रसंगात्, स च कीदृशो भवतीत्याह । तल्लक्षणं गुरुलक्षणम्, इदं भणंति पूर्वा-

---

७० बहुकुग्रहेपि जने तदभोगानुवर्तनादि तथा चैव । भावेन धर्मराज्ये यावत्सुख(शुभ)कालः सुवर्षमिति ।

न्वार्यः ॥ १४९ ॥

**उभयण्णूवि य किरिआपरो दढं पवयणाणुरागी य। ससमयपण्णवओ परिणओ अ पण्णो अ अच्चत्थं**

उभयज्ञ उत्सर्गापवादकल्प्याकल्प्यनिश्चयव्यवहारादिपदार्थद्वैतपरिच्छेदी, अपि च क्रियापरो मूलगुणोत्तरगुणाराधनायां बद्धकक्षः, दृढमत्यर्थम्, प्रवचनानुरागी च जिनवचनं प्रति बहुमानवान्, तथा स्वसमयस्य चरणकरणाद्यनुयोगभेदभिन्नस्य प्ररूपकस्तैस्तैरुपायैरुपदेशकः, परिणतश्च वयसा व्रतेन च, प्राज्ञश्च बहुबहुविधादिग्राहकबुद्धिमान्, अत्यर्थमतीव, एवंविधेन हि गुरुणा प्रज्ञाप्यमानोऽर्थो न कदाचिद्विपर्ययभाग् भवतीत्येवमेष विशेष्यत इत्येवंभूतो गुरुः श्रद्धेयः ॥ १५० ॥ स्वसमयप्रज्ञापकत्वं विशेषतो लक्षयति ।

**जो हेउवायपक्खंमि हेउओ आगमे य आगमिओ। सो ससमयपण्णवओ सिद्धंतविराहगो अण्णो ॥**

यः कश्चिद्धेतुवादपक्षे जीवकर्मादौ युक्तिमार्गसहे वस्तुनि, हेतुको युक्तिप्रणयनप्रवीणः, आगमे च देवलोकपृथ्वीसंख्यादावर्थे आगममात्रगम्ये, आगमिक आगममात्रप्रज्ञापनाप्रवीणः, स स्वसमयप्रज्ञापक उच्यते, व्यवच्छेद्यमाह । सिद्धांतविराधको जिनवचनानुयोगविनाशकः, अन्यः प्रागुक्तविशेषणविकलः साधुः, तथाहि युक्तिमार्गसहेष्वप्यागमगम्यत्वमेव पुरस्कुर्वता तेन नास्तिकादिप्रणीतकुयुक्तिनिराकरणाभावान्न श्रोतॄणां दृढा प्रतीतिः कर्त्तुं पार्यते, आगमगम्येषु तु युक्तिपथातीतेषु युक्तिमुट्टंकयन्नसंपादितनियतार्थप्रतीतिर्विफलारंभत्वेन स्वयमेव वैलक्ष्यं भजते, श्रोतुश्चानादेयवचनो भवतीति न विपरीतव्यवहारिणा तेन सम्यक्सिद्धांत आराधितो भवति ॥ १५१ ॥ एतद्विलक्षणं गुरुत्वाभिमानिनमवगणयन्नाह ।

**जो एअगुणविउत्तो सो निद्धम्मो सुअं विडंबंतो। गुरुनामेणं लोए बोलेइ बहू जओ भणिअं॥१५२॥**

य एतद्गुणवियुक्त उभयज्ञत्वादिगुणरहितः, स निर्द्धर्मा श्रुतचारित्रधर्मपराङ्मुखः, गुरुनाम्ना श्रुतं जिनमतम्, विडंबयन् सन्नीदृशं गुर्वाश्रितं शासनं न स्थानस्थमिति बहूनामश्रद्धाजननात्, बोलेइत्ति मज्जयति संसारसमुद्रे बहून जनान् स्वाभिगृहीतादृष्टकल्याणमुग्धमतिलोकान्, यतो भणितं संमत्युपदेशमालादौ ॥ १५२ ॥

**जह जह बहुस्सुओ संमओ अ सीसगणसंपरिवुडो अ। अविणिच्छिओ अ समए तह तह सिद्धंतपडिणीओ ॥ १५३ ॥**

यथा यथा बहुश्रुतः परिपठितबह्वागमः, संमतश्च बहुमतः संसाराभिनंदिनां गतानुगतिकप्रवाहपतितानां तदनुवर्त्तिनां चान्येषां बाह्याडंबरदर्शनमात्रोदितविस्मयानां मुग्धमतीनां च, च पुनः शिष्यगणैर्विनेयवृंदैः, संपरिवृतः समन्तात् परिवृतः, अविनिश्चितः सम्यगपरिणतश्च, प्रवचने ऐदंपर्याज्ञानाद्विरत्यप्रह्वत्वाच्च, तथा तथा सिद्धांतप्रत्यनीको रंजनकलादियतापरबंधनबाहुल्यहेतुयोगान्निःशंकमसत्प्रवृत्त्या यथास्थितसिद्धांतस्य विपर्यासापादनात्, अतो नेदृशगुर्वाश्रयणं युक्तम्, किन्तूक्तगुणवद्गुर्वाश्रयणमेव श्रेय इति भावः ॥ १५३ ॥ सुगुरुसेवया कथमाज्ञायोगलाभ इत्याह

**सुत्तत्थाण विसुद्धी सीसाणं होइ सुगुरुसेवाए। सुत्ताओ वि य अत्थे विहिणा जत्तो दढो जुत्तो ॥ १५४॥**

शिष्याणां सुगुरुसेवया सूत्रार्थयोर्विशुद्धिर्भवति तत्प्रसादायत्तत्वात्तस्याः, इयमेव च परमा भगवदाज्ञा, सूत्रार्थयोरपि मध्येऽर्थ एव बलवानिति व्यंजयन्नाह । सूत्रादप्यर्थे विधिना मंडलीकरणादिरूपेण दृढो यत्नः कर्त्तुं युक्तः ॥ १५४ ॥ कुत इत्याह ।

मूअं केवलसुत्तं जीहा पुण होइ पायडा अत्थो । सो पुण चउहा भणिओ हंदि पयत्थाइभेएण ॥ १५५॥

मूकं मूकपुरुषतुल्यं कस्यचिदर्थस्यावाचकम्, केवलसूत्रं व्याख्यानरहितसूत्रम्, अर्थः पुनः प्रकटा जिह्वा परावबोधहेतुत्वादिति, तद्भेदानाह हंदीत्युपदर्शने, स पुनरर्थः, पदार्थादिभेदेन चतुर्द्धा भणितः, तदुक्तम्, "पयवक्कमहावक्कत्थमइदंपज्जं च एत्थ चत्तारि । सुअभावावगमंमी हंदि पगारा विणिद्दिट्ठा७१ ॥" तत्र पदार्थो यथाश्रुतार्थः पद्यते गम्यतेऽर्थः सामान्यरूपोऽचालितात्मप्रत्यवस्थापितो येनेति व्युत्पत्तेः, तदाह । "अत्थपदेण हु जम्हा एत्थ पयं होइ सिद्धंति७२ ॥" वाक्यार्थश्चालना वाक्यार्थो महावाक्यार्थश्च प्रत्यवस्थापनार्थवाक्यार्थ ऐदंपर्यार्थश्च तात्पर्यार्थ इति ॥ १५५ ॥ इत्थमर्थचातुर्विध्यमन्येषामपि संमतमित्याह ।

अण्णेहि वि पडिवन्नं एअं सत्तुग्गहाउ णट्ठस्स । भट्ठस्स य मग्गाओ मग्गन्नाणस्स णाएणं ॥१५६॥

अन्यैरपि, एतत्पूर्वोक्तम्, प्रतिपन्नमंगीकृतम्, कथमित्याह शत्रुग्रहान्नष्टस्य पाटलिपुत्रादौ प्रस्थितवतः पुरुषस्य कांचिद्विषमां भुवं प्राप्तस्य शत्रावुपस्थिते ग्रहिष्यतीत्ययमिति भयात् पलायितस्य ततो मार्गाद्भ्रष्टस्य मार्गज्ञानस्य मार्गावबोधस्य ज्ञातेन दृष्टांतेन, तस्य हि मार्गजिज्ञासार्थं दूरे पुरुषमात्रमज्ञातविशेषं दृष्ट्वा सहसा तत्समीपगमनं न संभवति कदाचिच्छत्रुरपि भवेदयमिति संदेहात्, नापि तस्य परिव्राजकादिवेषधारिणोपि समीपे पथपृच्छार्थं गमनं युक्तम्,

---

७१ पद १ वाक्य २ महावाक्यार्थ ३ ऐदंपर्य ४ चात्र चत्वारि । श्रुतभावावगमे हन्दि प्रकारा विनिर्दिष्टाः ॥
७२ अर्थपदेन खलु यस्मादत्र पदं भवति सिद्धमिति ॥

शत्रोरपि पथिकविश्वासनार्थं तथाविधवेषप्रतिपत्तेः संभाव्यमानत्वात्, बालवृद्धादिभ्यः सत्यवादितयानुमतेभ्यः पृच्छायोग्यं तु पुरुषं ज्ञात्वाऽनुकूले मनः पवनशकुनादिना निरुपद्रवमार्गपरिज्ञानार्थं तत्समीपगमनं युज्यते, एवं ह्यत्र पुरुषमात्रदर्शनतुल्यः पदार्थः, शत्रुवेषभेददर्शनतुल्यो वाक्यार्थः, बालादिभ्यः प्रामाणिकपुरुषावगमनतुल्यो महावाक्यार्थः, ऐदंपर्यार्थस्तु शुद्धोधिकारी मष्टव्य इति द्रष्टव्यम् ॥ १५६ ॥ पदार्थादीनामेव संभूय कार्यकारित्वं व्यवस्थापयति ।

**एत्थ पयत्थाईणं मिहो अवेक्खाहु पुण्णभावंगं। लोअंमि आगमे वा जह वक्कत्थे पयत्थाणं ॥ १५७॥**

अत्र पदार्थादिष्वर्थभेदेषु, पदार्थादीनां मिथः परस्परमपेक्षा क्रमिकोत्पादरूपा, पूर्णभावांगं एकोपयोगाश्रयया-वत्पर्यायसिद्धिनिबंधनम्, लोके आगमे वा यथा वाक्यार्थे पदार्थानाम्, अथ वाक्यार्थप्रतीतौ पदार्थप्रतीतीनां हेतुत्वात्तत्र तदपेक्षा युज्यते प्रकृते तु पदार्थादीनामैदंपर्यार्थपर्यवसन्नत्वेन कार्यांतराभावात् क्व मिथोऽपेक्षास्त्विति चेत्, न, यावत्पदार्थप्रतीतीनामेव वाक्यार्थप्रतीतित्वेन तेषां परस्परमपेक्षावत्पदार्थादीनां परस्परमपेक्षोपपत्तेः, सापेक्षपदार्थादिसमुदायात्मकोपयोग एव तदावरणक्षयोपशमहेतुत्वात् ॥ १५७ ॥ तत्र लोक एव तावत्पदार्थादीनां मिथोऽपेक्षां व्युत्पादयति ।

**पुरओ चिट्ठइ रुक्खो इय वक्काओ पयत्थबुद्धीए । ईहावायपओअणबुद्धीओ हुंति इयराओ ॥ १५८ ॥**

पुरतस्तिष्ठति वृक्ष इति वाक्यात्, पदार्थबुद्ध्या मदभिमुखदेशस्थित्याश्रयो वृक्ष इत्याकारया, इहापायप्रयोजनविषया इतरा वाक्यार्थमहावाक्यार्थैदंपर्यार्थधीरूपा बुद्धयो भवन्ति, तथाहि अग्रे वृक्षस्तिष्ठतीति प्रतीत्यनंतरं वृक्षोऽभवन्नयं किमाम्रो वा स्यान्निंबो वेति वाक्यार्थप्रतीतिः प्रादुर्भवति, ततः प्रतिविशिष्टाकारावलोकनेनाम्र एवायमिति महावाक्यार्थधीः स्यात्, ततः पुरःसरमाम्रार्थिना प्रवर्त्तितव्यमित्यैदंपर्यार्थधीरिति, नह्येवं प्रकारं विना निराकांक्षप्रतीतिः सिद्ध्येत्, पदा-

र्थमात्रज्ञानात् पदार्थस्मारितविशेषार्थजिज्ञासारूपाया आकांक्षाया अनुच्छेदाद्वाक्यार्थस्याऽपर्यवसितत्वात् ॥ १५८ ॥ आगमेपि तामाह ।

**हंतव्वा नो भूआ सव्वे इह पायडो च्चिय पयत्थो । मणमाईहिं पीडं सव्वेसिं चेव ण करिज्जा ॥ १५९ ॥**

सर्वाणि भूतानि न हंतव्यानि इह प्रकट एव पदार्थः मन आदिभिर्मनोवाक्कायैः, पीडां बाधाम्, सर्वेषामेव समस्तानामपि जीवानाम्, न कुर्यान्न विदध्यादिति ॥ १५९ ॥

**आवन्नमकरणिज्जं एवं चेइहरलोचकरणाई । इय वक्कत्थो अ महावक्कत्थो पुण इमो एत्थ ॥ १६० ॥**

एवं सति चैत्यगृहलोचकरणादिकमकरणीयं साधुश्राद्धानामकर्त्तव्यम्, आपन्नं तत्रापि परपीडानुगमात्, इत्येष वाक्यार्थश्चालनागम्यः, महावाक्यार्थः पुनरत्रायम् ॥ १६० ॥

**अविहिकरणंमि दोसो तो विहिणा चेव होइ जइअव्वं । अइदंपज्जत्थो पुण आणा धम्मंमि सारोत्ति ।१६१**

अविधिकरणेऽनीतिविधाने चैत्यगृहलोचादेः, दोषो हिंसापत्तिर्विधिकरणनांतरीयकासत्प्रवृत्तिनिवृत्तिपरिणामजनितस्याहिंसानुबंधस्य प्रच्यवात्, तत्तस्माद्विधिनैव यतितव्यं भवति चैत्यगृहलोचाद्यर्थे, तदिदमुक्तम्, " अविहिकरणंमि आणाविराहणा दुट्ठमेव एएसिं । तो विहिणा जइअव्वं ति७३॥" चैत्यगृहकरणविधिश्च, "जिनभवनकारणविधिः शुद्धा भूमिर्दलं च काष्ठादि । भृतकानतिसंधानं स्वाशयवृद्धिः समासेन॥" इत्यादिग्रंथोक्तः, लोचकर्मविधिस्तु "धुवलोओ अ जिणाणं वासा-

---

७३ अविधिकरणे आज्ञाविराधना दुष्टमेवैतेषाम् । तस्माद्विधिना यतितव्यमिति ॥

वासे सुहोइ थेराणं । तरुणाणं चउमासे वुड्ढाणं होइ छम्मासे[७४]॥" इत्याद्युक्तः, ऐदंपर्यार्थः पुनराज्ञा धर्मे सार इति तामंतरेण धर्मबुद्ध्यापि कृतस्य निरवद्यत्वाभिमतस्यापि कार्यस्य निःफलत्वादिति ॥ १६१ ॥ वाक्यान्तरमधिकृत्याह ।



**गंथं चएज्ज एत्थवि सचेअणाचेअणं चए वत्थुं । एस पयत्थो पयडो वक्कत्थो पुण इमो होइ ॥ १६२ ॥**

ग्रंथं त्यजेदित्यत्रापि सचेतनमचेतनं च वस्तु त्यजेन्न गृह्णीयादिति, एष प्रकटः पदार्थः, वाक्यार्थः पुनरयं च वक्ष्यमाणलक्षणो भवति ॥ १६२ ॥

**वत्थाईण अगहणं एवं पत्तं मुणीण अविसेसा । आणाचाए दोसो नण्णह वत्थाइगहणे वि ॥ १६३॥**

एवं सति ग्रंथमात्रग्रहणनिषेधे, मुनीनामविशेषाद्वस्त्रादीनामग्रहणं प्राप्तं न हि स्वर्णादिकं ग्रंथो वस्त्रादिकं च न ग्रंथ इति विशेषोऽस्ति, आज्ञात्यागे " जिणाण बारसरूवो उ[७५] " इत्यादिवचनोल्लंघने, वस्त्रादिग्रहणेऽपि दोषोऽतिरिक्तोपकरणस्याधिकरणरूपत्वात्, नान्यथा आज्ञाया अत्यागे वस्त्रादिग्रहणेऽपि दोषः ॥ १६३ ॥

**एयमगहणं भावा अहिगरणच्चायओ मुणेअव्वं । एस महावक्कत्थो अइदंपज्जं तु पुव्वुत्तं ॥ १६४ ॥**

यत एतद्वस्त्रादिग्रहणम्, भावात्तत्त्वतोऽधिकरणत्यागत आर्त्तध्यानादिपरिहारादग्रहणम्, मुणेअव्वंति ज्ञातव्यम्, अग्रहणपरिणामोपष्टंभकं ग्रहणमपि खल्वग्रहणमेव, एष महावाक्यार्थः, ऐदंपर्यंतु पूर्वोक्तं आज्ञैव सर्वत्र धर्मे सार इति ॥१६४

---

७४ ध्रुवलोचश्च जिनानां (जिनकल्पिनां) वर्षावर्षेषु भवति स्थविराणाम् । तरुणानां चतुर्मासे वृद्धानां भवति षण्मासे ॥
७५ जिनानां (जिनकल्पिनां) द्वादशरूपस्तु ॥

॥ वाक्यांतरमधिकृत्याह ।

**तवज्झाणाइ कुज्जा एत्थ पयत्थो उ सव्वहिं ओहा । छट्टुस्सग्गाईणं करणं सेयं सिवट्ठं ति ॥१६५॥**

तपोध्यानादि कुर्यादत्र वाक्ये पदार्थस्तु सर्वत्र ओघेन समर्थासमर्थादिपरिहारसामान्येन, शिवार्थं मोक्षार्थं षष्ठोत्सर्गादीनां करणं श्रेय इति ॥ १६५ ॥

**तुच्छावत्ताईणं तक्करणं अकरणं अओ पत्तं । बहुदोसपसंगाओ वक्कत्थो एस दट्ठवो ॥ १६६ ॥**

तुच्छा असमर्था बालवृद्धादिलक्षणा अव्यक्ताश्चागीतार्था आदिनावश्यकहानियोग्यादिग्रहस्तेषामतः पदार्थात् तत्करणं षष्ठोत्सर्गादिकरणम्, प्राप्तं बहुदोषप्रसंगात् शक्त्यतिक्रमेण तपोध्यानादिकष्टानुष्ठानस्यार्त्तध्यानमयत्वेन तिर्यगाद्यशुभजन्माद्यापत्तेः अकरणं तत्त्वतोऽकरणमेव तत्, एष वाक्यार्थो द्रष्टव्यः ॥ १६६ ॥

**एस महावक्कत्थो समयाबाहेण एत्थ जमदोसो । सव्वत्थ समयणीई अइदंपज्जत्थओ इट्ठा ॥ १६७ ॥**

एष महावाक्यार्थः, यत्समयाबाधेनागमानुल्लंघनेन, अत्रादोषः, आगमश्चायमत्र व्यवस्थितः, "तो जह न देहपीडा नया वि विमंससोणियत्तं च । जह धम्मज्झाणवुड्ढी तहा इमं होइ कायव्वं[७६] ॥" ऐदंपर्यार्थत ऐदंपर्यार्थमाश्रित्य, सर्वत्र समयनीतिरागमनीतिरेव, इष्टाऽभिमता, तस्या एव सर्वत्राधिकार्यनधिकार्यादिविभागप्रदर्शनहेतुत्वात् ॥ १६७ ॥ वाक्यांतरमप्यधिकृत्याह ।

---

७६ तस्माद्यथा न देहपीडा न चापि विमांसशोणितत्वं च । यथा धर्मध्यानवृद्धिः तथायं भवति कर्त्तव्यः ॥

**दाणपसंसणिसेहे पाणवहो तह य वित्तिपडिसेहो । एत्थ पयत्थो एसो जं एए दो महापावा ॥१६८॥**



दानप्रशंसायां प्राणवधस्तन्निषेधे च वृत्तिप्रतिषेधः, एतेनेदं सूत्रकृतांगसूत्रं लक्ष्यते । "जे उ दाणं पसंसंति वहमिच्छंति पाणिणं । जे अण्णं पडिसेहंति वित्तिच्छेयं कुणंति ते[७७] ॥" इति अत्र पदार्थ एषः, यदेतौ द्वौ दानप्रशंसानिषेधौ, महापापावशुभगतिलाभांतरायादिप्रबलपापप्रकृतिबंधहेतुत्वादिति ॥ १६८ ॥

**वक्कत्थो पुण एवं विच्छेओ होज्ज देसणाईणं । एयं विसेसविसयं जुज्जइ भणिअं तु वोत्तुं जे ॥ १६९ ॥**

वाक्यार्थः पुनरेवमभ्युपगम्यमाने, देशनादीनां पात्रापात्रादिविषयदानविधिनिषेधादिदेशनादीनाम्, विच्छेदः स्यात् "धर्मस्यादिपदं दानं दानं दारिद्र्यनाशनम् । जनप्रियकरं दानं दानं सर्वार्थसाधनम् ॥ १ ॥ बीजं यथोषरे क्षिप्तं न फलाय प्रकल्प्यते । तथाऽपात्रेषु यद्दानं निष्फलं तद्विदुर्बुधाः ॥ २ ॥" इत्यादिदेशनाप्रवृत्तौ जीवहिंसानुमतिलाभांतरायप्रसंगस्य वज्रलेपायमानत्वात्, तस्मादेतद्भणितं तु विशेषविषयं वक्तुं युज्यते जे इति पादपूरणार्थो निपातः ॥ १६९ ॥

**आगमविहिअणिसिद्धे अहिगिच्च पसंसणे णिसेहे अ । लेसेणवि णो दोसो एस महावक्कगम्मत्थो ।१७०**

आगमे सिद्धांते विहितं निषिद्धं च दानमधिकृत्य प्रशंसने निषेधे च, लेशेनापि नो दोषः सत्प्रवृत्तिरूपस्य विहितदानव्यापारस्य हिंसारूपत्वाभावेन तत्प्रशंसने हिंसानुमोदनस्याप्रसंगात्, प्रत्युत सुकृतानुमोदनस्यैव संभवात्, निषिद्धदानव्यापारस्य चासत्प्रवृत्तिरूपस्य निषेधे वृत्तिच्छेदपरिणामाभावेनांतरायानर्जनात्, प्रत्युत परहितार्थप्रवृत्त्यांतरायकर्मविच्छेदा-

---

७७ ये तु दानं प्रशंसंति वधमिच्छन्ति प्राणिनाम् । ये चैनं प्रतिषेधंति वृत्तिच्छेदं कुर्वन्ति ते ॥

देव, तदिदमुक्तमुपदेशपदे, " आगमविहिअं तंते पडिसिद्धं चाहिगिच्च णो दोसो त्ति[७८] ॥ " आगमविहितं संस्तरणे सुपात्रे शुद्धभक्तादिदानमसंस्तरणे त्वशुद्धभक्तादिदानमपि तन्निषिद्धं च कुपात्रदानादिकमनुकंपाऽदानं तु क्वापि न निषिद्धम्, यदाह । " मोक्खत्थं जं दाणं तं पइ एसो विही समक्खाओ । अणुकंपादाणं पुण जिणेहिं न कयावि पडिसिद्धं[७९] ॥ " एष महा-वाक्यगम्योऽर्थः ॥ १७० ॥

**अइदंपज्जत्थो पुण मोक्खंगं होइ आगमाबाहा । एवं पइसुत्तं चिय वक्खाणं पायसो जुत्तं ॥१७१॥**

ऐदंपर्यार्थः पुनर्मोक्षांगं भवति, आगमाबाधा आगमार्थानुल्लंघनम्, अतिदेशमाह एवमुपदर्शितप्रकारेण, प्रतिसूत्रं यावंति सूत्राण्यंगीकृत्य, प्रायशो व्याख्यानं युक्तं अतिसंक्षिप्तरुचिश्रोत्राद्यपेक्षया प्रायश इत्युक्तम् ॥ १७१ ॥ कुत एतदित्यत आह ।

**एवं सम्मन्नाणं दिट्ठंतविरोहनाणविरहेण । अण्णयरगमा कासइ सुआमिहरा कासइ अनाणं॥१७२॥**

एवं प्रतिसूत्रमुक्तक्रमेण व्याख्याने, सम्यग्ज्ञानं व्युत्पन्नस्य निराकांक्षप्रतीतिरूपं स्यात्, इत्थमेव खल्वेतत् श्रुत-चिंताभावनात्मकत्वेन परिपूर्णतामास्कंदति, तल्लक्षणं चेदम् "वाक्यार्थमात्रविषयं कोष्ठकगतबीजसन्निभं ज्ञानम् । श्रुतमयमिह विज्ञेयं मिथ्याभिनिवेशरहितमलम् ॥ १ ॥ यत्तु महावाक्यार्थजमतिसूक्ष्मसुयुक्तिचिंतयोपेतम् । उदक इव तैलबिंदुर्विसर्पि चिं-तामयं तत् स्यात् ॥ २ ॥ ऐदंपर्यगतं यद्विध्यादौ यत्र तत्तथैवोच्चैः । एतच्च भावनामयमशुद्धसद्रत्नदीप्तिसमम् ॥ ३ ॥ " इति, इतरथा एवं व्याख्यानाभावे, अन्यतरगमादेकतरमर्थमार्गमनंतगमश्रुतमध्यपतितमाश्रित्य कस्यचिद्विपरीताभिनिवेशरहि-

---

७८ आगमविहितं तन्त्रे प्रतिषिद्धं चाधिकृत्य नो दोष इति ॥

७९ मोक्षार्थं यद्दानं तत्प्रति एष विधिः समाख्यातः । अनुकम्पादानं पुनर्जिनैः न कदापि प्रतिषिद्धम् ॥

तस्य श्रोतुः, दृष्टेष्टविरोधज्ञानविरहेण शास्त्रेतरमानशास्त्रान्यतरविरुद्धत्वज्ञानाभावेन, श्रुतं अप्रामाण्यज्ञानानास्कंदितश्रुतज्ञानमात्रं भवति न तु चिंताभावनाभ्यां परिपूर्णम्, कस्यचित्तु विपरीताभिनिवेशवतः श्रोतुः, अज्ञानं विरुद्धत्वेनाप्रामाण्यज्ञानास्कंदितत्वात्तत्त्वतोऽज्ञानमेव तत् स्यात् ॥ १७२ ॥ ननु वाक्यार्थादिभेदेन श्रुतज्ञानस्य कथं पूर्णता वाक्यार्थादिज्ञानस्य मतिरूपत्वादित्याशंक्य समाधत्ते ।

**वक्कत्थाइमइ च्चिय ईहाइत्तेण तेण कह सद्दं । भण्णइ सद्दत्थमइं सुअनाणब्भतरं बिंति ॥ १७३ ॥**

वाक्यार्थादिमतिरेवेहादित्वेनेहादिरूपत्वाद्विशेषधर्मस्य सामान्यधर्मव्याप्यत्वात्, तेन कथं शाब्दं वाक्यार्थादिज्ञानम्? भण्यतेऽत्रोत्तरं दीयते, शब्दार्थमतिं शब्दप्रयोज्यां मतिम्, श्रुतज्ञानाभ्यंतराम्, ब्रुवते सिद्धांतवृद्धाः । अत एव समानाक्षरलाभानां चतुर्दशपूर्वविदामपि षट्स्थानपतितत्वं मतिभेदेन श्रूयते, तथा चोक्तं बृहत्कल्पभाष्ये । "अक्खरलंभेण समा ऊणहिया हुंति मइविसेसेहिं । ते वि य मइविसेसा सुअनाणब्भंतरे जाण[८०] ॥ " न चैवमुपयोगसांकर्यं यावत्कालं श्रुतव्यापारस्तावत्तदुपयोगस्यैव संभवात् तत्सामग्र्या बलवत्त्वात्, अत एव श्रुतनिशृतमतिज्ञानकालेपि श्रुतात्यय एव व्युत्पादितो विशेषावश्यकादाविति ध्येयम् ॥ १७३ ॥ इदमेव प्रतीत्योपपादयति ।

**एत्तो च्चिय उववज्जइ सद्दा जाणामि एअमट्ठं ति । णियमसरिसं सुअनाणं काउं इय होइ उवएसो॥१७४**

इत एवोपपद्यते शब्दादेनमर्थं जानामीति, नहीयं धीः शब्दोत्तरकालविचारस्य मानसादित्वे घटते, उपनीतज्ञानादौ

८० अक्षरलाभेन समा ऊनाधिका भवन्ति मतिविशेषैः । तेऽपि च मतिविशेषाः श्रुतज्ञानाभ्यन्तरे जानीहि ॥

लौकिकविषयताद्यभावात् साक्षात्करोमीत्यादिप्रतीतिपरिहारेपि तत्र शाब्दयामीति प्रतीतेः समाधातुमशक्यत्वात्, न चात्र शब्दप्रयोज्यत्वमुपाधिभूतमेव विषयः, बाधकं विना स्वभावभूतस्यैव शाब्दत्वस्य तत्र विषयत्वात्, इत्यमुना प्रकारेण, निजसदृशं पदार्थादिभेदेन पूर्णम्, श्रुतज्ञानं कर्त्तुमुपदेश उक्तक्रमानुविद्धसूत्रदेशनात्मा भवति यथास्वज्ञानमेव योग्ये श्रोतरि हितार्थिनामुपदेशप्रवृत्तेरिति द्रष्टव्यम् ॥ १७४ ॥ नन्वेवं पूर्णस्वज्ञानानुसारिण उपदेशाच्छ्रुतज्ञानमेव पूर्णं श्रोतुः स्यात् न तु चिंताभावनात्मकं स्वविचारार्जितविशिष्टतरसंस्कारजन्यत्वाच्चिंताभावनयोरित्याशंक्य समाधत्ते ।

**एवंपि सुअं अहिअं कह चिंताभावणप्पगं होउ । भण्णइ तारिसणियमइवित्थारे जुज्जइ तहत्तं ॥ १७५**

एवमपि पूर्णोपदेशेपि, श्रुतमधिकं यथाश्रुतार्थश्रोत्रपेक्षया स्यात्, चिंताभावनात्मकं तत्कथं भवतु, भण्यते तादृशनिजमतिविस्तारे श्रुतानुसृतस्वमतिप्रपंचे, युज्यते तथात्वं चिंताभावनात्मकत्वम्, श्रुतपर्यायक्रमेण यथोत्तरं क्षयोपशमवृद्धेस्तन्नियामकत्वात् ॥ १७५ ॥ ननु ज्ञानस्य क्षणिकत्वात् कथं बहुवेलः पदार्थाद्युपयोग इति नैयायिकाद्याशंकां निराकुर्वन्नाह ।

**दीहो उवओगद्धा तहा खओवसमओ अ एगत्तं । तेण न संकरदोसो एवं नाणंतरे होइ ॥ १७६ ॥**

दीर्घो यथोचितबहुसमयावच्छिन्नः, उपयोगाद्धा श्रुतोपयोगकालस्तथा श्रुतोपदेशात्तथानुभवाबाधाच्च, ननु पदार्थवाक्यार्थादिविचारणानामेकोपयोगत्वे धूमप्रत्यक्षवमह्न्यनुमित्यादीनामप्येकोपयोगत्वापत्तिरित्यत आह । तथा क्षयोपशमतश्चैकोपयोगहेतुक्षयोपशमाच्च, एकत्वं प्रत्यक्षानुमित्यादिस्थले उपयोगभेदनियामकः क्षयोपशमभेदोस्ति अत्र तु तदभावादुपयोगैक्यमप्रत्यूहमिति भावः । अत एवाह एवं पदार्थादिधियामेकोपयोगत्वे, तेनोपयोगैक्ये तथा क्षयोपशमस्य नियामकत्वेन, ज्ञानांतरे प्रत्यक्षानुमित्यादिरूपे, न संकरदोषो न सांकर्यप्रसंग इति ॥१७६॥ ननु वाक्यार्थज्ञानं मुख्यार्थानुपपत्तिज्ञानपर्यवसितं

लक्षणानुग्राहकतयैवोपयुज्यते, तथा च यत्र पूर्वापरविरोधपरामर्शात्मकं वाक्यार्थज्ञानमुज्जृंभते तत्र लक्षणाजन्यवाक्यार्थज्ञानात्मक एक एव पर्यवसितः शाब्दबोधः संभवतीति पदार्थादिचतुष्टयक्रमः कल्पनामात्रमित्याशंक्य समाधत्ते ।



**नणु फलिओ वक्कत्थो एगो च्चिय कह चउविहो भणिओ । भण्णइ तहेव दीसइ सामण्णविसेसभावेणं ॥** १७८गा

ननु फलितो वाक्यार्थ एक एव, तथा च कथं चतुर्विधो भणितोऽर्थ इति प्रक्रमाल्लभ्यते, भण्यते, तथैव पदार्थादिक्रमेणैव, सामान्यविशेषभावेन दृश्यते, यथाहि घटादिद्रव्यं घटादिसामान्यात्मनाऽनुवृत्तं श्यामत्वरक्तत्वादिविशेषात्मना च क्रमानुबद्धतया व्यावर्त्तमानं दृष्टमिति तथैवांगीक्रियते, तथा प्रकृतश्रुतोपयोगोपि प्रतिनियतस्वसामान्यात्मना यथोचितकालमनुवृत्तः पदार्थादिविशेषात्मना च क्रमानुबद्धतया व्यावर्त्तमानो दृष्ट इति तथैवाभ्युपगंतुं युज्यते, न हि दृष्टविरोधेन कल्पना संभवति, लक्षणा च पदार्थस्य पदार्थांतरपर्यवसानार्थतयोपयुज्यते, न चात्र विधेयनिषेध्यविशेषग्रहः सूपपदः, भावभेदेन तस्यानियतत्वस्य प्रागुपपादितत्वात्, तस्मादाज्ञाशुद्धभावेन वाक्यांतरार्थसमर्थनार्थं महावाक्यार्थापेक्षाऽऽवश्यकी, न चायमेव पर्यवसितो भवितुमर्हति, अंगांगिभावेन सामान्यविशेषोभयविषयतयैवोपयोगस्य पर्यवसानात्, अन्यत्राप्यवग्रहेहादिभावेन तथा पर्यवसानदर्शनादिति दिक् ॥ १७७ ॥ तदेवं पदार्थादिभेदेन चतुर्द्धा सूत्रव्याख्या व्यवस्थिता एतज्जन्यं तत्त्वज्ञानमेव च गुर्वायत्तः शुद्धाज्ञायोगलाभः परम इष्टप्राप्तिहेतुरित्याह ।

**एवं सम्मन्नाणं आणाजोगो उ होइ परिसुद्धो । जं नाणी निच्छयओ इच्छियमत्थं पसाहेइ ॥१७८॥**

एवमुक्तक्रमेण, सम्यक् परिपूर्णम्, ज्ञानं भवति, एतदेवाज्ञायोगस्तु परिशुद्धो भवति, यद् यस्मात्, ज्ञानी ईप्सितमर्थं प्रसाधयति, प्रतिबंधशतोपनिपातेपि तत्तद्रव्यक्षेत्राद्यनुकूलप्रवृत्त्या कार्यांतराविरोधेन साध्यसिद्धेरप्रत्यूहात् भावानुवृत्त्या

बहूनां मार्गप्रदानबीजाधानकरणादिना तदनुबंधप्रवृत्तेश्च ॥ १७८ ॥ यत एवं ज्ञानी स्वपरयोरिष्टसाधकोऽतः स एव प्रमाणीकर्त्तव्यः परलोकार्थिनेत्याह ।

**एसो चेव पमाणीकायव्वो णेवमप्पगहियत्ता । धम्मस्सत्थिलहुत्तं जं थोवो रयणवावारो ॥ १७९ ॥**

एष एव ज्ञान्येव, प्रमाणीकर्त्तव्यो निश्शंकमेतद्वचनानुसारेणैव प्रवृत्तिर्विधेयेति भावः । अत्रार्थे दोषमाशंक्य निराकुरुते एवं ज्ञानिन एव प्रमाणीकर्त्तव्यत्वे, ज्ञानिनामल्पत्वाद्धर्मस्याल्पगृहीतत्वाल्लघुत्वमनादेयत्वं न शंकनीयम्, यद् यस्माल्लोकेऽपि रत्नव्यापारः स्तोक एव दृश्यते, न चायमनादेयः, तस्माद् व्यापारस्यादेयतायां विवेकपूर्वत्वमेव प्रयोजकं न तु बहुपरिगृहीतत्वमिति भावः । न चेदेवं बहुजनपरिगृहीतो लोकधर्मो न साज्यः स्यात्, तदुक्तम्, " बहुजणपवित्तिमेतं इत्थं तेहिं इह लोइओ चेव । धम्मो न उज्झियव्वो छेएण तहि बहुजणपवित्ति[८१] ॥ ता आणाणुगयं जं तं चेव वुहेण सेवियव्वं तु । किमिह वहुणा जणेणं हंदि ण सेयत्थिणो बहुआ[८२] ॥ रयणत्थिणोति थोवा तद्दायारो वि जह उ लोअंमि । इह सुद्धधम्मरयणत्थिदायगा दढयरं णेआ[८३] " ॥ १७९ ॥ अल्पैरपि ज्ञानिभिः परिगृहीतो धर्मो बहुकार्यकारित्वात्तत्त्वतो बहुपरिगृहीत एवेत्यप्याह ।

---

८१ बहुजनप्रवृत्तिमात्रमत्र तैरिह लौकिकश्चैव । धर्मो नोज्झितव्यश्छेकेन तत्र बहुजनप्रवृत्तिः ॥

८२ तस्मादाज्ञानुगतं यत्तच्चैव बुधेन सेवितव्यं तु । किमिह बहुना जनेन हन्दि न श्रेयोर्थिनो बहवः ॥

८३ रत्नार्थिन इति स्तोकाः तद्दातारोऽपि यथा तु लोके । इह शुद्धधर्मरत्नार्थिदायका दृढतरं ज्ञेयाः ॥

बहवे जीवंति तओ तेण इमो चेव बहुपरिग्गहिओ । ता नाणिपरिग्गहिए धम्मे नियमेण जइअव्वं१८०

बहवो जीवंति ततो रत्नव्यापारादिव धर्मव्यापारात्, तेनायमेव ज्ञानिपरिगृहीतो धर्म एव, बहुपरिगृहीतो भवति, तत्तस्मात्, ज्ञानिपरिगृहीते धर्मे, नियमेन निश्चयेन, यतितव्यम् ॥१८०॥ ननु दुष्करो ज्ञानिपरिगृहीतो धर्मः कथं तत्र श्रोतुः प्रवृत्तिः स्यादित्याशंक्य समाधत्ते ।

ण य दुक्करंमि धम्मे उवदेसाओ वि कह भवे जत्तो । णो दुक्करो जमेसोहिगारिणो जम्मभीअस्स॥१८१

न च दुष्करे धर्मे, उपदेशादपि उपदेशं श्रुत्वापि, कथं भवेत् यत्न इति शंकनीयम्, यद् यस्मादधिकारिणो मोक्षाभिलाषिणः, जन्मभीतस्य संसारभयवतः, नैष धर्मः, दुष्करः फले उत्कटेच्छासत्त्वे तदुपायज्ञानवतस्तदुपायप्रवृत्तौ बालस्यायोगात्, तस्योत्कटेच्छाऽभावप्रभावप्रयोज्यत्वाद्भवति च भववैराग्यान्मोक्षेच्छाया उत्कटत्वमतस्तद्वतो न मोक्षोपायानुष्ठानस्य दुष्करत्वमिति, तदिदमुक्तम् । " भवस्वरूपविज्ञानात्तद्विरागाच्च तत्त्वतः । अपवर्गानुरागाच्च स्यादेतन्नान्यथा क्वचित् ॥" इति ॥ १८१ ॥ इत्थमधिकारिणो धर्मस्य न दुष्करत्वमिदमुक्तम्, अनधिकारिणस्तु दुष्कर एवायमित्याह ।

अपरिणए धम्मंमी नाभवो संसयाइणा कुणइ । बद्धनिकाइअकम्मा तहा न एयं कुणइ जीवो॥१८२

अपरिणते सम्यग्ज्ञानाभावेन मोक्षोपायतयाऽनिष्टे, धर्मे, अभव्यो यथा संशयादिना न करोत्येनं धर्मं आदिना विपर्ययानध्यवसायग्रहः, तथा बद्धमनंतरं निकाचितं च सकलकरणायोग्यत्वेन व्यवस्थापितं कर्म चारित्रमोहाख्यं येनैतादृशः, जीवः सत्यकिविद्याधरादिवत् परिणतजिनप्रवचनोपि, नैतं धर्मं करोति धर्मानुष्ठानहेतुभूताया उत्कटफलेच्छाया मिथ्यात्व-

मोहेनैव चारित्रमोहेनापि विघटनाविशेषात् ॥ १८२ ॥ यद्येवं बद्धनिकाचितकर्माणं प्रति धर्मानुष्ठानमजनयत उपदेशस्य नैःफल्यम्, तदा जिनोपदेशस्य सर्वसाधारण्यानुपपत्तिरित्याशंकायामाह ।

**एवं जिणोवएसो विचित्तरूवोऽपमायसारो वि । उचितावेक्खाइ च्चिय जुज्जइ लोगाण सव्वेसिं॥१८३**

एवं बद्धनिकाचितकर्मणा धर्माननुष्ठाने, अप्रमादसारोपि पुरस्कृताप्रमादोपि, जिनोपदेशः सर्वेषां लोकानाम्, उचितापेक्षयैव योग्यतानतिक्रमेणैव, विचित्ररूपो नानातात्पर्यको युज्यते ये यावद्धर्मयोग्यास्तेषां तावन्मात्रप्रवर्त्तनेनैव चरितार्थत्वात्, तत्रापुनर्बंधकादयः केचित् सामान्यदेशनाया योग्याः, केचित् सम्यग्दृष्टिगुणयोग्यप्रज्ञापनायाः, केचिद्देशविरतिगुणस्थानकार्हप्ररूपणायाः, केचिच्च निर्द्धूतचारित्रमोहमालिन्या अप्रमत्ततारूपप्रव्रज्यादेशनाया इति ॥ १८३ ॥ अप्रमत्तताया एव सर्वसाधारणस्यापि जिनोपदेशस्य पुरस्करणे तु उपपत्तिमाह ।

**जह निव्विग्घं सिग्घं गमणं मग्गण्णुणो णगरलाभे । हेऊ तह सिवलाभे निच्चं अपमायपरिवुड्ढी॥१८४**

यथा निर्विघ्नं व्याक्षेपत्यागेन, शीघ्रमविलंबेन, मार्गज्ञस्य गमनं पथः प्रध्वरवक्रादिप्रदेशवेत्तुः, नगरलाभे हेतुः, तथा नित्यं सर्वदाऽप्रमादपरिवृद्धिः प्रव्रज्याप्रतिपत्तिकालादारभ्योत्तरोत्तरगुणस्थानारोहक्रमेण प्रवर्द्धमानपरिणामरूपा, शिवलाभे हेतुः, अत एव यावंतं कालं न मूलोत्तरगुणस्खलना तावानेव कालो निश्चयतः प्रव्रज्यापर्यायः परिगण्यते, तदुक्तमुपदेशमालायाम् । " न तहिं दिवसा पक्खा मासा वरिसा व से गणिज्जंति । जे मूलउत्तरगुणा अक्खलिआ ते गणिज्जंति[८४] ॥"

---

८४ न तत्र दिवसाः पक्षाणि मासा वर्षाणि वा तस्य गण्यन्ते । ये मूलोत्तरगुणा अस्खलितास्ते गण्यन्ते ॥

इत्थं चाप्रमत्ततैव सर्वत्र भगवता प्रशस्तेत्युपपन्नम् ॥ १८४ ॥ एतदेव निगमयन् प्रतिबंधेप्येतदत्यागोपदेशमाह ।



**एयं चिय इह तत्तं णवरं कालोवि एत्थ पडिवक्खो। तहविय परमत्थविऊ खलंति णो णियपइन्नाओ॥१८५**

एतदेवाप्रमादपुरस्करणमेव, इह धर्मे, तत्त्वमुपनिषद्भूतम्, नवरं केवलम्, कालोपि दुःषमालक्षणः, किं पुनश्चारित्रमोहक्षयोपशममंदतेत्यप्यर्थः, अत्राप्रमादपुरस्करणे, प्रतिबंधकः सिद्धिलक्षणफलं प्रत्येकादिभवव्यवधानकारित्वेन तथाविधाऽप्रमादविघटकत्वात्तस्य, न चैवमेतदालंबनेनैव संयमादरत्यागो विधेय इत्याह तथापि, परमार्थविदो यथावदायव्ययस्वरूपज्ञाः, निजप्रतिज्ञातेन न स्खलंति किन्तु कालबलमपि निजवीर्योल्लासेन निहत्य यथाशक्ति स्वप्रतिज्ञानुसारेण प्रवर्त्तंत एव धर्मकर्मणीति भावः ॥ १८५ ॥ इत्थं च भावानुज्ञानुसृतं पुरस्कृताप्रमादमेव धर्मानुष्ठानमिति व्यवस्थितं अत्रैव मतांतरमुपन्यस्यन्नाह

**अण्णे धम्मब्भासं सययविसयभावजोगओ बिंति। णिच्छयओ तमजुत्तं जुज्जइ ववहारओ णवरं॥१८६**

अन्ये आचार्याः, धर्माभ्यासं सततविषयभावयोगतो ब्रुवते सतताभ्यासविषयाभ्यासभावाभ्यासभेदात्त्रिविधं धर्मानुष्ठानमित्यर्थः, तत्र नित्यमेवोपादेयतया लोकोत्तरगुणावाप्तियोग्यतापादकमातापितृविनयादिवृत्तिः सतताभ्यासः, मोक्षमार्गस्वामिन्यर्हदादौ पूजादिकरणाभ्यासो विषयाभ्यासः, सम्यग्दर्शनादीनां भावानां भवोद्वेगपूर्वमभ्यासश्च भावाभ्यासः, फलसन्निधानभेदात् यथोत्तरं प्राधान्यं चात्र द्रष्टव्यम्, तदाह । "अण्णे भणंति तिविहं सययविसयभावजोगओ णवरं । धम्मंमि अणुट्ठाणं जहुत्तरपहाणरूवं तु८५॥" तदेतद्दूषयति । तदुक्तमतम्, निश्चयतो निश्चयनयमाश्रित्य, अयुक्तं साक्षाद्दर्शना-

८५ अन्ये भणन्ति त्रिविधं सततविषयभावयोगतो नवरम् । धर्मेऽनुष्ठानं यथोत्तरप्रधानरूपन्तु ॥

घनाराधनारूपे मातापित्रादिविनयस्वभावे कर्मणि भववैराग्यादिभावाभावेन परमार्थोपयोगरूपधर्मानुष्ठानत्वस्य वक्तुमशक्यत्वात्, तदिदमाह । "एयं च ण जुत्तिखमं णिच्छयणयजोगओ जओ विसए। भावेण य परिहीणं धम्माणुट्ठाणमो किह णु[८६]॥" दूषितमप्येतन्मतं कथंचित् समर्थयन्नाह । नवरं केवलं व्यवहारतो व्यवहारनयमाश्रित्य युज्यते ॥ १८६ ॥ अत्र हेतुमाह ।

**तिविहंपि भावभेआ चित्तफलं अपुणबंधगाईणं। जं एयं एत्थं पुण तहभवत्तं परो हेऊ ॥ १८७ ॥**

त्रिविधमपि सतताभ्यासाद्यनुष्ठानम्, भावभेदान्मनःपरिणामनानात्वादपुनर्बन्धकादीनामादिना मार्गाभिमुख्यमार्गपतितग्रहः, यद् यस्मादेतच्चित्रफलं नानाविधाशयवृद्धिकरं नत्वेवमपुनर्बंधकादिभावेन क्रियमाणस्य सतताभ्यासादेरप्युचितोचितप्रवृत्त्यनुबंधेन भावाज्ञायोग्यतागर्भत्वात्तात्त्विकव्यवहारदृष्ट्याऽयुक्तत्वमीक्षामहे, तदिदमुक्तमुपदेशपदे । "ववहारओ उ जुज्जइ तहा तहा अपुणबंधगाईणं[८७] ॥" तथा, "सम्माणुट्ठाणं चिय ता सव्वमिणंति तत्तओ णेयं। ण य अपुणबंधगाइं मोत्तुं एयं इहं होइ[८८] ॥" अन्यत्राप्युक्तम् ॥ "एवं भूतस्य या प्रवृत्तिः सा सर्वैव साध्वीति" तदेवं सिद्धमेतदपि धर्मानुष्ठानम्, अत्रासाधारणं नियामकमाह । अत्र पुनः पर उत्कृष्टः, हेतुस्तथाभव्यत्वं तत्परिपाकार्थमेवेतरकारणकलापोपयोगात् ॥१८७॥ तथाभव्यत्वस्वरूपपरिज्ञानार्थमेवोपदेशपदगतां गाथामाह ।

---

८६ एतच्च न युक्तिक्षमं निश्चयनययोगतो यतो विषये । भावेन च परिहीनं धर्मानुष्ठानं कथं नु ॥

८७ व्यवहारतस्तु युज्यते तथा तथापुनर्बन्धकादीनाम् ।

८८ साम्यानुष्ठानं चैव तस्मात्सर्वमिदमिति तत्त्वतो ज्ञेयम् । न चापुनर्बन्धकादि मुक्त्वा एतदिति भवति ॥

**तहभव्वत्तं चित्तं अकम्मजं आयतत्तमिह णेयं । फलभेया तह कालाइआणमक्खेवगसहावं ॥ १८८ ॥**



तथाभव्यत्वं चित्रं नानारूपम्, भव्यत्वमेवेति गम्यते, अकर्मजमकर्मनिर्मितम्, आत्मतत्त्वं साकारानाकारोपयोगवज्जीवस्वभावभूतम्, इह विचारे, ज्ञेयमत्र हेतुः, फलभेदात्तीर्थकरगणधरादिरूपतया भव्यत्वफलस्य वैचित्र्योपलंभात्, तथेति समुच्चये, कालादीनां कालनियतिपूर्वकृतकर्मणां समग्रांतररूपाणाम्, आक्षेपकस्वभावं संनिहितताकारकस्वभावम्, यदि च भव्यत्वमेकस्वभावं स्यात् तदा तीर्थकरसिद्धादिभेदः सिद्धांतोक्तो विघटेत, नहि ऋजुसूत्रादयः पर्यायनयकारणभेदं विना कार्यभेदं मन्यंतेऽन्यथैकस्मादेव कारणात् सकलत्रैलोक्यकार्योत्पत्तिप्रसंगेन कारणांतरकल्पनावैयर्थ्यप्रसंगात्, अथ सामग्र्याः कार्यतावच्छेदकावच्छिन्नोत्पत्तिव्याप्यत्वात्तीर्थकरसिद्धत्वाद्यवच्छिन्नस्यानापत्तिरेव, नहि तीर्थकरसिद्धत्वादिकं कार्यतावच्छेदकम्, अर्थसमाजसिद्धत्वात्, अन्यथा नीलघटत्वादिकमपि तथा स्यात्, तीर्थकरातीर्थकरसिद्धादिभेदाभिधानं च वैधर्म्यमात्राभिप्रायेणैवेति, भव्यत्वभेदे मानाभाव इति चेत्, न, तीर्थकरसिद्धत्वाद्यवच्छिन्ने नियामकस्यावश्यवाच्यत्वात्, सामान्यतः क्लृप्तकारणताकतत्तद्व्यक्तीनामेव तन्नियामकत्वमिति चेत्, तादृशनियामकत्वमेव हेतुत्वमिति तावद्व्यक्तिविशेषकल्पनापेक्षया भव्यत्वविशेष एवांतरंगत्वात् कल्पयितुं युक्त इति किं न विभाव्यते । विशेषरूपेण तत्तद्व्यक्तीनामन्यथासिद्धत्वान्न हेतुत्वमिति चेत्, तर्हि द्रव्यत्वेन जन्यभावत्वेनैक एव कार्यकारणभावः स्यादिति तंतुत्वादिना कारणत्वबुद्धिव्यपदेशयोरप्रामाण्यापत्तिः, पटत्वाद्यवच्छिन्नस्याकस्मिकतापत्तेस्तत्र तंतुत्वादिना हेतुत्वमावश्यकं अन्यथा तदवच्छिन्नसामग्र्यनिश्चये एतावत्सत्त्वेऽवश्यं पटोत्पत्तिरिति निश्चयरूपादाकस्मिकत्वात् प्रवृत्तेर्दुर्घटत्वप्रसंगात्तादृशनिश्चय एव कृतिसाध्यताधीसंभवात्, तत्पटत्वाद्यवच्छिन्नस्याकस्मिकत्वं त्विष्टमेव, तद्धर्मावच्छिन्नसामग्रीसत्त्वेपि तथा निश्चयायोगात्, तद्धर्मावच्छिन्ने प्रवृत्त्यभा-

वाच्येति चेत्, न, प्रवृत्त्यनौपयिककारणतायामेवं वक्तुमशक्यत्वात्, नियतान्वयव्यतिरेकप्रतियोगित्वरूपकारणताया विशेषरूपेणैव ग्रहसंभवाच्च, सादृश्यबुद्ध्यैव प्रवृत्त्युपपत्तेरन्यथान्वयव्यतिरेकव्यभिचारग्रहयोरविशेषेण कारणताबुद्धावप्रतिबंधकत्वप्रसंगात्, एतेन विशेषान्वयव्यतिरेकाभ्यां सामान्यव्यभिचारानिर्णयानुगतागुरुविशेषांतरानुपस्थितिलाघवादिप्रतिसंधानवशात् सामान्यत एव हेतुहेतुमद्भावग्रहात्, ग्राहकाभावादेव न विशेषकार्यकारणभावसिद्धिरित्यपास्तम्, अपि च प्रत्येकं कारणानां स्वेतरयावत्कारणसहितत्वेन यावत्कारणरूपायाः सामग्र्याश्च तत्तत्संबंधेन कार्यव्याप्यत्वे गौरवादितरकारणविशिष्टचरमकारणस्यापि सामग्रीत्वे चरमकारणविशिष्टेतरकारणानां तथात्वे विनिगमकाभावात्, तत्त्वेन जनकत्वे गौरवतादवस्थ्याच्च, निरूपकतया तथाभव्यत्वस्यैव तादात्म्येन तावद्धर्मककार्यनियामकत्वं युक्तम्, न च कालादिवैचित्र्यमेवास्त्वित्यत्र विनिगमकाभावः, देशकालोभयनियमबीजभव्यत्ववैचित्र्यस्यैव युक्तत्वात्, न चैवं पुरुषकारादिवैयर्थ्यम्, तत्समवधाननियतत्वात् तथाभव्यत्वस्य, तेन तदाक्षेपात्, अत एव नोपदेशादिवैयर्थ्यमपि, तथाभव्यत्वमपेक्ष्यैव तत्प्रवृत्तेरुचितप्रवृत्त्यादिचिह्नेन तदनुमानात्, अत एव न केवलस्वभाववादसाम्राज्यम्, तथात्वस्यान्येहत्वालीढत्वादन्यथा ऋषभवर्द्धमानादीनां स्वभावाभेदे सिद्धिकालभेदाद्यप्रसंगाद्भेदे चास्मन्मतप्रवेशात्, यदि च तत्कालायोग्यस्यापि सिद्धिः स्यात्तदाऽभव्यस्यापि तत्प्रसंगः, कथंचिद्विशेषे पुनरनायत्येष्यमाणे स्यादेकं स्यादनेकं चायातं भव्यत्वम्, यथा सामान्येनैकरूपमाम्रनिंबकदंबादीनां वृक्षत्वं विशेषचिंतायां तु रसवीर्यविपाकभेदादाम्रादीनां नानारूपमिति। अथैकस्याप्यनेककार्यजननशक्तिमत्त्वान्नानुपपत्तिरिति चेत्, न, येन स्वभावेन पूर्वकार्यजननशक्तिस्तेनैवोत्तरकार्यजननशक्तावभ्युपगम्यमानायां पूर्वोत्तरकार्ययोर्यौगपद्यप्रसंगात्, सर्वथैकत्वेऽनेककार्यजननशक्तिमत्त्वस्य दुर्वचत्वात्, तदिदमुक्तम्। "इहरासमंजसत्तं तस्स तहसहाव-

याइ तह चित्तो । कालाइजोगओ नणु तस्स विवागो कहं होइ[८९] ॥ एसो उ तंतसिद्धो एवं घडए त्ति णियमओ एवं । पडिवज्जेयव्वं खलु सुहुमेणं तक्कजोगेणं[९०] ॥ एवं चिय विन्नेओ सफलो नाएण पुरिसगारो वि । तेण तहक्खेवाओ स अन्नहा कारणो ण भवे[९१] ॥ उवएससफलयावि अ एवं इहरा ण जुज्जति तओ वि । तह तेण अणिक्खित्तो सहाववाओ बला एति[९२]॥ को कुवलयाण गंधं कहेइ महुरत्तणं च उच्छूणं । वरहत्थीण य लीलं विणयं च कुलप्पसूआणं[९३]॥ एत्थ य जो जह सिद्धो संसरिओ तस्स संतियं चित्तं । किं तस्सहावमहणो भव्वत्तं वायमुद्दिस्स[९४] ॥ जइ तस्सहावमेवं सव्वं सिद्धं जहोइयं चेव । अह णो ण तहा सिद्धी पावइ तस्साजहण्णस्स[९५] ॥ एसाण लंघणिज्जा मा होज्जा सव्वपच्चयविणासे । अवि य णिहालेयव्वा तह णो दोसप्पसंगाओ[९६] ॥ जइ सव्वहा अजोगो विचित्तया इंदि वीणिअसख्खा । पावइ अतस्सहाव-

---

८९ इतरथासमंजसत्वं तस्य तथास्वभावतादि तथा चित्रः । कालादियोगतो ननु तस्य विपाकः कथं भवति ॥

९० एष तु तन्त्रसिद्धः एवं घटत इति नियमत एवम् । प्रतिपत्तव्यं खलु सूक्ष्मेण तर्कयोगेन ॥

९१ एवं चैव विज्ञेयः सफलो ज्ञातेन पुरुषकारोपि । तेन तथाक्षेपात् स अन्यथा कारणो न भवेत् ॥

९२ उपदेशसफलतापि च एवमितरथा न युज्यते ततोऽपि । तथा तेनानाक्षिप्तः स्वभाववादो बलादेति ॥

९३ कः कुवलयानां गन्धं कथयति मधुरत्वञ्चेक्षूणाम् । वरहस्तिनां च लीलां विनयं च कुलप्रसूतानाम् ॥

९४ अत्र च यो यथा सिद्धः सांसारिकस्तस्य सच्चित्तम् । किं तत्स्वभावमथनः भव्यत्वं वादमुद्दिश्य ॥

९५ यदि तत्स्वभावमेव सर्वं सिद्धं यथोदितं चैव । अथ नो न तथासिद्धिः प्राप्नोति तस्याजघन्यस्य ॥

९६ एषाज्ञा लंघनीया मा भवेत्सर्वप्रत्ययविनाशे । अपि च निभाल्यास्तथा नो दोषप्रसङ्गात् ॥

तओ विसेसो अभव्वस्स[97] ॥ अह कहवि तव्विसेसो इच्छिज्जइ णियमओ तदक्खेवा । इच्छिअसिद्धी सव्वेसि चित्तयाए अणेगंतो[98] ॥ अणियसहावयावि हु ण तस्सहावत्तमंतरेणावि । ता एवमणेगंतो सम्मंति कयं पसंगेण[99] ॥ " ॥ १८८ ॥

ननु यद्येवं तथाभव्यत्वेनैव कार्यसिद्धिस्तदा किं संयमयोगव्यापारेणेत्यत आह ।

**तह वि खलु जयंति जई धीरा मोक्खट्ठमुज्जुआ णिच्चं । अइयारच्चाएणं समुदयवादं पमाणंता ॥१८९॥**

तथापि तथाभव्यत्वचित्रतासत्त्वेपि, खलु निश्चये, यतंते संयमयोगे यत्नमाद्रियंते, यतो धीरा मोहभटरणभङ्गक्षम-धैर्यवंतः, मोक्षार्थमुद्यता अभ्युत्थिताः, नित्यं निरंतरम्, अतिचारस्य चारित्रमालिन्यबीजस्य रागद्वेषलेशलक्षणस्य त्यागेन परिहारेण, समुदयवादं कालादिकलापस्य संमत्यादिसिद्धसामग्रीत्वमवादम्, प्रमाणयंतस्तथा चेष्टयोपपादयंतः, तथाभव्यत्वं हि पुरुषकाराद्यपेक्षमेव फलोपधायकं तत्र चापुनर्बंधकादिमयत्नापेक्षावश्यकीति भावः ॥ १८९ ॥ अत एवांतरंगयत्न एव साधूनामपेक्षितो विचित्रभव्यत्वानुगुणत्वात् न तु बहिरंग एवेति द्रढयन्नाह ।

**जत्तो अ अंतरंगो अज्झप्पज्झाणजोगओ जुत्तो । जं एसो च्चिय सारो सयलंमिवि जोगसत्थंमि ॥१९०॥**

यत्नश्चांतरंगोऽध्यात्मध्यानयोगत आत्मन्येवैकाग्रचित्तव्यापाराद्विद्यमानक्लिष्टचित्तनिरोधलक्षणोपेक्षासंयमादयुक्तः यद् यस्मादेष एवाध्यात्मध्यानयोग एव, सकलेऽपि योगशास्त्रे सारः परमसंवररूपस्याध्यात्मध्यानस्यैव सकलशास्त्रोपनि-

---

९७ यदि सर्वथायोग्यः विचित्रता हन्त्यपि निजस्वरूपात् । प्राप्नोति अतत्स्वभावत्वाद्विशेषोऽभव्यस्य ॥

९८ अथ कथमपि तद्विशेष इष्यते नियमतस्तदाक्षेपात् । इष्टसिद्धिः सर्वेषां चित्रतयानेकांतः ॥

९९ अनियतस्वभावतापि खलु न तत्स्वभावत्वमन्तरेणापि । तस्मादेवमनेकान्तः सम्यगिति कृतं प्रसङ्गेन ॥

पद्भूतत्वात्, तदुक्तम्, " आश्रवो भवहेतुः स्यात् संवरो मोक्षकारणम् । इतीयमार्हती मुष्टिरन्यदस्याः प्रपंचनम् ॥ " इति ॥ १९० ॥ अध्यात्मध्यानयोगस्यैव फलमभिष्टौति ।

**एअंमि परिणमंते आणंदस्सावि होइ परिवुद्धी । एवं चिय साहूणं जीवम्मुत्तत्तणं जुत्तं ॥ १९१ ॥**

एतस्मिन्नध्यात्मध्याने, परिणमत्येकांगीभावमागच्छति । आनंदस्यापि साम्यसुखस्यापि, परिवृद्धिर्भवति साम्यध्यानयोर्मिथो निष्कंपताबीजत्वात्, तदुक्तम्, " न साम्येन विना ध्यानं न ध्यानेन विना च तत् । निष्कंपं जायते तस्माद्वयमन्योन्यकारणात् ॥ " इत्येवमेव च साधूनां जीवन्मुक्तित्वं युक्तं जीवित्वे सति सांसारिकानंदातिशयितानंदाऽभिव्यक्तेरेव जीवन्मुक्तिपदार्थत्वात् । तदिदमभिप्रेत्योक्तम्, " निर्जितमदमदनानां वाक्कायमनोविकाररहितानाम् । विनिवृत्तपराशानामिहैव मोक्षः सुविहितानाम् ॥ " तथा, " नैवास्ति राजराजस्य तत्सुखं नैव देवराजस्य । यत्सुखमिहैव साधोर्लोकव्यापाररहितस्य " ॥ इति ॥ १९१ ॥ अध्यात्मपरिणतिक्रमादानंदवृद्धिक्रमे भगवतीसम्मतिमाह ।

**भणिअं च भगवईए मासाइक्कमेण वंतराईणं । वीईवयंति समणा देवाणं तेउलेस्सं ति ॥ १९२ ॥**

भणितं च भगवत्यां मासादिक्रमेण प्रव्रज्याप्रतिपत्तिसमयादारभ्य मासादिकालक्रमेण, व्यंतरादीनां देवानां व्यतिव्रजंति व्यतिक्रामंति, श्रमणास्तथाविधक्रमपरिणतिमदध्यात्मध्यानवंतस्तेजोलेश्यामिति, तेजोलेश्या हि प्रशस्तलेश्योपलक्षणम्, सा च सुखासिकाहेतुरिति कारणे कार्योपचारात्तेजोलेश्याशब्देनात्र सुखासिका विवक्षिता, आलापकश्चायम् । "जे इमे भंते अजत्ताए समणा णिग्गंथा विहरंति एते णं कस्स तेउलेस्सं वीतिवयंति, गो०, मासपरियाए समणे णिग्गंथे वाणमंतराणं देवाणं तेउलेस्सं वीतिवयंति, दुमासपरियाए समणे णिग्गंथे असुरिंदवज्जिआणं भवणवासीणं तेउलेस्सं वीतिवयंति, एवं

एतेणं अभिलावेणं, तिमासपरिआए समणे असुरकुमाराणं देवाणं तेउ०, चउमासपरिआए समणे गहणक्खत्ततारारूवाणं जोइसिआणं देवाणं तेउ०, पंचमासपरिआए चंदिमसूरिआणं जोइसिआणं जोइसराईणं, छमासपरिआए सोहम्मीसाणाणं देवाणं, सत्तमासपरिआए सणंकुमारमाहिंदाणं देवाणं, अट्ठमासपरिआए बंभलोगलंतगाणं देवाणं, णवमासपरिआए महसुक्कसहस्साराणं देवाणं, दसमास परिआए आणय पाणय आरण अच्चुआणं देवाणं, एक्कारसमासपरिआए गेवेज्जगाणं देवाणं, बारसमासपरिआए समणे णिग्गंथे अणुत्तरोववाइआणं देवाणं तेउलेस्सं वीतिवयंति तेणपरं सुक्के सुक्काभिजातिए भवित्ता ततो पच्छा सिज्झइ जाव अंतं करे इत्ति२००" ॥ १९२ ॥ नन्वीदृशोऽध्यात्मध्यानयोगो मोक्षवत् कालांतरभावीति

---

२०० य इमे भदन्त अद्य तावच्छ्रमणा निर्ग्रन्था विहरन्ति एते कस्य तेजोलेश्यां व्यतिव्रजन्ति, गौतम, मासपर्यायः श्रमणो निर्ग्रन्थो वानमन्तराणां देवानां तेजोलेश्यां व्यतिव्रजति, द्विमासपर्यायः श्रमणो निर्ग्रन्थोऽसुरेन्द्रवर्जितानां भवनवासिनां तेजोलेश्यां व्यतिव्रजति, एवमेतेनाभिलापेन, त्रिमासपर्यायः श्रमणः असुरकुमाराणां देवानां तेजोलेश्यां व्यतिव्रजति, चतुर्मासपर्यायः श्रमणो ग्रहनक्षत्रतारारूपाणां ज्योतिष्कानां देवानां तेजोलेश्यां व्यतिव्रजति, पंचमासपर्यायः चन्द्रसूर्ययोर्ज्योतिष्कयोर्ज्योतीराज्ञयोः०, षण्मासपर्यायः सौधर्मेशानानां देवानाम्०, सप्तमासपर्यायः सनत्कुमारमाहेंद्राणां देवानाम्०, अष्टमासपर्यायः ब्रह्मलोकलांतकानां देवानाम्०, नवमासपर्यायः महाशुक्रसहस्राराणां देवानाम्०, दशमासपर्यायः आनतप्राणतारणाच्युतानां देवानाम्०, एकादशमासपर्यायः ग्रैवेयकानां देवानाम्०, द्वादशमासपर्यायः श्रमणो निर्ग्रन्थः अनुत्तरौपपातिकानां देवानां तेजोलेश्यां व्यतिव्रजति, ततः परं शुक्लः शुक्लाभिजात्यो भूत्वा ततः पश्चात्सिद्ध्यति यावदन्तं करोतीति॥

कस्तदुपाय इत्याकांक्षायां नयमतभेदेनाह ।

**एयस्स पुण उवाओ णिच्छयओ इह तहा परिणतप्पा । कल्लाणमित्तजोगाइओ अववहारओ णेओ॥**

एतस्य काष्ठामाप्ताध्यात्मध्यानयोगस्य, पुनरुपायो निश्चयत इह जिनशासने, तथा परिणतस्तदावरणक्षयोपशमोत्थपरिणामवानात्मा, तन्नये तत्कुर्वद्रूपस्यैव तत्कारणत्वात्, व्यवहारतश्च कल्याणमित्रयोगादिस्तदुपायस्तन्नये स्वेतरसकलकारणसत्त्वे यत्सत्त्वे यत्सत्त्वं यदभावे च यदभावः तस्यैव तत्कारणत्वात्, भवति च स्वेतरापुनर्बंधकभावादिकारणसत्त्वे कल्याणमित्रयोगादिसत्त्वे कुवासनानाशादिद्वाराऽध्यात्मप्राप्तिस्तदभावे च तदभाव इत्यविकलं तस्य तद्धेतुत्वम् ॥ १९४॥ कल्याणमित्रयोगादिकमेव कर्त्तव्यत्वेनोपदिशन्नाह ।

**संबंधो कायव्वो सद्धिं कल्लाणहेउमित्तेहिं । सोअव्वं जिणवयणं धरियव्वा धारणा सम्मं ॥ १९४ ॥**

कल्याणहेतुमित्रैः श्रेयोहेतुस्निग्धलोकैः, सह संबन्धः कर्त्तव्योऽकल्याणमित्रयोगस्यानर्थहेतुत्वात्, कल्याणमित्रायोगे च बीजाधानाद्ययोगान्नियमोऽयम्, तथा जिनवचनं वीतरागभाषितमंगप्रकीर्णकादिभेदभिन्नम्, श्रोतव्यमाकर्णनीयं नियोगेन प्रतिदिनमेतदाकर्णनेनैव संवेगादिस्थैर्यसिद्धौ, तथा धर्त्तव्या धारणा श्रुतार्थाविस्मरणानुकूलव्यापाररूपा, सम्यक् शास्त्राविरोधेन ॥ १९४ ॥

**कज्जो परोवयारो परिहरिअव्वा परेसिं पीडा य । हेया विसयपवित्ती भावेयव्वं भवसरूवं ॥ १९५ ॥**

तथा कार्यो विधेयः, परेषां स्वव्यतिरिक्तानामुपकार आयतिहितानुकूलो व्यापारस्तस्य स्वोपकारानुबंधप्रधानत्वात्,

तथा परिहर्त्तव्या परेषां पीडा, परपीडापरिहारपरिणामस्यैव स्वपीडापरिहारफलकत्वात्, तथा हेया त्याज्या, संकल्पमूलवैमुख्येन विषयप्रवृत्तिः कामभोगासक्तिः, संकल्पनिरास एव कामनिरासात्, तदुक्तम्, " काम जानामि ते मूलं संकल्पात् किल जायसे । अतस्त्वं न करिष्यामि ततो मे किं करिष्यसि ॥१॥ " तथा भावयितव्यं विचारणीयम् भवस्वरूपम्, तथाहि " यथेह लवणांभोभिः पूरितो लवणोदधिः । शारीरमानसैर्दुःखैरसंख्येयैर्भवस्तथा ॥ १ ॥ किं च स्वप्नाप्तधनवन्न तथ्यमिह किंचन ॥ असारं राज्यवाज्यादि तुषखंडनवत्तथा ॥ २ ॥ तडिदाडंबराकारं सर्वमत्यंतमस्थिरम् । मनोविनोदफलदं बालधूलीगृहादिवत् ॥ ३ ॥ यश्च कश्चन कस्यापि जायते सुखविभ्रमः । मधुदिग्धासिधाराग्रग्रासवन्नैव सुन्दरः॥४॥" इत्यादि ॥१९५

**पुज्जा पूएअव्वा न निंदियव्वा य केइ जियलोए । लोगोणुवत्तिअव्वो गुणरागो होइ कायव्वो ॥ १९६ ॥**

तथा पूज्या लोकलोकोत्तरभावानुगता महान्तः, पूजनीयाः, तथा न निन्दितव्याः केचिज्जघन्यमध्यमोत्कृष्टभेदभाजो जन्तवो जीवलोके, तथा लोकोनुवर्त्तितव्यः स्वप्रवृत्त्यनुकूलतया सेवनीयः,तथा च पठ्यते । "लोकः खल्वाधारः सर्वेषां धर्मचारिणां सम्यक् । तस्माद्धर्मविरुद्धं लोकविरुद्धं च संत्याज्यम् ॥१॥ " तथा गुणराग औदार्यदाक्षिण्यादिगुणबहुमानो भवति कर्त्तव्यः, कुतोपि वैगुण्यात् स्वयं गुणानुष्ठानासामर्थ्येपि हि निबिडगुणानुरागवशात्तदनुष्ठानफलवन्तो भवन्ति जंतव इति॥१९६

**अगुणे मज्झत्थत्तं कायव्वं तह कुसीलसंसग्गी । वज्जेअव्वा जत्ता परिहरिअव्वो पमादो अ ॥ १९७ ॥**

अगुणे निर्गुणे पुरुषे, मध्यस्थत्वमौदासीन्यम्, कर्त्तव्यं तत्प्रशंसानिन्दयोरुभयतः पाशरज्जुस्थानीयत्वात्, तथा कुशीलसंसर्गिरसदाचारजनालापसंवासादिलक्षणा वर्जयितव्या, यत्नादादरात्, तस्या दोषसंक्रांतिनिमित्तत्वात्, तथा च

पठ्यते । " अंबस्स य निंबस्स य दुन्हंपि समागयाइं मूलाइं । संसग्गीइ विणट्ठो अंबो निंबत्तणं पत्तो[1] ॥" इत्यादि, च पुनः, प्रमादोऽज्ञानसंशयमिथ्याज्ञानादिरष्टप्रकारः, परिहर्त्तव्यस्तस्यैव सर्वानर्थमूलत्वात्, तदुक्तम्, "यत्र प्रयान्ति पुरुषाः स्वर्गे यच्च प्रयान्ति विनिपातम् । तत्र निमित्तमनार्यः प्रमाद इति निश्चयोऽयं मे ॥ १ ॥" ॥ १९७ ॥

**छिन्दिउमसुहविगप्पं कोहाइकसायचायसुद्धीए । सहजं आयसरूवं भावेअव्वं जहावसरं ॥ १९८ ॥**

छिन्दित्वाऽशुभविकल्पं स्फटिकोपरागस्थानीयमशुद्धोपयोगपरिणामम्, क्रोधादीनां कषायाणां त्यागेन या शुद्धिः स्वभावसमवस्थानलक्षणा तया हेतुभूतया, सहजमविकृतमात्मस्वरूपं कूटस्थस्वस्वभावलक्षणम्, भावयितव्यं ध्यातव्यम्, यथावसरं स्वस्थताकालौचित्येनापकृष्टाध्यात्मध्यानस्यैवोत्कृष्टाध्यात्मध्यानहेतुत्वादलब्धद्धेरेवोत्कर्षागत्वात् ॥ १९८ ॥ आत्मस्वरूपभावनाकारमाह ।

**देहं गेहं च धणं सयणं मित्ता तहेव पुत्ता य । अण्णा ते परदव्वा एएहिंतो अहं अण्णो ॥ १९९ ॥**

देहं शरीरम्, गेहं मन्दिरम्, धनं द्रव्यम्, शयनं शय्यास्थानम्, मित्राणि वयस्याः, तथैव च, पुत्रा अंगजाः, अन्यास्ते परद्रव्यरूपाः, एतेभ्योऽहमन्यो भिन्नस्वभावः, अतो देहादावहंकारादिविधानमज्ञानविजृंभितमिति, कूटस्थस्वभावोऽहं कथमाद्रिये विकारनिमित्तं परद्रव्यम् ॥ १९९ ॥ ननु यद्येवं विकारनिमित्तत्वात्सर्वमेव हेयं परद्रव्यं किं तदोपादेयमिति ध्यायेदित्याह ।

**आयसरूवं णिच्चं अकलंकं नाणदंसणसमिद्धं । णियमेणोवादेयं जं सुद्धं सासयं ठाणं ॥ २०० ॥**

---

[1] आम्रस्य च निम्बस्य च द्वयोरपि समागतानि मूलानि । संसर्ग्या विनष्ट आम्रो निम्बत्वं प्राप्तः ॥

आत्मस्वरूपं नित्यमनादिनिधनम्, अकलंकं निश्चयतोऽविकृतरूपं चारित्रमर्यादामुपगतम्, तथा ज्ञानदर्शनाभ्यां समृद्धमुपचितम्, नियमेन नियोगेनोपादेयम्, यत् शुद्धं कर्ममलक्षयपवित्रं सत्, शाश्वतं स्थानं परमपदलक्षणम् ॥ २०० ॥

सर्वस्वोपदेशमाह ।

किं बहुणा इह जह जह रागद्दोसा लहुं विलिज्जंति। तह तह पयट्टिअव्वं एसा आणा जिणिंदाणं॥२०१

किं बहुणा इह जह जहत्ति अन्यत्र सुविवृतेयं गाथा ॥

तवगणरोहणसुरगिरिसिरिणयविजयाभिहाणविबुहाणं। सीसेण पियं रइअं पगरणमिणमायसरणट्ठं ॥

अणुसरिय जुत्तिगब्भं पुव्वायरियाण वयणसंदब्भं । जं काउमिणं लद्धं पुण्णं तत्तो हवउ सिद्धी॥२०३

सुगममिति ॥

॥ अथ काव्यम् ॥

यस्यासन्गुरवोत्र जीतविजयप्राज्ञाः प्रकृष्टाशयाः ।
भ्राजन्ते सनया नयादिविजयप्राज्ञाश्च विद्याप्रदाः ॥
प्रेम्णां यस्य च सद्म पद्मविजयो जातः सुधीः सोदर-
स्तेन न्यायविशारदेन विवृतो ग्रंथः स्वयं निर्मितः ॥ १ ॥

॥ उपदेशरहस्यनामा ग्रंथः समाप्तः ॥

इति श्रीसकलपण्डितावंतसपण्डितश्रीमन्नयविजयगणि-
चरणारविन्दमधुकरपण्डितश्रीयशोविजयगणि-
विरचितमुपदेशरहस्यप्रकरणविवरणं
स्वोपज्ञं समाप्तमिति श्रेयः ॥

# ॥ शुद्धिपत्रम् ॥

| अशुद्धम्. | शुद्धम्. | पत्रम्. | पृष्ठम्. | पंक्तिः | अशुद्धम्. | शुद्धम्. | पत्रम्. | पृष्ठम्. | पंक्तिः |
|---|---|---|---|---|---|---|---|---|---|
| भावादत्तादानम् | भावाददत्तादानम् | ६ | १ | ३ | महासात्तो | महासत्तो | १२ | २ | ११ |
| मुचंतित्ति | मुचंतित्ति | ६ | १ | १० | दीहिं | दीहि | १५ | १ | ४ |
| भणितमर्मिदम् | भणितमिदम् | ६ | १ | १४ | दवत्थय- | दव्वत्थय- | १५ | १ | ९ |
| द्वावपि | द्वयोरपि | ७ | १ | १४ | एहिं | एहि | १५ | २ | १ |
| तं | तं० | ७ | २ | ३ | निःप्रकम्पस्य | निष्प्रकम्पस्य | १६ | १ | ४ |
| द्दष्टव्यम् | द्रष्टव्यम् | ९ | १ | ६ | सुष्टूवपि | सुष्ठुवपि | १७ | २ | १५ |
| द्दष्टस्तु | दृष्टस्तु | ९ | १ | १३ | समाध्यय- | समाध्यध्यय- | १८ | १ | १० |
| पृथक्निर्दि- | पृथग्निर्दि- | ९ | २ | ५ | आगार- | अगार- | १८ | १ | ११ |
| प्रशंसाद्यभिव्यङ्गः | प्रशंसाद्यभिव्यङ्ग्यः | १० | १ | ४ | वैयाव्रत्यस्य | वैयावृत्त्यस्य | १८ | २ | ६ |
| विशेष स्त्व- | विशेषस्त्व- | १० | २ | १३ | सप्त- | सप्तमी- | १८ | २ | ७ |
| कुणइत्तीति | कुणइत्ति | ११ | १ | १ | अविशुद्धस्स | अविसुद्धस्स | १९ | २ | ८ |
| पृथक्मानस्य | पृथक्त्वमानस्य | ११ | २ | ९ | अणुमणिज्जा | अणुमण्णिज्जा | २० | १ | ११ |

| अशुद्धम्. | शुद्धम्. | पत्रम्. | पृष्ठम्. | पंक्तिः |
|---|---|---|---|---|
| प्रशक्ति- | प्रसक्ति- | २० | २ | ८ |
| तथापी तरा- | तथापीतरा- | २५ | २ | ४ |
| तत्व | तत्त्व- | २६ | २ | ११ |
| समुज्जंभते | समुज्जृम्भते | २७ | १ | १५ |
| वैयावृत्य- | वैयावृत्त्य- | २९ | १ | २ |
| निःफलं | निष्फलं | २९ | २ | २ |
| पर्यवस्थितम् | पर्यवसितम् | ३० | १ | ९ |
| दूरं भव्याना- | दूरभव्याना- | ३० | १ | १२ |
| सदोषधर्म- | सदौषधम- | ३० | २ | २-३ |
| जहित्थिओ- | जहिच्छिओ- | ३१ | १ | १३ |
| परिस्कृतत्वात् | परिष्कृतत्वात् | ३१ | २ | १३ |
| वाह्य- | बाह्य- | ३२ | २ | ६ |
| श्रेष्टि- | श्रेष्ठि- | ३२ | २ | ११ |
| श्रेष्टि- | श्रेष्ठि- | ३२ | २ | १३ |
| प्रवट्टत्ते | प्रवट्टते | ३२ | २ | १४ |
| अत्थि | अच्छि | ३५ | २ | १३ |
| सम्यगध्यासितव्या- | सम्यगध्यासितव्यो- | ३६ | १ | १२ |
| सुहजाग | सुह जोगे | ३७ | २ | ३ |
| पद पद | पदे पदे | ३८ | २ | १५ |
| पृष्ठाः | पृष्टाः | ३८ | २ | १५ |
| शीलमंता | सीलमंता | ३९ | १ | ५ |
| समुतित्थास्तैः | समुत्थितास्तैः | ३९ | २ | ८ |
| प्रशक्तानुप्रशक्त्या | प्रसक्तानुप्रसक्त्या | ३९ | २ | १३ |
| वासेन | वासे न | ४४ | १ | ४ |
| सरीरो | सरीर | ४४ | २ | १ |
| चार्यादिना- | चार्यादीना- | ४५ | २ | १० |
| मना, | मनाः, | ४५ | २ | ११ |
| विशृष्टानि | विसृष्टानि | ४६ | १ | ४ |

| अशुद्धम्. | शुद्धम्. | पत्रम्. | पृष्ठम्. | पंक्तिः |
| --- | --- | --- | --- | --- |
| नर्हिं | तर्हिं | ४७ | २ | १२ |
| मुत्थति | मुच्छति | ४७ | २ | १२ |
| जोत्रिकंपो | जो त्रिकंपो | ४८ | १ | १ |
| च्छेतिच्छे- | चऊति चऊे- | ४८ | १ | १ |
| अहिऊसि | अहिचऊसि | ४८ | १ | ३ |
| मीर्गाभिक्षा | मीर्या भिक्षा | ४८ | १ | १३ |
| नेनैवं | ने नैवं | ४८ | २ | १ |
| निच्छिद्र- | निश्छिद्र- | ४८ | २ | ५ |
| फंदवारेहि वछि- | फंद वारेहि व छि | ४८ | २ | ८ |
| मास्पदं | मास्पन्दं | ४८ | २ | १० |
| चत्तारिभंगा | चत्तारि भंगा | ४९ | २ | ५ |
| क्षीणान्तराय | क्षीणेन्तराये | ५२ | १ | ३ |
| कंम्मिय | कम्मिय | ५४ | १ | ५ |
| सेव्यमानं | सेव्यमानं | ५४ | २ | २ |

| अशुद्धम्. | शुद्धम्. | पत्रम्. | पृष्ठम्. | पंक्तिः |
| --- | --- | --- | --- | --- |
| वुटी | वुट्ठो | ५४ | २ | १३ |
| चरणतो | चरणव्रतो | ५४ | २ | १४ |
| गीयकडो | गीय कडो | ५५ | १ | ४ |
| सांधो- | साधो | ५७ | १ | ८ |
| सर्ग- | सर्व- | ५८ | १ | ३ |
| असठेना | अशठेना | ५९ | २ | १० |
| भावनीवम् | भावनीयम् | ५९ | २ | ११ |
| ह्येतत् संबंधः | ह्येतत्संबंधः | ६० | १ | ११ |
| मनः पवन- | मनःपवन- | ६२ | २ | २ |
| अवेक्खाहु | अवेक्खा हु | ६२ | २ | ९ |
| इहापाय- | ईहापाय- | ६२ | २ | १२ |
| वाक्याथेदं- | वाक्यार्थैदं- | ६२ | २ | १३ |
| मन आदि- | मनआदि- | ६३ | १ | ४ |
| वासे सु | वासेसु | ६३ | २ | १ |

शुद्धि- पत्रम्.

| अशुद्धम्. | शुद्धम्. | पत्रम्. | पृष्ठम्. | पंक्तिः |
|---|---|---|---|---|
| वस्रादि | वस्त्रादि | ६३ | २ | ९ |
| ऐदंपर्यंतु | ऐदंपर्यं तु | ६३ | २ | १२ |
| षष्टो | षष्ठो | ६४ | १ | ७ |
| अण्णं | अ णं | ६४ | २ | ३ |
| निशृत- | निश्रित- | ६५ | २ | १० |
| वम- | व- | ६६ | १ | १२ |
| श्रैका | श्रैको | ६६ | १ | १२ |
| मेतं | मेत्तं | ६७ | १ | ७ |
| वुहेण | वुहेण | ६७ | १ | ८ |
| तथा निश्र- | तथानिश्र- | ६९ | २ | १५ |
| ऋंषंभ- | ऋषभ- | ७० | १ | १० |
| मास परि- | मासपरि- | ७२ | १ | ४ |
| करे इत्ति | करेइत्ति | ७२ | १ | ६ |
| तहा परिण- | तहापरिण- | ७२ | २ | २ |
| अववहार | अ ववहार- | ७२ | २ | २ |
| तथा परिण- | तथापरिण- | ७२ | २ | ३ |

## ॥ साक्षीकृतानेकप्राकृतसंस्कृतात्मकसूत्रशास्त्रगद्यपद्यानुक्रमणिका ॥


| गाथाङ्कः | गद्यपद्यानि. | पत्रम्. | पृष्ठम्. | गाथाङ्कः | गद्यपद्यानि. | पत्रम्. | पृष्ठम्. |
|---|---|---|---|---|---|---|---|
| ३ | श्रूयतां धर्मसर्वस्वं | १ | २ | ८ | सम्मोहसच्छयाए | ४ | १ |
| ४ | धम्मट्ठाणमहिंसा | २ | १ | ९ | अपरिच्छिअसुअणिहस- | ४ | २ |
| ४ | अजयं चरमाणो अ | २ | १ | ११ | अप्पागमो किलिस्सइ | ५ | १ |
| ४ | परलोकविधौ शास्त्रात् | २ | १ | ११ | न यालभिज्जा निउणं सहायं | ५ | १ |
| ४ | पापामयौषधं शास्त्रं | २ | १ | १२ | पढमं नाणं तओ दया | ५ | २ |
| ४ | रागाद्वा द्वेषाद्वा | २ | २ | १३ | गीयत्थो य विहारो | ५ | २ |
| ५ | वचनाराधनया खलु | २ | २ | १३ | एगाणियस्स दोसा | ५ | २ |
| ५ | अस्मिन् हृदयस्थे सति | २ | २ | १३ | सुअं मे आउसंतेणं | ६ | १ |
| ५ | गलमच्छ भवविमो- | २ | २ | १३ | एसा य परा आणा | ६ | १ |
| ६ | न मिथ्यात्वसमः शत्रुः | ३ | १ | १३ | एयम्मि परिचत्ते | ६ | १ |
| ८ | पायं अभिन्नगंठी- | ३ | २ | १३ | ता न चरणपरिणामे | ६ | १ |
| ८ | जो मंदरागदोसो | ४ | १ | १३ | नाणस्स होइ भागी | ६ | १ |

| गाथाङ्कः | गद्यपद्यानि. | पत्रम्. | पृष्ठम्. | गाथाङ्कः | गद्यपद्यानि. | पत्रम्. | पृष्ठम्. |
|---|---|---|---|---|---|---|---|
| १३ | जाओ अ अजाओ अ | ६ | २ | १७ | मिउप्पिंडो दव्वघडो | ९ | १ |
| १३ | गीयत्थ जायकप्पो | ६ | २ | १७ | अन्नो पुण जोगत्ते | ९ | १ |
| १३ | उउवद्धे वासेसु य | ६ | २ | १७ | गंठित्ति सुदुब्भेओ | ९ | १ |
| १३ | कालम्मि संकिलिट्ठे | ६ | २ | १८ | तित्थंकराइपूअं | ९ | २ |
| १४ | छाया जहा छायवतो णिबद्धा | ७ | १ | २० | अनुपयोगो द्रव्यं | १० | १ |
| १४ | विहीव सुत्ते तहि वारणा वा | ७ | १ | २० | जं पुण एयविउत्तं | १० | १ |
| १४ | अंधो य पंगु वह एस चावि | ७ | १ | २० | अप्पाहण्णा एवं | १० | १ |
| १४ | जं जह सुत्ते भणिअं | ७ | १ | २० | भोगादिफलविसेसो | १० | २ |
| १४ | सुअं पडुच्च | ७ | २ | २१ | एवं पडिवत्तीए | १० | २ |
| १५ | इत्थं च तत्थ णं जे से | ८ | १ | २१ | दिक्खाविहाणमेअं | १० | २ |
| १६ | णिच्छयणयस्स चरण | ८ | २ | २३ | यूनो वैदग्ध्यवतः | ११ | २ |
| १६ | एवं च अभिणिवेसा | ८ | २ | २३ | सुस्सूस धम्मरागो | ११ | २ |
| १६ | अणभिणिवेसाओ पुण | ८ | २ | २४ | तिण्णि तिया तिण्णि दुया | १२ | १ |
| १७ | अप्पाहन्ने वि इहं | ९ | १ | २४ | एगो तिण्णि य तियगा | १२ | १ |

| गाथाङ्कः | गद्यपद्यानि. | पत्रम्. | पृष्ठम्. |
|---|---|---|---|
| २४ | आह कई पुण मणसा | १२ | २ |
| २४ | तयहीणत्ता वयतणु- | १२ | २ |
| २४ | कारावणं पुण मणसा | १२ | २ |
| २४ | एते खलु परिसग्ग | १२ | २ |
| २६ | तइ संजाओ भावो | १३ | १ |
| २६ | अमए देहगए जह | १३ | २ |
| २६ | संथारपरावत्तं | १३ | २ |
| २८ | अकए बीजक्खेवे | १४ | १ |
| २८ | जिनेषु कुशलं चित्तं | १४ | १ |
| २८ | उपादेयधियात्यन्तं | १४ | १ |
| २८ | आचार्यादिष्वपि ह्येतत् | १४ | १ |
| २८ | भवोद्वेगश्च सहजो | १४ | २ |
| २८ | रचना पूजना दानं | १४ | १ |
| २८ | दुःखितेषु दयात्यन्तं | १४ | १ |
| २८ | ता एयम्मि पयत्तो | १४ | १ |
| २८ | जो चेव भावलेसो | १४ | २ |
| २८ | कज्जं इत्थं तेणं | १४ | २ |
| २९ | ओसरणे बलिमादी | १५ | १ |
| २९ | जिणभवणकारणादिवि | १५ | १ |
| २९ | ता तंपि अणुमयं चिय | १५ | १ |
| २९ | अरिहंतचेइयाणं | १५ | १ |
| २९ | अइणो वि हु दव्वत्थय | १५ | १ |
| २९ | तंतंमि वंदणाए | १५ | १ |
| २९ | मल्लादिएहिं पूआ | १५ | १ |
| ३२ | दव्वत्थओ वि एवं | १६ | १ |
| ३२ | लोगे सलाहणिज्जो | १६ | २ |
| ३२ | नो कप्पदि निग्गंथाण वा | १६ | २ |
| ३२ | णो कप्पइ णिग्गंथाण वा | १७ | १ |

| गाथाङ्कः | गद्यपद्यानि. | पत्रम्. | पृष्ठम्. |
|---|---|---|---|
| ३३ | अकसिणपवत्तगाण | १७ | १ |
| ३३ | अकसिणपवत्तगाणं | १७ | २ |
| ३३ | काउंपि जिणाययणेहिं | १७ | २ |
| ३३ | पढमे दंडसमादाणे | १८ | १ |
| ३४ | अह केरिसए पुण आराहए वयमिणं | १८ | १ |
| ३४ | तित्थयरसिद्धकुलगण | १८ | २ |
| ३४ | अणासायणा य भत्ती | १८ | २ |
| ३४ | आयरियउवज्झाय | १८ | २ |
| ३४ | चेइयकुलगणसंघे | १८ | २ |
| ३५ | असुहत्तरमुत्तरणप्पाओ | १९ | १ |
| ३५ | कडुगोसहादिजोगा | १९ | १ |
| ३५ | पढमाउ कुसलबंधो | १९ | १ |
| ३५ | चरणपडिवत्तिरूवो | १९ | १ |
| ३५ | अविसुद्धस्स ण वड्ढइ | १९ | २ |
| ३६ | यस्तृणमयीमपि कुटीं | १९ | २ |
| ३६ | जिनभवनं जिनविम्वं | २० | १ |
| ३६ | चेइयकुलगणसंघे | २० | १ |
| ३६ | चेइय पूआ किंवइ | २० | १ |
| ३८ | तेसिं वहुमाणेणं | २० | २ |
| ३८ | चेलाइ विहाणम्मी | २० | २ |
| ३९ | रुप्पं टंकं विसमाहयक्खरं | २१ | १ |
| ३९ | रुप्पं पत्तेयबुहा | २१ | १ |
| ३९ | क्रियाशून्यश्च यो भावो | २१ | १ |
| ४५ | नाकारणं भवेत्कार्यं | २२ | २ |
| ४५ | ववहारओ निमित्तं | २२ | २ |
| ४६ | नाभुक्तं क्षीयते कर्म | २३ | १ |
| ४८ | शक्तयः सर्वभावानां | २३ | २ |
| ४९ | अभिसंधेः फलं पूर्व- | २४ | १ |

| गाथाङ्कः | गद्यपद्यानि. | पत्रम्. | पृष्ठम्. |
|---|---|---|---|
| ४९ | तारिसगं चिय अहयं | २४ | १ |
| ५१ | तव संजमो अणुमओ | २४ | २ |
| ५१ | उभयतहाभावो पुण | २४ | २ |
| ५२ | ववहारो वि हु दोण्ह वि | २५ | १ |
| ५२ | तं दइवो विवरीअं | २५ | १ |
| ५२ | बहुकम्मणिमित्तो ण | २५ | १ |
| ५७ | बुद्धेः फलं तत्त्वविचारणं च | २६ | २ |
| ५९ | अपुनर्बन्धकस्यायं | २७ | १ |
| ५९ | विसयपडिहासमेत्तं | २७ | २ |
| ५९ | भिन्ने तु इतो नाणं | २७ | २ |
| ६० | तमेव सच्चं णीसंकं | २७ | २ |
| ६० | पडिवयम्मि वि सुद्धा | २७ | २ |
| ६० | नट्ठमि अ छाउमत्थिए नाणे | २८ | १ |
| ६२ | कालमणंतं च सुए | २८ | २ |
| ६२ | गंठिओ आरओ वि हु | २८ | २ |
| ६३ | तच्चित्ते तम्मणे तल्लेसे | २९ | १ |
| ६३ | खाओवसमिगलाभे | २९ | १ |
| ६४ | चरमंमि चेव भणिआ | २९ | २ |
| ६४ | पावं न तिव्वभावा | २९ | २ |
| ६५ | लब्ध्वा मुहूर्तमपि ये परिवर्जयन्ति | ३० | १ |
| ६६ | तित्थंकराइपूअं | ३० | १ |
| ६६ | जे दंसणवावण्णा | ३० | १ |
| ६८ | कत्थइ मनाणमेअस्स | ३१ | १ |
| ६८ | सदसदविसेसणाओ | ३१ | १ |
| ७४ | एत्थ उ मणोरहो वि य | ३२ | १ |
| ७६ | कम्मं जोगणिमित्तं | ३२ | २ |
| ७८ | सहकारिकारणं खलु | ३३ | १ |
| ७८ | गुणठाणगपरिणामे | ३३ | १ |

| गाथाङ्कः | गद्यपद्यानि. | पत्रम्. | पृष्ठम्. | गाथाङ्कः | गद्यपद्यानि. | पत्रम्. | पृष्ठम्. |
|---|---|---|---|---|---|---|---|
| ७८ | तन्निसर्गादधिगमाद्वा | ३३ | १ | ९८ | संकिज्जयासंकियभावभिक्खू | ३९ | २ |
| ८० | सुत्तत्थं खलु पढमो | ३४ | २ | ९८ | अणुगच्छमाणे वितहं भिजाणे | ३९ | २ |
| ८० | जइ एवं किं भणिआ | ३५ | १ | ९८ | समालवेज्जा पडिपुन्नभासी | ३९ | २ |
| ८० | अपुव्वनाणग्गहणे | ३५ | १ | ९८ | अहाबूइयाइं सुसिक्खएज्जा | ४० | १ |
| ८१ | जाणइ उप्पणरुई | ३५ | १ | ९८ | अलूसए नो पच्छन्नभासी | ४० | १ |
| ८३ | फासुअएसणिएहिं | ३५ | १ | ९८ | जे सुद्धसुत्ते उवहाणवं च | ४० | १ |
| ८३ | कंडूयभत्तखद्धा | ३५ | १ | ९९ | पुरिसज्जायं तु पडुच्च | ४० | २ |
| ८३ | अट्टज्झाणाभावे | ३६ | १ | १०१ | अणादीयं परिन्नाय | ४१ | १ |
| ८४ | काहं अच्छित्तिं अदुवा अधीहं | ३६ | १ | १०१ | एतेहिं दोहिं ठाणेहिं | ४१ | १ |
| ८४ | सव्वत्थ माइट्ठाणं | ३६ | १ | १०१ | भयणा वि हु भइयव्वा | ४१ | २ |
| ८४ | कोडिच्चागा काकिणी | ३६ | २ | १०१ | समुच्छिहिंति सत्थारो | ४१ | २ |
| ८५ | सम्मदिट्ठी जीवो | ३६ | २ | १०१ | एएहिं० | ४२ | १ |
| ९६ | सीलमंता उवसंता | ३९ | १ | १०१ | भवति स नामातीतः | ४२ | १ |
| ९७ | बालः पश्यति लिंगं | ३९ | १ | १०१ | जे केइ खुदग्गपाणा | ४२ | १ |

| गाथाङ्कः | गद्यपद्यानि. | पत्रम्. | पृष्ठम्. |
|---|---|---|---|
| १०१ | एएहिं० | ४२ | १ |
| १०१ | आहाकम्माइं भुंजंति | ४२ | २ |
| १०१ | एएहिं० | ४२ | २ |
| १०१ | जमिदं उरालमुदारं | ४२ | २ |
| १०१ | सर्वे भावाः स्वभावेन | ४२ | २ |
| १०१ | एएहिं० | ४२ | २ |
| १०३ | वयसमणधम्मे | ४३ | १ |
| १०३ | पिंडविसोहीसमिइ | ४३ | १ |
| १०४ | जं सम्मं तं पासहा | ४३ | १ |
| १०४ | दंसणचरित्तपक्खो | ४३ | २ |
| १०६ | आकत्तया महाकुण | ४४ | १ |
| १०७ | चउत्थछट्ठट्ठमकरणे | ४४ | १ |
| १०७ | आयंके उवसग्गे | ४४ | २ |
| १०७ | अहोनिच्चं तवोकम्मं | ४४ | २ |
| १०७ | उववासो वि हु एका | ४४ | २ |
| १०७ | अहोणिच्चं तवो कम्माइ | ४४ | २ |
| १०८ | छहिं ठाणेहिं समणे निग्गंथे | ४५ | १ |
| १०८ | यदकरणे प्रत्यवायस्तस्यैव | ४५ | १ |
| ११२ | अप्पाणईवेअरणी | ४६ | १ |
| ११२ | इन्द्रियाण्येव यत्सर्वं | ४६ | १ |
| ११२ | आपदां कथितः पंथाः | ४६ | १ |
| ११२ | पंचैतानि पवित्राणि | ४६ | १ |
| ११२ | जं अत्थओ अभिन्नं | ४६ | १ |
| ११२ | सव्वपवायमूलं | ४६ | १ |
| ११३ | पावे अकरणनियमो | ४६ | २ |
| ११३ | देसविरइगुणठाणे | ४७ | १ |
| ११३ | जं सो पहाणतरओ | ४७ | १ |
| ११४ | एत्तोच्चिय सेठीए | ४७ | १ |

| गाथाङ्कः | गद्यपद्यानि. | पत्रम्. | पृष्ठम्. | गाथाङ्कः | गद्यपद्यानि. | पत्रम्. | पृष्ठम्. |
|---|---|---|---|---|---|---|---|
| ११४ | एत्तो अ वीयरागो | ४७ | १ | ११६ | यद्वत् शस्यहितार्थं | ४९ | २ |
| ११४ | तह भावसंजयाणं | ४७ | १ | ११६ | तद्वत् जीव | ४९ | २ |
| ११४ | सयगरहणिज्जवावार | ४७ | १ | ११६ | अप्पेव सिद्धं तमजाणमाणो | ४९ | २ |
| ११६ | सद्दो तहिं मुच्छति छेदणा वा | ४७ | २ | ११६ | आहच्च हिंसा समिअस्स जा उ | ४९ | २ |
| ११६ | अहिच्छसि जं ति ण ते उ दूरं | ४८ | १ | ११६ | सिंपत्ततस्सेव जदा भविज्जा | ४९ | २ |
| ११६ | विन्नाय आरंभमिणं सदोसं | ४८ | १ | ११६ | प्रमत्तयोगात् प्राण | ४९ | २ |
| ११६ | जाव णं एस जीवे सया समियं | ४८ | १ | ११६ | जे वाविज्जंति णियमा | ५० | १ |
| ११६ | जाया वि चिट्ठा इरियाइयाओ | ४८ | १ | ११७ | उवसामपुवणीआ | ५० | २ |
| ११६ | जहा जहा अप्पतरो से जोगो | ४८ | २ | ११८ | उच्चालियंमि पाए | ५० | २ |
| ११६ | आरंभमिट्ठो जह आसवा य | ४८ | २ | ११८ | ण हु तस्स तण्णिमित्तो | ५० | २ |
| ११६ | अदोसवं ते जइ एस सद्दो | ४८ | २ | ११८ | तिव्वे मंदे णायमणाए | ५० | २ |
| ११६ | तं छिद्दओ होज्ज सइं तु दोसो | ४९ | १ | ११८ | तिव्वेहिं होइ तिव्वो | ५१ | १ |
| ११६ | घेतव्वगं भिन्न महिच्छिअं ते | ४९ | १ | ११८ | जाणं करेइ एक्को | ५१ | १ |
| ११६ | आहारणीहारविहीसु जोगो | ४९ | १ | ११८ | विरतो पुण जो जाणं | ५१ | १ |

| गाथाङ्कः | गद्यपद्यानि. | पत्रम्. | पृष्ठम्. | गाथाङ्कः | गद्यपद्यानि. | पत्रम्. | पृष्ठम्. |
|---|---|---|---|---|---|---|---|
| ११८ | एगो खओवसमिए | ५१ | १ | १२९ | सुत्ते तह पडिबंधा | ५४ | १ |
| ११८ | एमेव ओवसमिए | ५१ | १ | १३१ | संजमजीवित हेउं | ५४ | २ |
| ११८ | अहिगरणं पुव्वुत्तं | ५१ | १ | १३१ | जइ सव्वसो अभावो | ५५ | १ |
| ११८ | एगो करेइ परसुं | ५१ | १ | १३१ | गीयत्थो जयणाए | ५५ | १ |
| ११८ | सूईसुं पि विसेसो | ५१ | १ | १३३ | उस्सग्गेणं भणिआ | ५५ | २ |
| ११८ | कारगकरेंतगाणं | ५१ | २ | १३३ | उस्सग्गेण णिसिद्धाइ | ५५ | २ |
| ११८ | संजोययते कूडं | ५१ | २ | १३३ | उस्सग्गसुअं किंचि | ५५ | २ |
| ११८ | णिव्वत्तणाय संजो- | ५१ | २ | १३३ | नो कप्पइ निग्गंथाण वा | ५६ | १ |
| ११८ | देहंबलं खलु विरियं | ५१ | २ | १३३ | कप्पइ निग्गंथाण वा | ५६ | १ |
| ११८ | अहवा बालाईयं | ५१ | २ | १३३ | नो कप्पइ निग्गंथाण वा | ५६ | १ |
| ११८ | तत्थ अरत्तदुट्ठस्स | ५१ | २ | १३३ | णो कप्पइ असणं० वा | ५६ | १ |
| ११९ | केवली क्षीणचारित्रावरणत्वात् | ५२ | १ | १३३ | न हिंस्यात् सर्वभूतानि | ५६ | २ |
| १२० | समभावा सामाई- | ५२ | २ | १३८ | धावंतो उच्चाओ | ५७ | १ |
| १२७ | जीए बहुत्तरास- | ५३ | १ | १३९ | कज्जं नाणादीयं | ५७ | २ |

| गाथाङ्कः | गद्यपद्यानि. | पत्रम्. | पृष्ठम्. | गाथाङ्कः | गद्यपद्यानि. | पत्रम्. | पृष्ठम्. |
|---|---|---|---|---|---|---|---|
| १४० | उत्पद्यते हि सावस्था | ५८ | १ | १६७ | तो जह न देहपीडा | ६४ | १ |
| १४० | न हिंस्यात् सर्वभूतानि | ५८ | १ | १६८ | जे उ दाणं पससंति | ६४ | २ |
| १४० | अग्निषोमीयं पशुमालभेत | ५८ | १ | १६९ | धर्मस्यादिपदं दानं | ६४ | २ |
| १४५ | मारेंति दुस्समाए | ५९ | १ | १६९ | बीजं यथोषरे क्षिप्तं | ६४ | २ |
| १४५ | असठेण समाइन्नं | ५९ | १ | १७१ | आगमविहिअं तंते | ६५ | १ |
| १४६ | कलहकरा डमरकरा | ५९ | २ | १७० | मोख्खत्थं जं दाणं | ६५ | १ |
| १४८ | दंसणनाणचरित्तं | ६० | १ | १७२ | वाक्यार्थस्यत्रविषयं | ६५ | १ |
| १४८ | बहुकुग्गहंमि वि जणे | ६० | २ | १७२ | यत्तु महावाक्यार्थज- | ६५ | १ |
| १५५ | पयवक्कमहावक्कत्थ- | ३२ | १ | १७२ | ऐदंपर्यगतं यत् | ६५ | १ |
| १५५ | अत्थपदेण हु जम्हा | ६२ | १ | १७३ | अक्खरलंभेण समा | ६६ | २ |
| १६१ | अविहिकरणंमि आणा | ६३ | १ | १७९ | बहुजणपवित्तिमेत्तं | ६७ | १ |
| १६१ | जिनभवनकारणविधिः | ६३ | १ | १७९ | ता आणाणुगयं जं | ६७ | १ |
| १६१ | धुवक्लोओ अ जिणाणं | ६३ | १ | १७९ | रयणत्थिणो ति थोवा | ६७ | १ |
| १६३ | जिणाण बारसरूवो उ | ६३ | २ | १८१ | भवस्वरूपविज्ञानात् | ६७ | २ |

| गाथाङ्कः | गद्यपद्यानि. | पत्रम्. | पृष्ठम्. | गाथाङ्कः | गद्यपद्यानि. | पत्रम्. | पृष्ठम्. |
|---|---|---|---|---|---|---|---|
| १८४ | न तहिं दिवसा पक्खा | ६८ | १ | १८८ | जइ तस्सहावमेवं | ७० | २ |
| १८६ | अण्णे भणंति तिविहं | ६८ | २ | १८८ | एसाणलंघणिज्जा | ७० | २ |
| १८६ | एयं च न जुत्तिखमं | ६९ | १ | १८८ | जइ सव्वहा अजोग्गे | ७० | २ |
| १८७ | ववहारओ उ जुज्जइ | ६९ | १ | १८८ | अह कहवि तव्विसेसो | ७१ | १ |
| १८७ | सम्माणुट्ठाणं चिय | ६९ | १ | १८८ | अणियसहावया वि हु | ७१ | १ |
| १८७ | एवंभूतस्य या प्रवृत्तिः | ६९ | १ | १९० | आश्रवो भवहेतुः स्यात् | ७१ | २ |
| १८८ | इहरासमंजसत्तं | ७० | १ | १९१ | न साम्येन विना ध्यानम् | ७१ | २ |
| १८८ | एसो उ तंतसिद्धो | ७० | २ | १९१ | निर्जितमदमदनानाम् | ७१ | २ |
| १८८ | एवं चिय विन्नेओ | ७० | २ | १९१ | नैवास्ति राजराजस्य | ७१ | २ |
| १८८ | ववएससफलयावि अ | ७० | २ | १९२ | जे इमे भंते अज्जताए- | ७१ | २ |
| १८८ | को कुवलयाणं गंधं | ७० | २ | १९५ | काम जानामि ते मूलम् | ७३ | १ |
| १८८ | एत्थ य जो जह सिद्धो | ७० | २ | १९५ | यथेह लवणांभोभिः | ७३ | १ |

| गाथाङ्कः | गद्यपद्यानि. | पत्रम्. | पृष्ठम्. | गाथाङ्कः | गद्यपद्यानि. | पत्रम्. | पृष्ठम्. |
|---|---|---|---|---|---|---|---|
| १९५ | किंच स्वप्नाप्तधनवत् | ७३ | १ | १९६ | लोकः खल्वाधारः | ७३ | १ |
| १९५ | तडिदाडंबराकारम् | ७३ | १ | १९७ | अंबस्स य निंबस्स य | ७३ | २ |
| १९५ | यश्च कश्चन कस्यापि | ७३ | १ | १९७ | यत्र प्रयांति पुरुषाः | ७३ | २ |




॥ इति न्यायविशारदन्यायाचार्योपाध्यायपदालंकृतश्रीमद्यशोविजयगणिनिर्मितोपदेशरहस्यप्रकरणस्वोपज्ञविवरणसाक्षीकृतानेकप्राकृतसंस्कृतात्मकसूत्रशास्त्रगद्यपद्यानुक्रमणिका ॥

॥ इति ॥

॥ उपदेशरहस्यप्रकरणम् ॥